सामवेद संहिता कौथुम शाखा

Samaveda Samhita Kauthuma ShAkha

sanskritdocuments.org

September 29, 2018

Samaveda Samhita Kauthuma ShAkha

सामवेद संहिता कौथुम शाखा

Sanskrit Document Information

Text title : sAmaveda saMhitA kauthuma shAkhA

File name : sv-kauthuma.itx

Category : veda, svara

Location : doc_veda

Transliterated by : Anshuman Pandey pandey at umich.edu

Proofread by : Anshuman Pandey pandey at umich.edu

Latest update : March 8, 1998, September 10, 2014

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

September 29, 2018

sanskritdocuments.org

सामवेद संहिता कौथुम शाखा

पूर्वार्चिकः

छन्द आर्चिकः

आग्नेयं काण्डम्

प्रथमः प्रपाठकः । प्रथमोऽर्धः

१ १ १ ०१०१a अग्न आ याहि वीतये गृणानो हव्यदातये ।
१ १ १ ०१०१c नि होता सत्सि बर्हिषि ॥ १
१ १ १ ०१०१a त्वमग्ने यज्ञानाँ होता विश्वेषाँ हितः ।
१ १ १ ०१०२c देवेभिर्मानुषे जने ॥ २
१ १ १ ०१०३a अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् ।
१ १ १ ०१०३c अस्य यज्ञस्य सुक्रतुम् ॥ ३
१ १ १ ०१०४a अग्निर्वृत्राणि जङ्घनद्द्रविणस्युर्विपन्यया ।
१ १ १ ०१०४c समिद्धः शुक्र आहुतः ॥ ४
१ १ १ ०१०५a प्रेष्ठं वो अतिथिँ स्तुषे मित्रमिव प्रियम् ।
१ १ १ ०१०५c अग्ने रथं न वेद्यम् ॥ ५
१ १ १ ०१०६a त्वं नो अग्ने महोभिः पाहि विश्वस्या अरातेः ।
१ १ १ ०१०६c उत द्विषो मर्त्यस्य ॥ ६
१ १ १ ०१०७a एह्यू षु ब्रवाणि तेऽग्न इत्थेतरा गिरः ।
१ १ १ ०१०७c एभिर्वर्धास इन्दुभिः ॥ ७
१ १ १ ०१०८a आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात् ।
१ १ १ ०१०८c अग्ने त्वां कामये गिरा ॥ ८
१ १ १ ०१०९a त्वामग्ने पुष्करादध्यथर्वा निरमन्थत ।
१ १ १ ०१०९c मूर्ध्नो विश्वस्य वाघतः ॥ ९
१ १ १ ०११०a अग्ने विवस्वदा भरास्मभ्यमूतये महे ।
१ १ १ ०११०c देवो ह्यसि नो दृशे ॥ १०

१ १ १ ०२०१a नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः ।

१ १ १ ०२०१c अमैरमित्रमर्दय ॥ ११
१ १ १ ०२०२a दूतं वो विश्ववेदसँ हव्यवाहममर्त्यम् ।
१ १ १ ०२०२c यजिष्ठमृञ्जसे गिरा ॥ १२
१ १ १ ०२०३a उप त्वा जामयो गिरो देदिशतीर्हविष्कृतः ।
१ १ १ ०२०३c वायोरनीके अस्थिरन् ॥ १३
१ १ १ ०२०४a उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम् ।
१ १ १ ०२०४c नमो भरन्त एमसि ॥ १४
१ १ १ ०२०५a जराबोध तद्विविड्ढि विशेविशे यज्ञियाय ।
१ १ १ ०२०५c स्तोमँ रुद्राय दृशीकम् ॥ १५
१ १ १ ०२०६a प्रति त्यं चारुमध्वरं गोपीथाय प्र हूयसे ।
१ १ १ ०२०६c मरुद्भिरग्न आ गहि ॥ १६
१ १ १ ०२०७a अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः ।
१ १ १ ०२०७c सम्राजन्तमध्वराणाम् ॥ १७
१ १ १ ०२०८a और्वभृगुवच्छुचिमप्नवानवदा हुवे ।
१ १ १ ०२०८c अग्निँ समुद्रवाससम् ॥ १८
१ १ १ ०२०९a अग्निमिन्धानो मनसा धियँ सचेत मर्त्यः ।
१ १ १ ०२०९c अग्निमिन्धे विवस्वभिः ॥ १९
१ १ १ ०२१०a आदित्प्रत्नस्य रेतसो ज्योतिः पश्यन्ति वासरम् ।
१ १ १ ०२१०c परो यदिध्यते दिवि ॥ २०

१ १ १ ०३०१a अग्निं वो वृधन्तमध्वराणां पुरूतमम् ।
१ १ १ ०३०१c अच्छा नप्त्रे सहस्वते ॥ २१
१ १ १ ०३०२a अग्निस्तिग्मेन शोचिषा यँसद्विश्वं न्या३त्रिणम् ।
१ १ १ ०३०२c अग्निर्नो वँसते रयिम् ॥ २२
१ १ १ ०३०३a अग्ने मृड महाँ अस्यय आ देवयुं जनम् ।
१ १ १ ०३०३c इयेथ बर्हिरासदम् ॥ २३
१ १ १ ०३०४a अग्ने रक्षा णो अँहसः प्रति स्म देव रीषतः ।
१ १ १ ०३०४c तपिष्ठैरजरो दह ॥ २४
१ १ १ ०३०५a अग्ने युङ्क्ष्वा हि ये तवाश्वासो देव साधवः ।
१ १ १ ०३०५c अरं वहन्त्याशवः ॥ २५
१ १ १ ०३०६a नि त्वा नक्ष्य विश्पते द्युमन्तं धीमहे वयम् ।
१ १ १ ०३०६c सुवीरमग्न आहुत ॥ २६

१ १ १ ०३०७a अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् ।
१ १ १ ०३०७c अपाँ रेताँसि जिन्वति ॥ २७
१ १ १ ०३०८a इममू षु त्वमस्माकँ सनिं गायत्रं नव्याँसम् ।
१ १ १ ०३०८c अग्ने देवेषु प्र वोचः ॥ २८
१ १ १ ०३०९a तं त्वा गोपवनो गिरा जनिष्ठदग्ने अङ्गिरः ।
१ १ १ ०३०९c स पावक श्रुधी हवम् ॥ २९
१ १ १ ०३१०a परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् ।
१ १ १ ०३१०c दधद्रत्नानि दाशुषे ॥ ३०
१ १ १ ०३११a उदु त्यं जातवेदसं देवं वहन्ति केतवः ।
१ १ १ ०३११c दृशे विश्वाय सूर्यम् ॥ ३१
१ १ १ ०३१२a कविमग्निमुप स्तुहि सत्यधर्माणमध्वरे ।
१ १ १ ०३१२c देवममीवचातनम् ॥ ३२
१ १ १ ०३१३a शं नो देवीरभिष्टये शं नो भवन्तु पीतये ।
१ १ १ ०३१३c शं योरभि स्रवन्तु नः ॥ ३३
१ १ १ ०३१४a कस्य नूनं परीणसि धियो जिन्वसि सत्पते ।
१ १ १ ०३१४c जोषाता यस्य ते गिरः ॥ ३४

१ १ १ ०४०१a यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे ।
१ १ १ ०४०१c प्रप्र वयममृतं जातवेदसं प्रियं मित्रं न शँसिषम् ॥ ३५
१ १ १ ०४०२a पाहि नो अग्न एकया पाह्यू३त द्वितीयया ।
१ १ १ ०४०२c पाहि गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो ॥ ३६
१ १ १ ०४०३a बृहद्भिरग्ने अर्चिभिः शुक्रेण देव शोचिषा ।
१ १ १ ०४०३c भरद्वाजे समिधानो यविष्ठ्य रेवत्पावक दीदिहि ॥ ३७
१ १ १ ०४०४a त्वे अग्ने स्वाहुत प्रियासः सन्तु सूरयः ।
१ १ १ ०४०४c यन्तारो ये मघवानो जनानामूर्वं दयन्त गोनाम् ॥ ३८
१ १ १ ०४०५a अग्ने जरितर्विश्पतिस्तपानो देव रक्षसः ।
१ १ १ ०४०५c अप्रोषिवान्गृहपते महाँ असि दिवस्पायुर्दुरोणयुः ॥ ३९
१ १ १ ०४०६a अग्ने विवस्वदुषसश्चित्रँ राधो अमर्त्य ।
१ १ १ ०४०६c आ दाशुषे जातवेदो वहा त्वमद्या देवाँ उषर्बुधः ॥ ४०
१ १ १ ०४०७a त्वं नश्चित्र ऊत्या वसो राधाँसि चोदय ।
१ १ १ ०४०७c अस्य रायस्त्वमग्ने रथीरसि विदा गाधं तुचे तु नः ॥ ४१
१ १ १ ०४०८a त्वमित्सप्रथा अस्यग्ने त्रातर्ऋतः कविः ।

१ १ १ ०४०८c त्वां विप्रासः समिधान दीदिव आ विवासन्ति वेधसः ॥ ४२
१ १ १ ०४०९a आ नो अग्ने वयोवृधँ रयिं पावक शँस्यम् ।
१ १ १ ०४०९c रास्वा च न उपमाते पुरुस्पृहँ सुनीती सुयशस्तरम् ॥ ४३
१ १ १ ०४१०a यो विश्वा दयते वसु होता मन्द्रो जनानाम् ।
१ १ १ ०४१०c मधोर्न पात्रा प्रथमान्यस्मै प्र स्तोमा यन्त्वग्नये ॥ ४४

१ १ १ ०५०१a एना वो अग्निं नमसोर्जो नपातमा हुवे ।
१ १ १ ०५०१c प्रियं चेतिष्ठमरतिँ स्वाध्वरं विश्वस्य दूतममृतम् ॥ ४५
१ १ १ ०५०२a शेषे वनेषु मातृषु सं त्वा मर्तास इन्धते ।
१ १ १ ०५०२c अतन्द्रो हव्यं वहसि हविष्कृत आदिद्देवेषु राजसि ॥ ४६
१ १ १ ०५०३a अदर्शि गातुवित्तमो यस्मिन्व्रतान्यादधुः ।
१ १ १ ०५०३c उपो षु जातमार्यस्य वर्धनमग्निं नक्षन्तु नो गिरः ॥ ४७
१ १ १ ०५०४a अग्निरुक्थे पुरोहितो ग्रावाणो बर्हिरध्वरे ।
१ १ १ ०५०४c ऋचा यामि मरुतो ब्रह्मणस्पते देवा अवो वरेण्यम् ॥ ४८
१ १ १ ०५०५a अग्निमीडिष्वावसे गाथाभिः शीरशोचिषम् ।
१ १ १ ०५०५c अग्निँ राये पुरुमीढ श्रुतं नरोऽग्निः सुदीतये छर्दिः ॥ ४९
१ १ १ ०५०६a श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्ने सयावभिः ।
१ १ १ ०५०६c आ सीदतु बर्हिषि मित्रो अर्यमा प्रातर्यावभिरध्वरे ॥ ५०
१ १ १ ०५०७a प्र दैवोदासो अग्निर्देव इन्द्रो न मज्मना ।
१ १ १ ०५०७c अनु मातरं पृथिवीं वि वावृते तस्थौ नाकस्य शर्मणि ॥ ५१
१ १ १ ०५०८a अध ज्मो अध वा दिवो बृहतो रोचनादधि ।
१ १ १ ०५०८c अया वर्धस्व तन्वा गिरा ममा जाता सुक्रतो पृण ॥ ५२
१ १ १ ०५०९a कायमानो वना त्वं यन्मातृरजगन्नपः ।
१ १ १ ०५०९c न तत्ते अग्ने प्रमृषे निवर्तनं यद्दूरे सन्निहाभुवः ॥ ५३
१ १ १ ०५१०a नि त्वामग्ने मनुर्दधे ज्योतिर्जनाय शश्वते ।
१ १ १ ०५१०c दीदेथ कण्व ऋतजात उक्षितो यं नमस्यन्ति कृष्टयः ॥ ५४

प्रथम प्रपाठकः । द्वितीयोऽर्धः
१ १ २ ०६०१a देवो वो द्रविणोदाः पूर्णां विवष्ट्वासिचम् ।
१ १ २ ०६०१c उद्वा सिञ्चध्वमुप वा पृणध्वमादिद्वो देव ओहते ॥ ५५
१ १ २ ०६०२a प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता ।
१ १ २ ०६०२c अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः ॥ ५६
१ १ २ ०६०३a ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता ।

१ १ २ ०६०३c ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥ ५७
१ १ २ ०६०४a प्र यो राये निनीषति मर्तो यस्ते वसो दाशत् ।
१ १ २ ०६०४c स वीरं धत्ते अग्न उक्थशँसिनं त्मना सहस्रपोषिणम् ॥ ५८
१ १ २ ०६०५a प्र वो यह्वं पुरूणां विशां देवयतीनाम् ।
१ १ २ ०६०५c अग्निँ सूक्तेभिर्वचोभिर्वृणीमहे यँसमिदन्य इन्धते ॥ ५९
१ १ २ ०६०६a अयमग्निः सुवीर्यस्येशे हि सौभगस्य ।
१ १ २ ०६०६c राय ईशे स्वपत्यस्य गोमत ईशे वृत्रहथानाम् ॥ ६०
१ १ २ ०६०७a त्वमग्ने गृहपतिस्त्वँ होता नो अध्वरे ।
१ १ २ ०६०७c त्वं पोता विश्ववार प्रचेता ताक्षि यासि च वार्यम् ॥ ६१
१ १ २ ०६०८a सखायस्त्वा ववृमहे देवं मर्तास ऊतये ।
१ १ २ ०६०८c अपां नपातँ सुभगँ सुदँससँ सुप्रतूर्तिमनेहसम् ॥ ६२

१ १ २ ०७०१a आ जुहोता हविषा मर्जयध्वं नि होतारं गृहपतिं दधिध्वम् ।
१ १ २ ०७०१c इडस्पदे नमसा रातहव्यँ सपर्यता यजतं पस्त्यानाम् ॥ ६३
१ १ २ ०७०२a चित्र इच्छिशोस्तरुणस्य वक्षथो न यो मातरावन्वेति धातवे ।
१ १ २ ०७०२c अनूधा यदजीजनदधा चिदा ववक्षत्सद्यो महि दूत्याꣳ चरन् ॥ ६४
१ १ २ ०७०३a इदं त एकं पर ऊ त एकं तृतीयेन ज्योतिषा सं विशस्व ।
१ १ २ ०७०३c संवेशनस्तन्वे३ चारुरेधि प्रियो देवानां परमे जनित्रे ॥ ६५
१ १ २ ०७०४a इमँ स्तोममर्हते जातवेदसे रथमिव सं महेमा मनीषया ।
१ १ २ ०७०४c भद्रा हि नः प्रमतिरस्य सँसद्यग्ने सख्ये मा रिषामा वयं तव ॥ ६६
१ १ २ ०७०५a मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।
१ १ २ ०७०५c कविँ सम्राजमतिथिं जनानामासन्नाः पात्रं जनयन्त देवाः ॥ ६७
१ १ २ ०७०६a वि त्वदापो न पर्वतस्य पृष्ठादुक्थेभिरग्ने जनयन्त देवाः ।
१ १ २ ०७०६c तं त्वा गिरः सुष्टुतयो वाजयन्त्याजिं न गिर्ववाहो जिग्युरश्वाः ॥ ६८

१ १ २ ०७०७a आ वो राजानमध्वरस्य रुद्रँ होतारँ सत्ययजँ रोदस्योः ।
१ १ २ ०७०७c अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वम् ॥ ६९
१ १ २ ०७०८a इन्धे राजा समर्यो नमोभिर्यस्य प्रतीकमाहुतं घृतेन ।
१ १ २ ०७०८c नरो हव्येभिरीडते सबाध आग्निरग्रमुषसामशोचि ॥ ७०
१ १ २ ०७०९a प्र केतुना बृहता यात्यग्निरा रोदसी वृषभो रोरवीति ।
१ १ २ ०७०९c दिवश्चिदन्तादुपमामुदानडपामुपस्थे महिषो ववर्ध ॥ ७१
१ १ २ ०७१०a अग्निं नरो दीधितिभिरण्योर्हस्तच्युतं जनयत प्रशस्तम् ।

१ १ २ ०७१०c दूरेदृशं गृहपतिमथव्युम् ॥ ७२

१ १ २ ०८०१a अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासम् ।
१ १ २ ०८०१c यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सस्रते नाकमच्छ ॥ ७३
१ १ २ ०८०२a प्र भूर्जयन्तं महां विपोधां मूरैरमूरं पुरां दर्माणम् ।
१ १ २ ०८०२c नयन्तं गीर्भिर्वना धियं धा हरिश्मश्रुं न वार्मणा धनर्चिम् ॥ ७४
१ १ २ ०८०३a शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरिवासि ।
१ १ २ ०८०३c विश्वा हि माया अवसि स्वधावन्भद्रा ते पूषन्निह रातिरस्तु ॥ ७५
१ १ २ ०८०४a इडामग्ने पुरुदँसँ सनिं गोः शश्वत्तमँ हवमानाय साध ।
१ १ २ ०८०४c स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ ७६
१ १ २ ०८०५a प्र होता जातो महान्नभोविन्नृषद्मा सीददपां विवर्ते ।
१ १ २ ०८०५c दधद्यो धायी सुते वयाँसि यन्ता वसूनि विधते तनूपाः ॥ ७७
१ १ २ ०८०६a प्र सम्राजमसुरस्य प्रशस्तं पुँसः कृष्टीनामनुमाद्यस्य ।
१ १ २ ०८०६c इन्द्रस्येव प्र तवसस्कृतानि वन्दद्वारा वन्दमाना विवष्टु ॥ ७८
१ १ २ ०८०७a अरण्योर्निहितो जातवेदा गर्भ इवेत्सुभृतो गर्भिणीभिः ।
१ १ २ ०८०७c दिवेदिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः ॥ ७९
१ १ २ ०८०८a सनादग्ने मृणसि यातुधानान्न त्वा रक्षाँसि पृतनासु जिग्युः ।
१ १ २ ०८०८c अनु दह सहमूरान्कयादो मा ते हेत्या मुक्षत दैव्यायाः ॥ ८०

१ १ २ ०९०१a अग्न ओजिष्ठमा भर द्युम्नमस्मभ्यमध्रिगो ।
१ १ २ ०९०१c प्र नो राये पनीयसे रत्सि वाजाय पन्थाम् ॥ ८१
१ १ २ ०९०२a यदि वीरो अनु ष्यादग्निमिन्धीत मर्त्यः ।
१ १ २ ०९०२c आजुह्वद्धव्यमानुषक्षर्म भक्षीत दैव्यम् ॥ ८२
१ १ २ ०९०३a त्वेषस्ते धूम ऋण्वति दिवि सं च्छुक्र आततः ।
१ १ २ ०९०३c सूरो न हि द्युता त्वं कृपा पावक रोचसे ॥ ८३
१ १ २ ०९०४a त्वँ हि क्षैतवद्यशोऽग्ने मित्रो न पत्यसे ।
१ १ २ ०९०४c त्वं विचर्षणे श्रवो वसो पुष्टिं न पुष्यसि ॥ ८४
१ १ २ ०९०५a प्रातरग्निः पुरुप्रियो विष स्तवेतातिथिः ।
१ १ २ ०९०५c विश्वे यस्मिन्नमर्त्ये हव्यं मर्तास इन्धते ॥ ८५
१ १ २ ०९०६a यद्वाहिष्ठं तदग्नये बृहदर्च विभावसो ।
१ १ २ ०९०६c महिषीव त्वद्रयिस्त्वद्वाजा उदीरते ॥ ८६
१ १ २ ०९०७a विशोविशो वो अतिथिं वाजयन्तः पुरुप्रियम् ।
१ १ २ ०९०७c अग्निं वो दुर्यं वचः स्तुषे शूषस्य मन्मभिः ॥ ८७

१ १ २ ०९०८a बृहद्वयो हि भानवेऽर्चा देवायाग्नये ।
१ १ २ ०९०८c यं मित्रं न प्रशस्तये मर्तासो दधिरे पुरः ॥ ८८
१ १ २ ०९०९a अगन्म वृत्रहन्तमं ज्येष्ठमग्निमानवम् ।
१ १ २ ०९०९c य स्म श्रुतर्वन्नार्क्षे बृहदनीक इध्यते ॥ ८९
१ १ २ ०९१०a जातः परेण धर्मणा यत्सवृद्भिः सहाभुवः ।
१ १ २ ०९१०c पिता यत्कश्यपस्याग्निः श्रद्धा माता मनुः कविः ॥ ९०

१ १ २ १००१a सोमँ राजानं वरुणमग्निमन्वारभामहे ।
१ १ २ १००१c आदित्यं विष्णुँ सूर्यं ब्रह्मानं च बृहस्पतिम् ॥ ९१
१ १ २ १००२a इत एत उदारुहन्दिवः पृष्ठान्या रुहन् ।
१ १ २ १००२c प्र भूर्जयो यथा पथोद्यामङ्गिरसो ययुः ॥ ९२
१ १ २ १००३a राये अग्ने महे त्वा दानाय समिधीमहि ।
१ १ २ १००३c ईडिष्वा हि महे वृषं द्यावा होत्राय पृथिवी ॥ ९३
१ १ २ १००४a दधन्वे वा यदीमनु वोचद्ब्रह्मेति वेरु तत् ।
१ १ २ १००४c परि विश्वानि काव्या नेमिश्चक्रमिवाभुवत् ॥ ९४
१ १ २ १००५a प्रत्यग्ने हरसा हरः शृणाहि विश्वतस्परि ।
१ १ २ १००५c यातुधानस्य रक्षसो बलं न्युब्जवीर्यम् ॥ ९५
१ १ २ १००६a त्वमग्ने वसूँरिह रुद्राँ आदित्याँ उत ।
१ १ २ १००६c यजा स्वध्वरं जनं मनुजातं घृतप्रुषम् ॥ ९६

द्वितीय प्रपाठकः । प्रथमोऽर्धः
१ २ १ ०१०१a पुरु त्वा दाशिवाँ वोचेऽरिरग्ने तव स्विदा ।
१ २ १ ०१०१c तोदस्येव शरण आ महस्य ॥ ९७
१ २ १ ०१०२a प्र होत्रे पूर्व्यं वचोऽग्नये भरता बृहत् ।
१ २ १ ०१०२c विपां ज्योतींषि बिभ्रते न वेधसे ॥ ९८
१ २ १ ०१०३a अग्ने वाजस्य गोमत ईशानः सहसो यहो ।
१ २ १ ०१०३c अस्मे धेहि जातवेदो महि श्रवः ॥ ९९
१ २ १ ०१०४a अग्ने यजिष्ठो अध्वरे देवां देवयते यज ।
१ २ १ ०१०४c होता मन्द्रो वि राजस्यति स्रिधः ॥ १००
१ २ १ ०१०५a जज्ञानः सप्त मातृभिर्मेधामाशासत श्रिये ।
१ २ १ ०१०५c अयं ध्रुवो रयीणां चिकेतदा ॥ १०१
१ २ १ ०१०६a उत स्या नो दिवा मतिरदितिरूत्यागमत् ।
१ २ १ ०१०६c सा शन्ताता मयस्करदप स्रिधः ॥ १०२

१ २ १ ०१०७a ईडिष्वा हि प्रतीव्याꣳ यजस्व जातवेदसम् ।
१ २ १ ०१०७c चरिष्णुधूममगृभीतशोचिषम् ॥ १०३
१ २ १ ०१०८a न तस्य मायया च न रिपुरीशीत मर्त्यः ।
१ २ १ ०१०८c यो अग्नये ददाश हव्यदातये ॥ १०४
१ २ १ ०१०९a अप त्यं वृजिनँ रिपुँ स्तेनमग्ने दुराध्यम् ।
१ २ १ ०१०९c दविष्ठमस्य सत्पते कृधी सुगम् ॥ १०५
१ २ १ ०११०a श्रुष्ट्यग्ने नवस्य मे स्तोमस्य वीर विश्पते ।
१ २ १ ०११०c नि मायिनस्तपसा रक्षसो दह ॥ १०६

१ २ १ ०२०१a प्र मँहिष्ठाय गायत ऋताव्ने बृहते शुक्रशोचिषे ।
१ २ १ ०२०१c उपस्तुतासो अग्नये ॥ १०७
१ २ १ ०२०२a प्र सो अग्ने तवोतिभिः सुवीराभिस्तरति वाजकर्मभिः ।
१ २ १ ०२०२c यस्य त्वँ सख्यमाविथ ॥ १०८
१ २ १ ०२०३a तं गूर्धया स्वर्णरं देवासो देवमरतिं दधन्विरे ।
१ २ १ ०२०३c देवत्रा हव्यमूहिषे ॥ १०९
१ २ १ ०२०४a मा नो हृणीथा अतिथिं वसुरग्निः पुरुप्रशस्त एशः ।
१ २ १ ०२०४c यः सुहोता स्वध्वरः ॥ ११०
१ २ १ ०२०५a भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः ।
१ २ १ ०२०५c भद्रा उत प्रशस्तयः ॥ १११
१ २ १ ०२०६a यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारममर्त्यम् ।
१ २ १ ०२०६c अस्य यज्ञस्य सुक्रतुम् ॥ ११२
१ २ १ ०२०७a तदग्ने द्युम्नमा भर यत्सासाहा सदने कं चिदत्रिणम् ।
१ २ १ ०२०७c मन्युं जनस्य दूढ्यम् ॥ ११३
१ २ १ ०२०८a यद्वा उ विश्पतिः शितः सुप्रीतो मनुषो विशे ।
१ २ १ ०२०८c विश्वेदग्निः प्रति रक्षाँसि सेधति ॥ ११४

॥ इत्याग्नेय पर्वं काण्डम् ॥

ऐन्द्र काण्डम्

१ २ १ ०३०१a तद्वो गाय सुते सचा पुरुहूताय सत्वने ।
१ २ १ ०३०१c शं यद्गवे न शाकिने ॥ ११५
१ २ १ ०३०२a यस्ते नूनँ शतक्रतविन्द्र द्युम्नितमो मदः ।
१ २ १ ०३०२c तेन नूनं मदे मदेः ॥ ११६
१ २ १ ०३०३a गाव उप वदावटे महि यज्ञस्य रप्सुदा ।

१ २ १ ०३०३c उभा कर्णा हिरण्यया ॥ ११७
१ २ १ ०३०४a अरमश्वाय गायत श्रुतकक्षारं गवे ।
१ २ १ ०३०४c अरमिन्द्रस्य धाम्ने ॥ ११८
१ २ १ ०३०५a तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे ।
१ २ १ ०३०५c स वृषा वृषभो भुवत् ॥ ११९
१ २ १ ०३०६a त्वमिन्द्र बलादधि सहसो जात ओजसः ।
१ २ १ ०३०६c त्वँ सन्वृषन्वृषेदसि ॥ १२०
१ २ १ ०३०७a यज्ञ इन्द्रमवर्धयद्यद्भूमिं व्यवर्तयत् ।
१ २ १ ०३०७c चक्राण ओपशं दिवि ॥ १२१
१ २ १ ०३०८a यदिन्द्राहं तथा त्वमीशीय वस्व एक इत् ।
१ २ १ ०३०८c स्तोता मे गोसखा स्यात् ॥ १२२
१ २ १ ०३०९a पन्यंपन्यमित्सोतार आ धावत मद्याय ।
१ २ १ ०३०९c सोमं वीराय शूराय ॥ १२३
१ २ १ ०३१०a इदं वसो सुतमन्धः पिबा सुपूर्णमुदरम् ।
१ २ १ ०३१०c अनाभयिन्ररिमा ते ॥ १२४

१ २ १ ०४०१a उद्धेदभि श्रुतामघं वृषभं नर्यापसम् ।
१ २ १ ०४०१c अस्तारमेषि सूर्य ॥ १२५
१ २ १ ०४०२a यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य ।
१ २ १ ०४०२c सर्वं तदिन्द्र ते वशे ॥ १२६
१ २ १ ०४०३a य आनयत्परावतः सुनीती तुर्वशं यदुम् ।
१ २ १ ०४०३c इन्द्रः स नो युवा सखा ॥ १२७
१ २ १ ०४०४a मा न इन्द्राभ्याऽऽ३ दिशः सूरो अक्तुष्वा यमत ।
१ २ १ ०४०४c त्वा युजा वनेम तत् ॥ १२८
१ २ १ ०४०५a एन्द्र सानसिँ रयिँ सजित्वानँ सदासहम् ।
१ २ १ ०४०५c वर्षिष्ठमूतये भर ॥ १२९
१ २ १ ०४०६a इन्द्रं वयं महाधन इन्द्रमर्भे हवामहे ।
१ २ १ ०४०६c युजं वृत्रेषु वज्रिणम् ॥ १३०
१ २ १ ०४०७a अपिबत्कद्रुवः सुतमिन्द्रः सहस्रबाह्वे ।
१ २ १ ०४०७c तत्रादिदिष्ट पौँस्यम् ॥ १३१
१ २ १ ०४०८a वयमिन्द्र त्वायवोऽभि प्र नोनुमो वृषन् ।
१ २ १ ०४०८c विद्धी त्वा३स्य नो वसो ॥ १३२

१ २ १ ०४०९a आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक् ।
१ २ १ ०४०९c येषामिन्द्रो युवा सखा ॥ १३३
१ २ १ ०४१०a भिन्धि विश्वा अप द्विषः परि बाधो जही मृधः ।
१ २ १ ०४१०c वसु स्पार्हं तदा भर ॥ १३४

१ २ १ ०५०१a इहेव शृण्व एषां कशा हस्तेषु यद्वदान् ।
१ २ १ ०५०१c नि यामं चित्रमृञ्जते ॥ १३५
१ २ १ ०५०२a इम उ त्वा वि चक्षते सखाय इन्द्र सोमिनः ।
१ २ १ ०५०२c पुष्टावन्तो यथा पशुम् ॥ १३६
१ २ १ ०५०३a समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः ।
१ २ १ ०५०३c समुद्रायेव सिन्धवः ॥ १३७
१ २ १ ०५०४a देवानामिदवो महत्तदा वृणीमहे वयम् ।
१ २ १ ०५०४c वृष्णामस्मभ्यमूतये ॥ १३८
१ २ १ ०५०५a सोमानाँ स्वरणं कृणुहि ब्रह्मणस्पते ।
१ २ १ ०५०५c कक्षीवन्तं य औशिजः ॥ १३९
१ २ १ ०५०६a बोधन्मना इदस्तु नो वृत्रहा भूर्यासुतिः ।
१ २ १ ०५०६c शृणोतु शक्र आशिषम् ॥ १४०
१ २ १ ०५०७a अद्य नो देव सवितः प्रजावत्सावीः सौभगम् ।
१ २ १ ०५०७c परा दुःष्वप्न्यँ सुव ॥ १४१
१ २ १ ०५०८a क्वा३स्य वृषभो युवा तुविग्रीवो अनानतः ।
१ २ १ ०५०८c ब्रह्मा कस्तँ सपर्यति ॥ १४२
१ २ १ ०५०९a उपह्वरे गिरीणाँ सङ्गमे च नदीनाम् ।
१ २ १ ०५०९c धिया विप्रो अजायत ॥ १४३
१ २ १ ०५१०a प्र सम्राजं चर्षणीनामिन्द्रँ स्तोता नव्यं गीर्भिः ।
१ २ १ ०५१०c नरं नृषाहं मँहिष्ठम् ॥ १४४

द्वितीय प्रपाठकः । द्वितीयोऽर्धः

१ २ २ ०६०१a अपादु शिप्रयन्धसः सुदक्षस्य प्रहोषिणः ।
१ २ २ ०६०१c इन्द्रोरिन्द्रो यवाशिरः ॥ १४५
१ २ २ ०६०२a इमा उ त्वा पुरुवसोऽभि प्र नोनवुर्गिरः ।
१ २ २ ०६०२c गावो वत्सं न धेनवः ॥ १४६
१ २ २ ०६०३a अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम् ।
१ २ २ ०६०३c इत्था चन्द्रमसो गृहे ॥ १४७

१ २ २ ०६०४a यदिन्द्रो अनयद्रितो महीरपो वृषन्तमः ।
१ २ २ ०६०४c तत्र पूषाभुवत्सचा ॥ १४८
१ २ २ ०६०५a गौर्धयति मरुताँ श्रवस्युर्माता मघोनाम्
१ २ २ ०६०५c युक्ता वह्नी रथानाम् ॥ १४९
१ २ २ ०६०६a उप नो हरिभिः सुतं याहि मदानां पते ।
१ २ २ ०६०६c उप नो हरिभिः सुतम् ॥ १५०
१ २ २ ०६०७a इष्टा होत्रा असृक्षतेन्द्रं वृधन्तो अध्वरे ।
१ २ २ ०६०७c अच्छावभृथमोजसा ॥ १५१
१ २ २ ०६०८a अहमिद्धि पितुष्परि मेधामृतस्य जग्रह ।
१ २ २ ०६०८c अहँ सूर्य इवाजनि ॥ १५२
१ २ २ ०६०९a रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः ।
१ २ २ ०६०९c क्षुमन्तो याभिर्मदेम ॥ १५३
१ २ २ ०६१०a सोमः पूषा च चेततुर्विश्वासाँ सुक्षितीनाम् ।
१ २ २ ०६१०c देवत्रा रथ्योर्हिता ॥ १५४

१ २ २ ०७०१a पान्तमा वो अन्धस इन्द्रमभि प्र गायत ।
१ २ २ ०७०१c विश्वासाहँ शतक्रतुं मँहिष्ठं चर्षणीनाम् ॥ १५५
१ २ २ ०७०२a प्र व इन्द्राय मादनँ हर्यश्वाय गायत ।
१ २ २ ०७०२c सखायः सोमपाव्ने ॥ १५६
१ २ २ ०७०३a वयमु त्वा तदिदर्था इन्द्र त्वायन्तः सखायः ।
१ २ २ ०७०३c कण्वा उक्थेभिर्जरन्ते ॥ १५७
१ २ २ ०७०४a इन्द्राय मद्वने सुतं परि ष्टोभन्तु नो गिरः ।
१ २ २ ०७०४c अर्कमर्चन्तु कारवः ॥ १५८
१ २ २ ०७०५a अयं त इन्द्र सोमो निपूतो अधि बर्हिषि ।
१ २ २ ०७०५c एहीमस्य द्रवा पिब ॥ १५९
१ २ २ ०७०६a सुरूपकृत्नुमूतये सुदुघामिव गोदुहे ।
१ २ २ ०७०६c जुहूमसि द्यविद्यवि ॥ १६०
१ २ २ ०७०७a अभि त्वा वृषभा सुते सुतँ सृजामि पीतये ।
१ २ २ ०७०७c तृम्पा व्यश्नुही मदम् ॥ १६१
१ २ २ ०७०८a य इन्द्र चमसेष्वा सोमश्चमूषु ते सुतः ।
१ २ २ ०७०८c पिबेदस्य त्वमीशिषे ॥ १६२
१ २ २ ०७०९a योगेयोगे तवस्तरं वाजेवाजे हवामहे ।

१ २ २ ०७०९c सखाय इन्द्रमूतये ॥ १६३
१ २ २ ०७१०a आ त्वेता नि षीदतेन्द्रमभि प्र गायत ।
१ २ २ ०७१०c सखायः स्तोमवाहसः ॥ १६४

१ २ २ ०८०१a इदँ ह्यन्वोजसा सुतँ राधानां पते ।
१ २ २ ०८०१c पिबा त्वा३स्य गिर्वणः ॥ १६५
१ २ २ ०८०२a महाँ इन्द्रः पुरश्च नो महित्वमस्तु वज्रिणे ।
१ २ २ ०८०२c द्यौर्न प्रथिना शवः ॥ १६६
१ २ २ ०८०३a आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभँ सं गृभाय ।
१ २ २ ०८०३c महाहस्ती दक्षिणेन ॥ १६७
१ २ २ ०८०४a अभि प्र गोपतिं गिरेन्द्रमर्च यथा विदे ।
१ २ २ ०८०४c सूनुँ सत्यस्य सत्पतिम् ॥ १६८
१ २ २ ०८०५a कया नश्चित्र आ भुवदूती सदावृधः सखा ।
१ २ २ ०८०५c कया शचिष्ठया वृता ॥ १६९
१ २ २ ०८०६a त्यमु वः सत्रासाहं विश्वासु गीर्ष्वायतम् ।
१ २ २ ०८०६c आ च्यावयस्यूतये ॥ १७०
१ २ २ ०८०७a सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् ।
१ २ २ ०८०७c सनिं मेधामयासिषम् ॥ १७१
१ २ २ ०८०८a ये ते पन्था अधो दिवो येभिर्व्यश्वमैरयः ।
१ २ २ ०८०८c उत श्रोषन्तु नो भुवः ॥ १७२
१ २ २ ०८०९a भद्रम्भद्रं न आ भरेषमूर्जँ शतक्रतो ।
१ २ २ ०८०९c यदिन्द्र मृडयासि नः ॥ १७३
१ २ २ ०८१०a अस्ति सोमो अयँ सुतः पिबन्त्यस्य मरुतः ।
१ २ २ ०८१०c उत स्वराजो अश्विना ॥ १७४

१ २ २ ०९०१a ईङ्खयन्तीरपस्युव इन्द्रं जातमुपासते ।
१ २ २ ०९०१c वन्वानासः सुवीर्यम् ॥ १७५
१ २ २ ०९०२a न कि देवा इनीमसि न क्या योपयामसि ।
१ २ २ ०९०२c मन्त्रश्रुत्यं चरामसि ॥ १७६
१ २ २ ०९०३a दोषो आगाद्बृहद्गाय द्युमद्गामन्नाथर्वण ।
१ २ २ ०९०३c स्तुहि देवँ सवितारम् ॥ १७७
१ २ २ ०९०४a एषो उषा अपूर्व्या व्युच्छति प्रिया दिवः ।
१ २ २ ०९०४c स्तुषे वामश्विना बृहत् ॥ १७८

१ २ २ ०९०५a इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः ।
१ २ २ ०९०५c जघान नवतीर्नव ॥ १७९
१ २ २ ०९०६a इन्द्रेहि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः ।
१ २ २ ०९०६c महाँ अभिष्टिरोजसा ॥ १८०
१ २ २ ०९०७a आ तू न इन्द्र वृत्रहन्नस्माकमर्धमा गहि ।
१ २ २ ०९०७c महान्महीभिरूतिभिः ॥ १८१
१ २ २ ०९०८a ओजस्तदस्य तित्विष उभे यत्समवर्तयत् ।
१ २ २ ०९०८c इन्द्रश्चर्मेव रोदसी ॥ १८२
१ २ २ ०९०९a अयमु ते समतसि कपोत इव गर्भधिम् ।
१ २ २ ०९०९c वचस्तच्चिन्न ओहसे ॥ १८३
१ २ २ ०९१०a वात आ वातु बेषजँ शम्भु मयोभु नो हृदे ।
१ २ २ ०९१०c प्र न अयूँषि तारिषत् ॥ १८४

१ २ २ १००१a यँ रक्षन्ति प्रचेतसो वरुणो मित्रो अर्यमा ।
१ २ २ १००१c न किः स दभ्यते जनः ॥ १८५
१ २ २ १००२a गव्यो षु णो यथा पुराश्वयोत रथया ।
१ २ २ १००२c वरिवस्या महोनाम् ॥ १८६
१ २ २ १००३a इमास्त इन्द्र पृश्नयो घृतं दुहत आशिरम् ।
१ २ २ १००३c एनामृतस्य पिप्युषीः ॥ १८७
१ २ २ १००४a अया धिया च गव्यया पुरुणामन्पुरुष्टुत ।
१ २ २ १००४c यत्सोमेसोम आभुवः ॥ १८८
१ २ २ १००५a पावका नः सरस्वती वाजेभिर्वाजिनीवती ।
१ २ २ १००५c यज्ञं वष्टु धियावसुः ॥ १८९
१ २ २ १००६a क इमं नाहुषीष्वा इन्द्रँ सोमस्य तर्पयात् ।
१ २ २ १००६c स नो वसून्या भरात् ॥ १९०
१ २ २ १००७a आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमम् ।
१ २ २ १००७c एदं बर्हिः सदो मम ॥ १९१
१ २ २ १००८a महि त्रीणामवरस्तु द्युक्षं मित्रस्यार्यम्णः ।
१ २ २ १००८c दुराधर्षं वरुणस्य ॥ १९२
१ २ २ १००९a त्वावतः पुरूवसो वयमिन्द्र प्रणेतः ।
१ २ २ १००९c स्मसि स्थातर्हरीणाम् ॥ १९३

तृतीय प्रपाठकः । प्रथमोऽर्धः

१ ३ १ ०१०१a उत्त्वा मन्दन्तु सोमाः कृणुष्व राधो अद्रिवः ।
१ ३ १ ०१०१c अव ब्रह्मद्विषो जहि ॥ १९४
१ ३ १ ०१०२a गिर्वणः पाहि नः सुतं मधोर्धाराभिरज्यसे ।
१ ३ १ ०१०२c इन्द्र त्वादातमिद्यशः ॥ १९५
१ ३ १ ०१०३a सदा व इन्द्रश्चर्कृषदा उपो नु स सपर्यन् ।
१ ३ १ ०१०३c न देवो वृतः शूर इन्द्रः ॥ १९६
१ ३ १ ०१०४a आ त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः ।
१ ३ १ ०१०४c न त्वामिन्द्राति रिच्यते ॥ १९७
१ ३ १ ०१०५a इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः ।
१ ३ १ ०१०५c इन्द्रं वाणीरनूषत ॥ १९८
१ ३ १ ०१०६a इन्द्र इषे ददातु न ऋभुक्षणमृभुँ रयिम् ।
१ ३ १ ०१०६c वाजी ददातु वाजिनम् ॥ १९९
१ ३ १ ०१०७a इन्द्रो अङ्ग महद्भयमभी षदप चुच्यवत् ।
१ ३ १ ०१०७c स हि स्थिरो विचर्षणिः ॥ २००
१ ३ १ ०१०८c इमा उ त्वा सुतेसुते नक्षन्ते गिर्वणो गिरः ।
१ ३ १ ०१०८a गावो वत्सं न धेनवः ॥ २०१
१ ३ १ ०१०९a इन्द्रा नु पूषणा वयँ सख्याय स्वस्तये ।
१ ३ १ ०१०९c हुवेम वाजसातये ॥ २०२
१ ३ १ ०११०a न कि इन्द्र त्वदुत्तरं न ज्यायो अस्ति वृत्रहन् ।
१ ३ १ ०११०c न क्येवं यथा त्वम् ॥ २०३

१ ३ १ ०२०१a तरणिं वो जनानां त्रदं वाजस्य गोमतः ।
१ ३ १ ०२०१c समानमु प्र शँसिषम् ॥ २०४
१ ३ १ ०२०२a असृग्रमिन्द्र ते गिरः प्रति त्वामुदहासत ।
१ ३ १ ०२०२c सजोषा वृषभं पतिम् ॥ २०५
१ ३ १ ०२०३a सुनीथो घा स मर्त्यो यं मरुतो यमर्यमा ।
१ ३ १ ०२०३c मित्रास्पान्त्यद्रुहः ॥ २०६
१ ३ १ ०२०४a यद्वीडाविन्द्र यत्स्थिरे यत्पर्शाने पराभृतम् ।
१ ३ १ ०२०४c वसु स्पार्हं तदा भर ॥ २०७
१ ३ १ ०२०५a श्रुतं वो वृत्रहन्तमं प्र शर्धं चर्षणीनाम् ।
१ ३ १ ०२०५c आशिषे राधसे महे ॥ २०८
१ ३ १ ०२०६a अरं त इन्द्र श्रवसे गमेम शूर त्वावतः ।

१ ३ १ ०२०६c अरँ शक्र परेमणि ॥ २०९
१ ३ १ ०२०७a धानावन्तं करम्भिणमपूपवन्तमुक्थिनम् ।
१ ३ १ ०२०७c इन्द्र प्रातर्जुषस्व नः ॥ २१०
१ ३ १ ०२०८a अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयः ।
१ ३ १ ०२०८c विश्वा यदजय स्पृधः ॥ २११
१ ३ १ ०२०९a इमे त इन्द्र सोमाः सुतासो ये च सोत्वाः ।
१ ३ १ ०२०९c तेषां मत्स्व प्रभूवसो ॥ २१२
१ ३ १ ०२१०a तुभ्यँ सुतासः सोमाः स्तीर्णं बर्हिर्विभावसो ।
१ ३ १ ०२१०c स्तोतृभ्य इन्द्र मृडय ॥ २१३

१ ३ १ ०३०१a आ व इन्द्र कृविं यथा वाजयन्तः शतक्रतुम् ।
१ ३ १ ०३०१c मँहिष्ठँ सिश्च इन्दुभिः ॥ २१४
१ ३ १ ०३०२a अतश्चिदिन्द्र न उपा याहि शतवाजया ।
१ ३ १ ०३०२c इषा सहस्रवाजया ॥ २१५
१ ३ १ ०३०३a आ बुन्दं वृत्रहा ददे जातः पृच्छद्वि मातरम् ।
१ ३ १ ०३०३c क उग्राः के ह शृण्विरे ॥ २१६
१ ३ १ ०३०४a बृबदुक्थँ हवामहे सृप्रकरस्नमूतये ।
१ ३ १ ०३०४c साधः कृण्वन्तमवसे ॥ २१७
१ ३ १ ०३०५a ऋजुनीती नो वरुणो मित्रो नयति विद्वान् ।
१ ३ १ ०३०५c अर्यमा देवैः सजोषाः ॥ २१८
१ ३ १ ०३०६a दूरादिहेव यत्सतोऽरुणप्सुरशिश्वितत् ।
१ ३ १ ०३०६c वि भानुं विश्वथातनत् ॥ २१९
१ ३ १ ०३०७a आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम् ।
१ ३ १ ०३०७c मध्वा रजाँसि सुक्रतू ॥ २२०
१ ३ १ ०३०८a उदु त्ये सूनवो गिरः काष्ठा यज्ञेष्वत्नत ।
१ ३ १ ०३०८c वाश्रा अभिज्ञु यातवे ॥ २२१
१ ३ १ ०३०९a इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम् ।
१ ३ १ ०३०९c समूढमस्य पाँसुले ॥ २२२

१ ३ १ ०४०१a अतीहि मन्युषाविणँ सुषुवाँसमुपेरय ।
१ ३ १ ०४०१c अस्य रातौ सुतं पिब ॥ २२३
१ ३ १ ०४०२a कदु प्रचेतसे महे वचो देवाय शस्यते ।
१ ३ १ ०४०२c तदिध्यस्य वर्धनम् ॥ २२४

१ ३ १ ०४०३a उक्थं च न शस्यमानं नागो रयिरा चिकेत ।
१ ३ १ ०४०३c न गायत्रं गीयमानम् ॥ २२५
१ ३ १ ०४०४a इन्द्र उक्थेभिर्मन्दिष्ठो वाजानां च वाजपतिः ।
१ ३ १ ०४०४c हरिवान्त्सुतानाँ सखा ॥ २२६
१ ३ १ ०४०५a आ याह्युप नः सुतं वाजेभिर्मा हृणीयथाः ।
१ ३ १ ०४०५c महाँ इव युवजानिः ॥ २२७
१ ३ १ ०४०६a कदा वसो स्तोत्रँ हर्यत आ अव श्मशा रुधद्वाः ।
१ ३ १ ०४०६c दीर्घँ सुतम् वाताप्याय ॥ २२८
१ ३ १ ०४०७a ब्राह्मणादिन्द्र राधसः पिबा सोममृतूँ रनु ।
१ ३ १ ०४०७c तवेदँ सख्यमस्तृतम् ॥ २२९
१ ३ १ ०४०८a वयं घा ते अपि स्मसि स्तोतार इन्द्र गिर्वणः ।
१ ३ १ ०४०८c त्वं नो जिन्व सोमपाः ॥ २३०
१ ३ १ ०४०९a एन्द्र पृक्षु कासु चिन्नृम्णं तनूषु धेहि नः ।
१ ३ १ ०४०९c सत्राजिदुग्र पौँस्यम् ॥ २३१
१ ३ १ ०४१०a एवा ह्यसि वीरयुरेवा शूर उत स्थिरः ।
१ ३ १ ०४१०c एवा ते राध्यं मनः ॥ २३२

१ ३ १ ०५०१a अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः ।
१ ३ १ ०५०१c ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥ २३३
१ ३ १ ०५०२a त्वामिद्धि हवामहे सातौ वाजस्य कार्वः ।
१ ३ १ ०५०२c त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥ २३४
१ ३ १ ०५०३a अभि प्र वः सुराधसमिन्द्रमर्च यथा विदे ।
१ ३ १ ०५०३c यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति ॥ २३५
१ ३ १ ०५०४a तं वो दस्ममृतीषहं वसोर्मन्दानमन्धसः ।
१ ३ १ ०५०४c अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर्नवामहे ॥ २३६
१ ३ १ ०५०५a तरोभिर्वो विदद्वसुमिन्द्रँ सबाध ऊतये ।
१ ३ १ ०५०५c बृहद्गायन्तः सुतसोमे अध्वरे हुवे भरं न कारिणम् ॥ २३७
१ ३ १ ०५०६a तरणिरित्सिषासति वाजं पुरन्ध्या युजा ।
१ ३ १ ०५०६c आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्रुवम् ॥ २३८
१ ३ १ ०५०७a पिबा सुतस्य रसिनो मत्स्वा न इन्द्र गोमतः ।
१ ३ १ ०५०७c आपिर्नो बोधि सधमाद्ये वृधे३ऽस्माँ अवन्तु ते धियः ॥ २३९
१ ३ १ ०५०८a त्वँ ह्येहि चेरवे विदा भगं वसुत्तये ।

१ ३ १ ०५०८c उद्वावृषस्व मघवन्गविष्टय उदिन्द्राश्वमिष्टये ॥ २४०
१ ३ १ ०५०९a न हि वश्चरमं च न वसिष्ठः परिमँस्ते ।
१ ३ १ ०५०९c अस्माकमद्य मरुतः सुते सचा विश्वे पिबन्तु कामिनः ॥ २४१
१ ३ १ ०५१०a मा चिदन्यद्वि शँसत सखायो मा रिषण्यत ।
१ ३ १ ०५१०c इन्द्रमित्स्तोता वृषणँ सचा सुते मुहुरुक्था च शँसत ॥ २४२

तृतीय प्रपाठकः । द्वितीयोऽर्धः

१ ३ १ ०६०१a न किष्टं कर्मणा नशद्यश्चकार सदावृधम् ।
१ ३ १ ०६०१c इन्द्रं न यज्ञैर्विश्वगूर्तमृभ्वसमधृष्टं धृष्णुमोजसा ॥ २४३
१ ३ २ ०६०२a य ऋते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः ।
१ ३ २ ०६०२c सन्धाता सन्धिं मघवा पुरूवसुर्निष्कर्ता विह्रुतं पुनः ॥ २४४
१ ३ २ ०६०३a आ त्वा सहस्रमा शतं युक्ता रथे हिरण्यये ।
१ ३ २ ०६०३c ब्रह्मयुजो हरय इन्द्र केशिनो वहन्तु सोमपीतये ॥ २४५
१ ३ २ ०६०४a आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः ।
१ ३ २ ०६०४c मा त्वा के चिन्नि येमुरिन्न पाशिनोऽति धन्वेव ताँ इहि ॥ २४६
१ ३ २ ०६०५a त्वमङ्ग प्र शँसिषो देवः शविष्ठ मर्त्यम् ।
१ ३ २ ०६०५c न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः ॥ २४७
१ ३ २ ०६०६a त्वमिन्द्र यशा अस्यृजीषी शवसस्पतिः ।
१ ३ २ ०६०६c त्वं वृत्राणि हँस्यप्रतीन्येक इत्पुर्वनुत्तश्चर्षणीधृतिः ॥ २४८
१ ३ २ ०६०७a इन्द्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे ।
१ ३ २ ०६०७c इन्द्रँ समीके वनिनो हवामह इन्द्रं धनस्य सातये ॥ २४९
१ ३ २ ०६०८a इमा उ त्वा पुरूवसो गिरो वर्धन्तु या मम ।
१ ३ २ ०६०८c पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत ॥ २५०
१ ३ २ ०६०९a उदु त्ये मधुमत्तमा गिर स्तोमास ईरते ।
१ ३ २ ०६०९c सत्राजितो धनसा अक्षितोतयो वाजयन्तो रथा इव ॥ २५१
१ ३ २ ०६१०a यथा गौरो अपा कृतं तृष्यन्नेत्यवेरिणम् ।
१ ३ २ ०६१०c आपित्वे नः प्रपित्वे तूयमा गहि कण्वेषु सु सचा पिब ॥ २५२

१ ३ २ ०७०१a शग्ध्यू३षु शचीपत इन्द्र विश्वाभिरूतिभिः ।
१ ३ २ ०७०१c भगं न हि त्वा यशसं वसुविदमनु शूर चरामसि ॥ २५३
१ ३ २ ०७०२a या इन्द्र भुज आभरः स्ववाँ असुरेभ्यः ।
१ ३ २ ०७०२c स्तोतारमिन्मघवन्नस्य वर्धय ये च त्वे वृक्तबर्हिषः ॥ २५४
१ ३ २ ०७०३a प्र मित्राय प्रार्यम्णे सचथ्यमृतावसो ।

१ ३ २ ०७०३c वरूथ्येऽ३ वरुणे छन्द्यं वचः स्तोत्रँ राजसु गायत ॥ २५५
१ ३ २ ०७०४a अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः ।
१ ३ २ ०७०४c समीचीनास ऋभवः समस्वरन्रुद्रा गृणन्त पूर्व्यम् ॥ २५६
१ ३ २ ०७०५a प्र व इन्द्राय बृहते मरुतो ब्रह्मार्चत ।
१ ३ २ ०७०५c वृत्रँ हनति वृत्रहा शतक्रतुर्वज्रेण शतपर्वणा ॥ २५७
१ ३ २ ०७०६a बृहदिन्द्राय गायत मरुतो वृत्रहन्तमम् ।
१ ३ २ ०७०६c येन ज्योतिरजनयन्नृतावृधो देवं देवाय जागृवि ॥ २५८
१ ३ २ ०७०७a इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।
१ ३ २ ०७०७c शिक्षा णो अस्मिन्पुरुहूत यामनि जीवा ज्योतिरशीमहि ॥ २५९
१ ३ २ ०७०८a मा न इन्द्र परा वृणग्भवा नः सधमाद्ये ।
१ ३ २ ०७०८c त्वं न ऊती त्वमिन्न आप्यम् मा न इन्द्र परा वृणक् ॥ २६०
१ ३ २ ०७०९a वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः ।
१ ३ २ ०७०९c पवित्रस्य प्रस्रवणेषु वृत्रहन्परि स्तोतार आसते ॥ २६१
१ ३ २ ०७१०a यदिन्द्र नाहुषीष्वा ओजो नृम्णं च कृष्टिषु ।
१ ३ २ ०७१०c यद्वा पञ्च क्षितीनां द्युम्नमा भर सत्रा विश्वानि पौँस्या ॥ २६२

१ ३ २ ०८०१a सत्यमित्था वृषेदसि वृषजूतिर्नोऽविता ।
१ ३ २ ०८०१c वृषा ह्युग्र शृण्विषे परावति वृषो अर्वावति श्रुतः ॥ २६३
१ ३ २ ०८०२a यच्छक्रासि परावति यदर्वावति वृत्रहन् ।
१ ३ २ ०८०२c अतस्त्वा गीर्भिर्द्युगदिन्द्र केशिभिः सुतावाँ आ विवासति ॥ २६४
१ ३ २ ०८०३a अभि वो वीरमन्धसो मदेषु गाय गिरा महा विचेतसम् ।
१ ३ २ ०८०३c इन्द्रं नाम श्रुत्यँ शाकिनं वचो यथा ॥ २६५
१ ३ २ ०८०४a इन्द्र त्रिधातु शरणं त्रिवरूथँ स्वस्तये ।
१ ३ २ ०८०४c छर्दिर्यच्छ मघवद्भ्यश्च मह्यं च यावया दिद्युमेभ्यः ॥ २६६
१ ३ २ ०८०५a श्रायन्त इव सूर्यं विश्वेदिन्द्रस्य भक्षत ।
१ ३ २ ०८०५c वसूनि जातो जनिमान्योजसा प्रति भागं न दीधिमः ॥ २६७
१ ३ २ ०८०६a न सीमदेव आप तदिषं दीर्घायो मर्त्यः ।
१ ३ २ ०८०६c एतग्वा चिद्या एतशो युयोजत इन्द्रो हरी युयोजते ॥ २६८
१ ३ २ ०८०७a आ नो विश्वासु हव्यमिन्द्रँ समत्सु भूषत ।
१ ३ २ ०८०७c उप ब्रह्माणि सवनानि वृत्रहन्परमज्या ऋचीषम ॥ २६९
१ ३ २ ०८०८a तवेदिन्द्रावमं वसु त्वं पुष्यसि मध्यमम् ।
१ ३ २ ०८०८c सत्रा विश्वस्य परमस्य राजसि न किष्ट्वा गोषु वृण्वते ॥ २७०

१ ३ २ ०८०९a क्वेयथ क्वेदसि पुरुत्रा चिद्धि ते मनः ।
१ ३ २ ०८०९c अलर्षि युध्म खजकृत्पुरन्दर प्र गायत्रा अगासिषुः ॥ २७१
१ ३ २ ०८१०a वयमेनमिदा ह्योपीपेमेह वज्रिणम् ।
१ ३ २ ०८१०c तस्मा उ अद्य सवने सुतं भरा नूनं भूषत श्रुते ॥ २७२

१ ३ २ ०९०१a यो राजा चर्षणीनां याता रथेभिरध्रिगुः ।
१ ३ २ ०९०१c विश्वासां तरुता पृतनानां ज्येष्ठं यो वृत्रहा गृणे ॥ २७३
१ ३ २ ०९०२a यत इन्द्र भयामहे ततो नो अभयं कृधि ।
१ ३ २ ०९०२c मघवञ्छग्धि तव तन्न ऊतये वि द्विषो वि मृधो जहि ॥ २७४
१ ३ २ ०९०३a वास्तोष्पते ध्रुवा स्थूणाँ सत्रँ सोम्यानाम् ।
१ ३ २ ०९०३c द्रप्सः पुरां भेत्ता शश्वतीनामिन्द्रो मुनीनाँ सखा ॥ २७५
१ ३ २ ०९०४a बण्महाँ असि सूर्य बडादित्य महाँ असि ।
१ ३ २ ०९०४c महस्ते सतो महिमा पनिष्टम मह्ना देव महाँ असि ॥ २७६
१ ३ २ ०९०५a अश्वी रथी सुरूप इद्गोमाँ यदिन्द्र ते सखा ।
१ ३ २ ०९०५c श्वात्रभाजा वयसा सचते सदा चन्द्रैर्याति सभामुप ॥ २७७
१ ३ २ ०९०६a यद्द्याव इन्द्र ते शतँ शतं भूमीरुत स्युः ।
१ ३ २ ०९०६c न त्वा वज्रिन्त्सहस्रँ सूर्या अनु न जातमष्ट रोदसी ॥ २७८
१ ३ २ ०९०७a यदिन्द्र प्रागपागुदग्न्यग्वा हूयसे नृभिः ।
१ ३ २ ०९०७c सिमा पुरू नृषूतो अस्यानवेऽसि प्रशर्ध तुर्वशे ॥ २७९
१ ३ २ ०९०८a कस्तमिन्द्र त्वा वसवा मर्त्यो दधर्षति ।
१ ३ २ ०९०८c श्रद्धा हि ते मघवन्पार्ये दिवि वाजी वाजँ सिषासति ॥ २८०
१ ३ २ ०९०९a इन्द्राग्नी अपादियं पूर्वागात्पद्वतीभ्यः ।
१ ३ २ ०९०९c हित्वा शिरो जिह्वया रारपच्चरत्रिँशत्पदा न्यक्रमीत् ॥ २८१
१ ३ २ ०९१०a इन्द्र नेदीय एदिहि मितमेधाभिरूतिभिः ।
१ ३ २ ०९१०c आ शं तम शं तमाभिरभिष्टिभिरा स्वापे स्वापिभिः ॥ २८२

१ ३ २ १००१a इत ऊती वो अजरं प्रहेतारमप्रहितम् ।
१ ३ २ १००१c आशुं जेतारँ हेतारँ रथीतममतूर्तं तुग्रियावृधम् ॥ २८३
१ ३ २ १००२a मो षु त्वा वाघतश्च नारे अस्मन्नि रीरमन् ।
१ ३ २ १००२c आरात्ताद्वा सधमादं न आ गहीह वा सन्नुप श्रुधि ॥ २८४
१ ३ २ १००३a सुनोत सोमपाव्ने सोममिन्द्राय वज्रिणे ।
१ ३ २ १००३c पचता पक्तीरवसे कृणुध्वमित्पृणन्नित्पृणते मयः ॥ २८५
१ ३ २ १००४a यः सत्राहा विचर्षणिरिन्द्रं तँ हूमहे वयम् ।

१ ३ २ १००४c सहस्रमन्यो तुविनृम्ण सत्पते भवा समत्सु नो वृधे ॥ २८६
१ ३ २ १००५a शचीभिर्नः शचीवसू दिवानक्तं दिशस्यतम् ।
१ ३ २ १००५c मा वाँ रातिरुप दसत्कदा च नास्मद्रातिः कदा च न ॥ २८७
१ ३ २ १००६a यदा कदा च मीढुषे स्तोता जरेत मर्त्यः ।
१ ३ २ १००६c आदिद्वन्देत वरुणं विपा गिरा धर्त्तारं विव्रतानाम् ॥ २८८
१ ३ २ १००७a पाहि गा अन्धसो मद इन्द्राय मेध्यातिथे ।
१ ३ २ १००७c यः सम्मिश्लो हर्योर्यो हिरण्यय इन्द्रो वज्री हिरण्ययः ॥ २८९
१ ३ २ १००८a उभयँ शृणवच्च न इन्द्रो अर्वागिदं वचः ।
१ ३ २ १००८c सत्राच्या मघवान्त्सोमपीतये धिया शविष्ठ आ गमत् ॥ २९०
१ ३ २ १००९a महे च न त्वाद्रिवः परा शुल्काय दीयसे ।
१ ३ २ १००९c न सहस्राय नायुताये वज्रिवो न शताय शतामघ ॥ २९१
१ ३ २ १०१०a वस्याँ इन्द्रासि मे पितुरुत भ्रातुरभुञ्जतः ।
१ ३ २ १०१०c माता च मे छदयथः समा वसो वसुत्वनाय राधसे ॥ २९२

चतुर्थ प्रपाठकः । प्रथमोऽर्धः

१ ४ १ ०१०१a इम इन्द्राय सुन्विरे सोमासो दध्याशिरः ।
१ ४ १ ०१०१c ताँ आ मदाय वज्रहस्त पीतये हरिभ्यां याह्योक आ ॥ २९३
१ ४ १ ०१०२a इम इन्द्र मदाय ते सोमाश्चिकित्र उकिथनः ।
१ ४ १ ०१०२c मधोः पपान उप नो गिरः शृणु रास्व स्तोत्राय गिर्वणः ॥ २९४
१ ४ १ ०१०३a आ त्वा३द्य सबर्दुघाँ हुवे गायत्रवेपसम् ।
१ ४ १ ०१०३c इन्द्रं धेनुँ सुदुघामन्यामिषमुरुधारामरङ्कृतम् ॥ २९५
१ ४ १ ०१०४a न त्वा बृहन्तो अद्रयो वरन्त इन्द्र वीडवः ।
१ ४ १ ०१०४c यच्छिक्षसि स्तुवते मावते वसु न किष्टदा मिनाति ते ॥ २९६
१ ४ १ ०१०५a क ईं वेद सुते सचा पिबन्तं कद्वयो दधे ।
१ ४ १ ०१०५c अयं यः पुरो विभिनत्योजसा मन्दानः शिप्र्यन्धसः ॥ २९७
१ ४ १ ०१०६a यदिन्द्र शासो अव्रतं च्यावया सदसस्परि ।
१ ४ १ ०१०६c अस्माकमँशुं मघवन्पुरुस्पृहं वसव्ये अधि बर्हय ॥ २९८
१ ४ १ ०१०७a त्वष्टा नो दैव्यं वचः पर्जन्यो ब्रह्मणस्पतिः ।
१ ४ १ ०१०७c पुत्रैर्भ्रातृभिरदितिर्नु पातु नो दुष्टरं त्रामणं वचः ॥ २९९
१ ४ १ ०१०८a कदा च न स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
१ ४ १ ०१०८c उपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यते ॥ ३००
१ ४ १ ०१०९a युङ्क्ष्वा हि वृत्रहन्तम हरी इन्द्र परावतः ।

१ ४ १ ०१०९c अर्वाचीनो मघवन्त्सोमपीतय उग्र ऋष्वेभिरा गहि ॥ ३०१
१ ४ १ ०११०a त्वामिदा ह्यो नरोऽपीप्यन्वज्रिन्भूर्णयः ।
१ ४ १ ०११०c स इन्द्र स्तोमवाहस इह श्रुध्युप स्वसरमा गहि ॥ ३०२

१ ४ १ ०२०१a प्रत्यु अदर्श्यायत्यू३च्छन्ती दुहिता दिवः ।
१ ४ १ ०२०१c अपो मही वृणुते चक्षुषा तमो ज्योतिष्कृणोति सूनरि ॥ ३०३
१ ४ १ ०२०२a इमा उ वां दिविष्टय उस्रा हवन्ते अश्विना ।
१ ४ १ ०२०२c अयं वामह्वेऽवसे शचीवसू विशंविशँ हि गच्छथः ॥ ३०४
१ ४ १ ०२०३a कु ष्ठः को वामश्विना तपानो देवा मर्त्यः ।
१ ४ १ ०२०३c घ्नता वामश्मया क्षपमाणौँशुनेत्थमु आदुन्यथा ॥ ३०५
१ ४ १ ०२०४a अयं वां मधुमत्तमः सुतः सोमो दिविष्टिषु ।
१ ४ १ ०२०४c तमश्विना पिबतं तिरो अह्न्यं धत्तँ रत्नानि दाशुषे ॥ ३०६
१ ४ १ ०२०५a आ त्वा सोमस्य गल्दया सदा याचन्नहं ज्या ।
१ ४ १ ०२०५c भूर्णिं मृगं न सवनेषु चुक्रुधं क ईशानं न याचिषत् ॥ ३०७
१ ४ १ ०२०६a अध्वर्यो द्रावया त्वँ सोममिन्द्रः पिपासति ।
१ ४ १ ०२०६c उपो नूनं युयुजे वृष्णा हरी आ च जगाम वृत्रहा ॥ ३०८
१ ४ १ ०२०७a अभी षतस्तदा भरेन्द्र ज्यायः कनीयसः ।
१ ४ १ ०२०७c पुरूवसुर्हि मघवन्बभूविथ भरेभरे च हव्यः ॥ ३०९
१ ४ १ ०२०८a यदिन्द्र यावतस्त्वमेतावदहमीशीय ।
१ ४ १ ०२०८c स्तोतारमिद्दधिषे रदावसो न पापत्वाय रँसिषम् ॥ ३१०
१ ४ १ ०२०९a त्वमिन्द्र प्रतूर्तिष्वभि विश्वा असि स्पृधः ।
१ ४ १ ०२०९c अशस्तिहा जनिता वृत्रतूरसि त्वं तूर्य तरुष्यतः ॥ ३११
१ ४ १ ०२१०a प्र यो रिरिक्ष ओजसा दिवः सदोभ्यस्परि ।
१ ४ १ ०२१०c न त्वा विव्याच रज इन्द्र पार्थिवमति विश्वं ववक्षिथ ॥ ३१२

१ ४ १ ०३०१a असावि देवं गोऋजीकमन्धो न्यस्मिन्निन्द्रो जनुषेमुवोच ।
१ ४ १ ०३०१c बोधामसि त्वा हर्यश्व यज्ञैर्बोधा न स्तोममन्धसो मदेषु ॥ ३१३
१ ४ १ ०३०२a योनिष्ट इन्द्र सदने अकारि तमा नृभिः पुरूहूत प्र याहि ।
१ ४ १ ०३०२c असो यथा नोऽविता वृधश्चिद्ददो वसूनि ममदश्च सोमैः ॥ ३१४
१ ४ १ ०३०३a अदर्दरुत्समसृजो वि खानि त्वमर्णवान्बद्बधानाँ अरम्णाः ।
१ ४ १ ०३०३c महान्तमिन्द्र पर्वतं वि यद्वः सृजद्धारा अव यद्दानवान्हन् ॥ ३१५
१ ४ १ ०३०४a सुष्वाणास इन्द्र स्तुमसि त्वा सनिष्यन्तश्चित्तुविनृम्ण वाजम् ।
१ ४ १ ०३०४c आ नो भर सुवितं यस्य कोना तना त्मना सह्यामा त्वोताः ॥ ३१६

१ ४ १ ०३०५a जगृह्मा ते दक्षिणमिन्द्र हस्तं वसूयवो वसुपते वसूनाम् ।
१ ४ १ ०३०५c विद्मा हि त्वा गोपतिँ शूर गोनामस्मभ्यं चित्रं वृषणँ रयिन्दाः ॥ ३१७
१ ४ १ ०३०६a इन्द्रं नरो नेमधिता हवन्ति यत्पार्या युनजते धियस्ताः ।
१ ४ १ ०३०६c शूरो नृषाता श्रवसश्च काम आ गोमति व्रजे भजा त्वं नः ॥ ३१८
१ ४ १ ०३०७a वयः सुपर्णा उप सेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः ।
१ ४ १ ०३०७c अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्या३स्मान्निधयेव बद्धान् ॥ ३१९
१ ४ १ ०३०८a नाके सुपर्णमुप यत्पतन्तँ हृदा वेनन्तो अभ्यचक्षत त्वा ।
१ ४ १ ०३०८c हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम् ॥ ३२०
१ ४ १ ०३०९a ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः ।
१ ४ १ ०३०९c स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥ ३२१
१ ४ १ ०३१०a अपूर्व्या पुरुतमान्यस्मै महे वीराय तवसे तुराय ।
१ ४ १ ०३१०c विरप्शिने वज्रिणे शन्तमानि वचाँस्यास्मै स्थविराय तक्षुः ॥ ३२२

१ ४ १ ०४०१a अव द्रप्सो अँशुमतीमतिष्ठदीयानः कृष्णो दशभिः सहस्रैः ।
१ ४ १ ०४०१c आवत्तमिन्द्रः शच्या धमन्तमप स्नीहितिं नृमणा अधद्राः ॥ ३२३
१ ४ १ ०४०२a वृत्रस्य त्वा श्वसथादीषमाणा विश्वे देवा अजहुर्ये सखायः ।
१ ४ १ ०४०२c मरुद्भिरिन्द्र सख्यं ते अस्त्वथेमा विश्वाः पृतना जयासि ॥ ३२४
१ ४ १ ०४०३a विधुं दद्राणँ समने बहूनाँ युवानँ सन्तं पलितो जगार ।
१ ४ १ ०४०३c देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान ॥ ३२५
१ ४ १ ०४०४a त्वँ ह त्यत्सप्तभ्यो जायमानोऽशत्रुभ्यो अभवः शत्रुरिन्द्र ।
१ ४ १ ०४०४c गूढे द्यावापृथिवी अन्वविन्दो विभुमद्भ्यो भुवनेभ्यो रणं धाः ॥ ३२६
१ ४ १ ०४०५a मेडिं न त्वा वज्रिणं भृष्टिमन्तं पुरुधस्मानं वृषभँ स्थिरप्स्नुम् ।
१ ४ १ ०४०५c करोष्यर्यस्तरुषीर्दुवस्युरिन्द्र द्युक्षं वृत्रहणं गृणीषे ॥ ३२७
१ ४ १ ०४०६a प्र वो महे महेवृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वम् ।
१ ४ १ ०४०६a विशः पूर्वीः प्र चर चर्षणिप्राः ॥ ३२८
१ ४ १ ०४०७a शुनँ हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
१ ४ १ ०४०७c शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि सञ्जितं धनानि ॥ ३२९
१ ४ १ ०४०८a उदु ब्रह्माण्यैरत श्रवस्येन्द्रँ समर्ये महया वसिष्ठ ।
१ ४ १ ०४०८c आ यो विश्वानि श्रवसा ततानोपश्रोता म ईवतो वचाँसि ॥ ३३०
१ ४ १ ०४०९a चक्रं यदस्याप्स्वा निषत्तमुतो तदस्मै मध्विच्चच्छद्यात् ।
१ ४ १ ०४०९c पृथिव्यामतिषितं यदूधः पयो गोष्वदधा ओषधीषु ॥ ३३१

१ ४ १ ०५०१a त्यमू षु वाजिनं देवजूतँ सहोवानं तरुतारँ रथानाम् ।
१ ४ १ ०५०१c अरिष्टनेमिं पृतनाजमाशुँ स्वस्तये तार्क्ष्यमिहा हुवेम ॥ ३३२
१ ४ १ ०५०२a त्रातारमिन्द्रमवितारमिन्द्रँ हवेहवे सुहवँ शूरमिन्द्रम् ।
१ ४ १ ०५०२c हुवे नु शक्रं पुरुहूतमिन्द्रमिदँ हविर्मघवा वेत्विन्द्रः ॥ ३३३
१ ४ १ ०५०३a यजामह इन्द्रं वज्रदक्षिणँ हरीणाँ रथ्यꣳ विव्रतानाम् ।
१ ४ १ ०५०३c प्र श्मश्रुभिर्दोधुवदूर्ध्वधा भुवद्वि सेनाभिर्भयमानो वि राधसा ॥ ३३४
१ ४ १ ०५०४a सत्राहणं दाधृषिं तुम्रमिन्द्रं महामपारं वृशभँ सुवज्रम् ।
१ ४ १ ०५०४c हन्ता यो वृत्रँ सनितोत वाजं दाता मघानि मघवा सुराधाः ॥ ३३५
१ ४ १ ०५०५a यो नो वनुष्यन्नभिदाति मर्त उगणा वा मन्यमानस्तुरो वा ।
१ ४ १ ०५०५c क्षिधी युधा शवसा वा तमिन्द्राभी ष्याम वृषमणस्त्वोताः ॥ ३३६
१ ४ १ ०५०६a यं वृत्रेषु क्षितय स्पर्धमाना यं युक्तेषु तुरयन्तो हवन्ते ।
१ ४ १ ०५०६c यँ शूरसातौ यमपामुपज्मन्यं विप्रासो वाजयन्ते स इन्द्रः ॥ ३३७
१ ४ १ ०५०७a इन्द्रापर्वता बृहता रथेन वामीरिष आ वहतँ सुवीराः ।
१ ४ १ ०५०७c वीतँ हव्यान्यध्वरेषु देवा वर्धेथां गीर्भीरिडया मदन्ता ॥ ३३८
१ ४ १ ०५०८a इन्द्राय गिरो अनिशितसर्गा अपः प्रैरयत्सगरस्य बुध्नात् ।
१ ४ १ ०५०८c यो अक्षेणेव चक्रियौ शचीभिर्विष्वक्तस्तम्भ पृथिवीमुत द्याम् ॥ ३३९
१ ४ १ ०५०९a आ त्वा सखायः सख्या ववृत्युस्तिरः पुरू चिदर्णवां जगम्याः ।
१ ४ १ ०५०९c पितुर्नपातमा दधित वेधा अस्मिन्क्षये प्रतरां दीद्यानः ॥ ३४०
१ ४ १ ०५१०a को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून् ।
१ ४ १ ०५१०c आसन्नेषामप्सुवाहो मयोभून्य एषां भृत्यामृणधत्स जीवात् ॥ ३४१

चतुर्थ प्रपाठकः । द्वितीयोऽर्धः

१ ४ २ ०६०१a गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः ।
१ ४ २ ०६०१c ब्रह्माणस्त्वा शतक्रत उद्वँशमिव येमिरे ॥ ३४२
१ ४ २ ०६०२a इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः ।
१ ४ २ ०६०२c रथीतमँ रथीनां वाजानाँ सत्पतिं पतिम् ॥ ३४३
१ ४ २ ०६०३a इममिन्द्र सुतं पिब ज्येष्ठममर्त्यं मदम् ।
१ ४ २ ०६०३c शुक्रस्य त्वाभ्यक्षरन्धारा ऋतस्य सादने ॥ ३४४
१ ४ २ ०६०४a यदिन्द्र चित्र म इह नास्ति त्वादातमद्रिवः ।
१ ४ २ ०६०४c राधस्तन्नो विदद्वस उभयाहस्त्या भर ॥ ३४५
१ ४ २ ०६०५a श्रुदी हवं तिरश्च्या इन्द्र यस्त्वा सपर्यति ।
१ ४ २ ०६०५c सुवीर्यस्य गोमतो रायस्पूर्धि महाँ असि ॥ ३४६

१ ४ २ ०६०६a असावि सोम इन्द्र ते शविष्ठ धृष्णवा गहि ।
१ ४ २ ०६०६c आ त्वा पृणक्त्विन्द्रियँ रजः सूर्यो न रश्मिभिः ॥ ३४७
१ ४ २ ०६०७a एन्द्र याहि हरिभिरुप कण्वस्य सुष्टुतिम् ।
१ ४ २ ०६०७c दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ ३४८
१ ४ २ ०६०८a आ त्वा गिरो रथीरिवास्थुः सुतेषु गिर्वणः ।
१ ४ २ ०६०८c अभि त्वा समनूषत गावो वत्सं न धेनवः ॥ ३४९
१ ४ २ ०६०९a एतो न्विन्द्रँ स्तवाम शुद्धँ शुद्धेन साम्ना ।
१ ४ २ ०६०९c शुद्धैरुक्थैर्वावृध्वाँसँ शुद्धैराशीर्वान्ममत्तु ॥ ३५०
१ ४ २ ०६१०a यो रयिं वो रयिन्तमो यो द्युम्नैर्द्युम्नवत्तमः ।
१ ४ २ ०६१०c सोमः सुतः स इन्द्र तेऽस्ति स्वधापते मदः ॥ ३५१

१ ४ २ ०७०१a प्रत्यस्मै पिपीषते विश्वानि विदुषे भर ।
१ ४ २ ०७०१c अरङ्गमाय जग्मयेऽपश्चादध्वने नरः ॥ ३५२
१ ४ २ ०७०२a आ नो वयोवयःशयं महान्तं गह्वरेष्ठां महान्तं पूर्विनेष्ठाम् ।
१ ४ २ ०७०२c उग्रं वचो अपावधीः ॥ ३५३
१ ४ २ ०७०३a आ त्वा रथं यथोतये सुम्नाय वर्तयामसि ।
१ ४ २ ०७०३c तुविकूर्मिमृतीषहमिन्द्रँ शविष्ठ सत्पतिम् ॥ ३५४
१ ४ २ ०७०४a स पूर्व्यो महोनां वेनः क्रतुभिरानजे ।
१ ४ २ ०७०४c यस्य द्वारा मनुः पिता देवेषु धिय आनजे ॥ ३५५
१ ४ २ ०७०५a यदी वहन्त्याशवो भ्राजमाना रथेष्वा ।
१ ४ २ ०७०५c पिबन्तो मदिरं मधु तत्र श्रवाँसि कृण्वते ॥ ३५६
१ ४ २ ०७०६a त्यमु वो अप्रहणं गृणीषे शवसस्पतिम् ।
१ ४ २ ०७०६c इन्द्रं विश्वासाहं नरँ शचिष्ठं विश्ववेदसम् ॥ ३५७
१ ४ २ ०७०७a दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।
१ ४ २ ०७०७c सुरभि नो मुखा करत्प्र न आयूँषि तारिषत् ॥ ३५८
१ ४ २ ०७०८a पुरां भिन्दुर्युवा कविरमितौजा अजायत ।
१ ४ २ ०७०८c इन्द्रो विश्वस्य कर्मणो धर्त्ता वज्री पुरुष्टुतः ॥ ३५९

१ ४ २ ०८०१a प्रप्र वस्त्रिष्टुभमिषं वन्दद्वीरायेन्दवे ।
१ ४ २ ०८०१c धिया वो मेधसातये पुरन्ध्या विवासति ॥ ३६०
१ ४ २ ०८०२a कश्यपस्य स्वर्विदो यावाहुः सयुजाविति ।
१ ४ २ ०८०२c ययोर्विश्वमपि व्रतं यज्ञं धीरा निचाय्य ॥ ३६१
१ ४ २ ०८०३a अर्चत प्रार्चता नरः प्रियमेधासो अर्चत ।

१ ४ २ ०८०३c अर्चन्तु पुत्रका उत पुरमिद्धृष्णवर्चत ॥ ३६२
१ ४ २ ०८०४a उक्थमिन्द्राय शँस्यं वर्धनं पुरुनिःषिधे ।
१ ४ २ ०८०४c शक्रो यथा सुतेषु नो रारणत्सख्येषु च ॥ ३६३
१ ४ २ ०८०५a विश्वानरस्य वस्पतिमनानतस्य शवसः ।
१ ४ २ ०८०५c एवैश्च चर्षणीनामूती हुवे रथानाम् ॥ ३६४
१ ४ २ ०८०६a स घा यस्ते दिवो नरो धिया मर्तस्य शमतः ।
१ ४ २ ०८०६c ऊती स बृहतो दिवो द्विषो अँहो न तरति ॥ ३६५
१ ४ २ ०८०७a विभोष्ट इन्द्र राधसो विभ्वी रातिः शतक्रतो ।
१ ४ २ ०८०७c अथा नो विश्वचर्षणे द्युम्नँ सुदत्र मँहय ॥ ३६६
१ ४ २ ०८०८a वयश्चित्ते पतत्रिणो द्विपाच्चतुष्पादर्जुनि ।
१ ४ २ ०८०८c उषः प्रारन्नृतूँरनु दिवो अन्तेभ्यस्परि ॥ ३६७
१ ४ २ ०८०९a अमी ये देवा स्थन मध्य आ रोचने दिवः ।
१ ४ २ ०८०९c कद्व ऋतं कदमृतं का प्रत्ना व आहुतिः ॥ ३६८
१ ४ २ ०८१०a ऋचँ साम यजामहे याभ्यां कर्माणि कृण्वते ।
१ ४ २ ०८१०c वि ते सदसि राजतो यज्ञं देवेषु वक्षतः ॥ ३६९

१ ४ २ ०९०१a विश्वाः पृतना अभिभूतरं नरः सजूस्ततक्षुरिन्द्रं जजनुश्च राजसे ।
१ ४ २ ०९०१c क्रत्वे वरे स्थेमन्यामुरीमुतोग्रमोजिष्ठं तरसं तरस्विनम् ॥ ३७०
१ ४ २ ०९०२a श्रत्ते दधामि प्रथमाय मन्यवेऽहन्यद्दस्युं नर्यं विवेरपः ।
१ ४ २ ०९०२c उभे यत्वा रोदसी धावतामनु भ्यसात्ते शुष्मात्पृथिवी चिदद्रिवः ॥ ३७१
१ ४ २ ०९०३a समेत विश्वा ओजसा पतिं दिवो य एक इद्भूरतिथिर्जनानाम्
१ ४ २ ०९०३c स पूर्व्यो नूतनमाजिगीषं तं वर्त्तनीरनु वावृत एक इत् ॥ ३७२
१ ४ २ ०९०४a इमे त इन्द्र ते वयं पुरुष्टुत ये त्वारभ्य चरामसि प्रभूवसो ।
१ ४ २ ०९०४c न हि त्वदन्यो गिर्वणो गिरः सघत्क्षोणीरिव प्रति तद्धर्य नो वचः ॥ ३७३
१ ४ २ ०९०५a चर्षणीधृतं मघवानमुक्थ्या३मिन्द्रं गिरो बृहतीरभ्यनूषत ।
१ ४ २ ०९०५c वावृधानं पुरुहूतँ सुवृक्तिभिरमर्त्यं जरमाणं दिवेदिवे ॥ ३७४
१ ४ २ ०९०६a अच्छा व इन्द्रं मतयः स्वर्युवः सध्रीचीर्विश्वा उशतीरनूषत ।
१ ४ २ ०९०६c परि ष्वजन्त जनयो यथा पतिं मर्यं न शुन्ध्युं मघवानमूतये ॥ ३७५
१ ४ २ ०९०७a अभि त्यं मेषं पुरुहूतमृग्मियमिन्द्रं गीर्भिर्मदता वस्वो अर्णवम् ।

१ ४ २ ०९०७c यस्य द्यावो न विचरन्ति मानुषं भुजे मँहिष्ठमभि विप्रमर्चत ॥ ३७६

१ ४ २ ०९०८a त्यँ सु मेषं महया स्वर्विदँ शतं यस्य सुभुवः साकमीरते ।
१ ४ २ ०९०८c अत्यं न वाजँ हवनस्यदँ रथमेन्द्रं ववृत्यामवसे सुवृक्तिभिः ॥ ३७७
१ ४ २ ०९०९a घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा ।
१ ४ २ ०९०९c द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा ॥ ३७८
१ ४ २ ०९१०a उभे यदिन्द्र रोदसी आपप्राथोषा इव ।
१ ४ २ ०९१०c महान्तं त्वा महीनाँ सम्राजं चर्षणीनाम् ।
१ ४ २ ०९१०e देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥ ३७९
१ ४ २ ०९११a प्र मन्दिने पितुमदर्चता वचो यः कृष्णगर्भा निरहन्नृजिश्वना ।
१ ४ २ ०९११c अवस्यवो वृषणं वज्रदक्षिणं मरुत्वन्तँ सख्याय हुवेमहि ॥ ३८०

१ ४ २ १००१a इन्द्र सुतेषु सोमेषु क्रतुं पुनीष उक्थ्यम् ।
१ ४ २ १००१c विदे वृधस्य दक्षस्य महाँ हि षः ॥ ३८१
१ ४ २ १००२a तमु अभि प्र गायत पुरुहूतं पुरुष्टुतम् ।
१ ४ २ १००२c इन्द्रं गीर्भिस्तविषमा विवासत ॥ ३८२
१ ४ २ १००३a तं ते मदं गृणीमसि वृषणं पृक्षु सासहिम् ।
१ ४ २ १००३c उ लोककृत्नुमद्रिवो हरिश्रियम् ॥ ३८३
१ ४ २ १००४a यत्सोममिन्द्र विष्णवि यद्वा घ त्रित आप्त्ये ।
१ ४ २ १००४c यद्वा मरुत्सु मन्दसे समिन्दुभिः ॥ ३८४
१ ४ २ १००५a एदु मधोर्मदिन्तरँ सिञ्चाध्वर्यो अन्धसः ।
१ ४ २ १००५c एवा हि वीरस्तवते सदावृधः ॥ ३८५
१ ४ २ १००६a एन्दुमिन्द्राय सिञ्चत पिबाति सोम्यं मधु ।
१ ४ २ १००६c प्र राधाँसि चोदयते महित्वना ॥ ३८६
१ ४ २ १००७a एतो न्विन्द्रँ स्तवाम सखायः स्तोम्यं नरम् ।
१ ४ २ १००७c कृष्टीर्यो विश्वा अभ्यस्त्येक इत् ॥ ३८७
१ ४ २ १००८a इन्द्राय साम गायत विप्राय बृहते बृहत् ।
१ ४ २ १००८c ब्रह्मकृते विपश्चिते पनस्यवे ॥ ३८८
१ ४ २ १००९a य एक इद्विदयते वसु मर्ताय दाशुषे ।
१ ४ २ १००९c ईशानो अप्रतिष्कुत इन्द्रो अङ्ग ॥ ३८९
१ ४ २ १०१०a सखाय आ शिषामहे ब्रह्मेन्द्राय वज्रिणे ।
१ ४ २ १०१०c स्तुष ऊ षु वो नृतमाय धृष्णवे ॥ ३९०

पञ्चम प्रपाठकः । प्रथमोऽर्धः

१ ५ १ ०१०१a गृणे तदिन्द्र ते शव उपमां देवतातये ।
१ ५ १ ०१०१c यद्धँसि वृत्रमोजसा शचीपते ॥ ३९१
१ ५ १ ०१०२a यस्य त्यच्छम्बरं मदे दिवोदासाय रन्धयन् ।
१ ५ १ ०१०२c अयँ स सोम इन्द्र ते सुतः पिब ॥ ३९२
१ ५ १ ०१०३a एन्द्र नो गधि प्रिय सत्राजिदगोह्य ।
१ ५ १ ०१०३c गिरिर्न विश्वतः पृथुः पतिर्दिवः ॥ ३९३
१ ५ १ ०१०४a य इन्द्र सोमपातमो मदः शविष्ठ चेतति ।
१ ५ १ ०१०४c येना हँसि न्या३त्रिणं तमीमहे ॥ ३९४
१ ५ १ ०१०५a तुचे तुनाय तत्सु नो द्राधीय आयुर्जीवसे ।
१ ५ १ ०१०५c आदित्यासः समहसः कृणोतन ॥ ३९५
१ ५ १ ०१०६a वेत्था हि निर्ऋतीनां वज्रहस्त परिवृजम् ।
१ ५ १ ०१०६c अहरहः शुन्ध्युः परिपदामिव ॥ ३९६
१ ५ १ ०१०७a अपामीवामप स्रिधमप सेधत दुर्मतिम् ।
१ ५ १ ०१०७c आदित्यासो युयोतना नो अँहसः ॥ ३९७
१ ५ १ ०१०८a पिबा सोममिन्द्र मन्दतु त्वा यं ते सुषाव हर्यश्वाद्रिः ।
१ ५ १ ०१०८c सोतुर्बाहुभ्याँ सुयतो नार्वा ॥ ३९८

१ ५ १ ०२०१a अभ्रातृव्यो अना त्वमनापिरिन्द्र जनुषा सनादसि ।
१ ५ १ ०२०१c युधेदापित्वमिच्छसे ॥ ३९९
१ ५ १ ०२०२a यो न इदमिदं पुरा प्र वस्य आनिनाय तमु व स्तुषे ।
१ ५ १ ०२०२c सखाय इन्द्रमूतये ॥ ४००
१ ५ १ ०२०३a आ गन्ता मा रिषण्यत प्रस्थावानो माप स्थात समन्यवः ।
१ ५ १ ०२०३c दृढा चिद्यमयिष्णवः ॥ ४०१
१ ५ १ ०२०४a आ याह्ययमिन्दवेऽश्वपते गोपत उर्वरापते ।
१ ५ १ ०२०४c सोमँ सोमपते पिब ॥ ४०२
१ ५ १ ०२०५a त्वया ह स्विद्युजा वयं प्रति श्वसन्तं वृषभ ब्रुवीमहि ।
१ ५ १ ०२०५c सँस्थे जनस्य गोमतः ॥ ४०३
१ ५ १ ०२०६a गावश्चिद्धा समन्यवः सजात्येन मरुतः सबन्धवः ।
१ ५ १ ०२०६c रिहते ककुभो मिथः ॥ ४०४
१ ५ १ ०२०७a त्वं न इन्द्रा भर ओजो नृम्णँ शतक्रतो विचर्षणे ।
१ ५ १ ०२०७c आ वीरं पृतनासहम् ॥ ४०५

१ ५ १ ०२०८a अधा हीन्द्र गिर्वण उप त्वा काम ईमहे ससृग्महे ।
१ ५ १ ०२०८c उदेव ग्मन्त उदभिः ॥ ४०६
१ ५ १ ०२०९a सीदन्तस्ते वयो यथा गोश्रीते मधौ मदिरे विवक्षणे ।
१ ५ १ ०२०९c अभि त्वामिन्द्र नोनुमः ॥ ४०७
१ ५ १ ०२१०a वयमु त्वामपूर्व्य स्थूरं न कच्चिद्भरन्तोऽवस्यवः ।
१ ५ १ ०२१०c वज्रिश्चित्रँ हवामहे ॥ ४०८

१ ५ १ ०३०१a स्वादोरित्था विषूवतो मधोः पिबन्ति गौर्यः ।
१ ५ १ ०३०१c या इन्द्रेण सयावरीर्वृष्णा मदन्ति शोभथा वस्वीरनु स्वराज्यम् ॥ ४०९
१ ५ १ ०३०२a इत्था हि सोम इन्मदो ब्रह्म चकार वर्धनम् ।
१ ५ १ ०३०२c शविष्ठ वज्रिन्नोजसा पृथिव्या निः शशा अहिमर्चन्ननु स्वराज्यम् ॥ ४१०
१ ५ १ ०३०३a इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः ।
१ ५ १ ०३०३c तमिन्महत्स्वाजिषूतिमर्भे हवामहे स वाजेषु प्र नोऽविषत् ॥ ४११
१ ५ १ ०३०४a इन्द्र तुभ्यमिदद्रिवोऽनुत्तं वज्रिन्वीर्यम् ।
१ ५ १ ०३०४c यद्ध त्यं मायिनं मृगं तव त्यन्माययावधीरर्चन्ननु स्वराज्यम् ॥ ४१२
१ ५ १ ०३०५a प्रेह्यभीहि धृष्णुहि न ते वज्रो नि यँसते ।
१ ५ १ ०३०५c इन्द्र नृम्णँ हि ते शवो हनो वृत्रं जया अपोऽर्चन्ननु स्वराज्यम् ॥ ४१३
१ ५ १ ०३०६a यदुदीरत आजयो धृष्णवे धीयते धनम् ।
१ ५ १ ०३०६c युङ्क्ष्वा मदच्युता हरी कँ हनः कं वसौ दधोऽस्माँ इन्द्र वसौ दधः ॥ ४१४
१ ५ १ ०३०७a अक्षन्नमीमदन्त ह्यव प्रिया अधूषत ।
१ ५ १ ०३०७c अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी ॥ ४१५
१ ५ १ ०३०८a उपो षु शृणुही गिरो मघवन्मातथा इव ।
१ ५ १ ०३०८c कदा नः सूनृतावतः कर इदर्थयास इद्योजा न्विन्द्र ते हरी ॥ ४१६
१ ५ १ ०३०९a चन्द्रमा अप्स्वा३न्तरा सुपर्णो धावते दिवि ।
१ ५ १ ०३०९c न वो हिरण्यनेमयः पदं विन्दन्ति विद्युतो वित्तं मे अस्य रोदसी ॥ ४१७
१ ५ १ ०३१०a प्रति प्रियतमँ रथं वृषणं वसुवाहनम् ।

१ ५ १ ०३१०c स्तोता वामश्विनावृशि स्तोमेभिर्भूषति प्रति माध्वी मम श्रुतँ हवम् ॥ ४१८

१ ५ १ ०४०१a आ ते अग्न इधीमहि द्युमन्तं देवाजरम् ।

१ ५ १ ०४०१c युद्ध स्या ते पनीयसी समिद्दीदयति द्यवीषँ स्तोतृभ्य आ भर ॥ ४१९

१ ५ १ ०४०२a आग्निं न स्ववृक्तिभिर्होतारं त्वा वृणीमहे ।

१ ५ १ ०४०२c शीरं पावकशोचिषं वि वो मदे यज्ञेषु स्तीर्णबर्हिषं विवक्षसे ॥ ४२०

१ ५ १ ०४०३a महे नो अद्य बोधयोषो राये दिवित्मती ।

१ ५ १ ०४०३c यथा चिन्नो अबोधयः सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥ ४२१

१ ५ १ ०४०४a भद्रं नो अपि वातय मनो दक्षमुत क्रतुम् ।

१ ५ १ ०४०४c अथा ते सख्ये अन्धसो वि वो मदे रणा गावो न यवसे विवक्षसे ॥ ४२२

१ ५ १ ०४०५a क्रत्वा महाँ अनुष्वधं भीम आ वावृते शवः ।

१ ५ १ ०४०५c श्रिय ऋष्व उपाकयोर्नि शिप्री हरिवां दधे हस्तयोर्वज्रमायसम् ॥ ४२३

१ ५ १ ०४०६a स घा तं वृषणँ रथमधि तिष्ठाति गोविदम् ।

१ ५ १ ०४०६c यः पात्रँ हारियोजनं पूर्णमिन्द्रा चिकेतति योजा न्विन्द्र ते हरी ॥ ४२४

१ ५ १ ०४०७a अग्निं तं मन्ये यो वसुरस्तं यं यन्ति धेनवः ।

१ ५ १ ०४०७c अस्तमर्वन्त आशवोऽस्तं नित्यासो वाजिन इषँ स्तोतृभ्य आ भर ॥ ४२५

१ ५ १ ०४०८a न तमँहो न दुरितं देवासो अष्ट मर्त्यम् ।

१ ५ १ ०४०८c सजोषसो यमर्यमा मित्रो नयति वरुणो अति द्विषः ॥ ४२६

१ ५ १ ०५०१a परि प्र धन्वेन्द्राय सोम स्वादुर्मित्राय पूष्णे भगाय ॥ ४२७

१ ५ १ ०५०२a पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः ।

१ ५ १ ०५०२c द्विषस्तरध्या ऋणया न ईरसे ॥ ४२८

१ ५ १ ०५०३a पवस्व सोम महान्त्समुद्रः पिता देवानां विश्वाभि धाम ॥ ४२९

१ ५ १ ०५०४a पवस्व सोम महे दक्षायाश्वो न नित्तो वाजी धनाय ॥ ४३०

१ ५ १ ०५०५a इन्दुः पविष्ट चारुर्मदायापामुपस्थे कविर्भगाय ॥ ४३१

१ ५ १ ०५०६a अनु हि त्वा सुतँ सोम मदामसि महे समर्यराज्ये ।

१ ५ १ ०५०६c वाजाँ अभि पवमान प्र गाहसे ॥ ४३२

१ ५ १ ०५०७a क ईं व्यक्ता नरः सनीडा रुद्रस्य मर्या अथ स्वश्वाः ॥ ४३३
१ ५ १ ०५०८a अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रं हृदिस्पृशम् ।
१ ५ १ ०५०८c ऋध्यामा त ओहैः ॥ ४३४
१ ५ १ ०५०९a आविर्मर्या आ वाजं वाजिनो अग्मं देवस्य सवितुः सवम् ।
१ ५ १ ०५०९c स्वर्गाँ अर्वन्तो जयत ॥ ४३५
१ ५ १ ०५१०a पवस्व सोम द्युम्नी सुधारो महाँ अवीनामनुपूर्व्यः ॥ ४३६

पञ्चम प्रपाठकः । द्वितीयोऽर्धः

१ ५ २ ०६०१a विश्वतोदावन्विश्वतो न आ भर यं त्वा शविष्ठमीमहे ॥ ४३७
१ ५ २ ०६०२a एष ब्रह्मा य ऋत्विय इन्द्रो नाम श्रुतो गृणे ॥ ४३८
१ ५ २ ०६०३a ब्रह्माण इन्द्रं महयन्तो अर्कैरवर्धयन्नहये हन्तवा उ ॥ ४३९
१ ५ २ ०६०४a अनवस्ते रथमश्वाय तक्षुस्त्वष्टा वज्रं पुरुहूत द्युमन्तम् ॥ ४४०
१ ५ २ ०६०५a शं पदं मघँ रयीषिणो न काममव्रतो हिनोति न स्पृशद्रयिम् ॥ ४४१
१ ५ २ ०६०६a सदा गावः शुचयो विश्वधायसः सदा देवा अरेपसः ॥ ४४२
१ ५ २ ०६०७a आ याहि वनसा सह गावः सचन्त वर्त्तनिं यदूधभिः ॥ ४४३
१ ५ २ ०६०८a उप प्रक्षे मधुमति क्षियन्तः पुष्येम रयिं धीमहे त इन्द्र ॥ ४४४
१ ५ २ ०६०९a अर्चन्त्यर्कं मरुतः स्वर्का आ स्तोभति श्रुतो युवा स इन्द्रः ॥ ४४५
१ ५ २ ०६१०a प्र व इन्द्राय वृत्रहन्तमाय विप्राय गाथं गायत यं जुजोषते ॥ ४४६

१ ५ २ ०७०१a अचेत्यग्निश्चिकितिर्हव्यवाड्न सुमद्रथः ॥ ४४७
१ ५ २ ०७०२a अग्ने त्वं नो अन्तम उत त्राता शिवो भुवो वरूथ्यः ॥ ४४८
१ ५ २ ०७०३a भगो न चित्रो अग्निर्महोनां दधाति रत्नम् ॥ ४४९
१ ५ २ ०७०४a विश्वस्य प्र स्तोभ पुरो वा सन्यदि वेह नूनम् ॥ ४५०
१ ५ २ ०७०५a उषा अप स्वसुष्टमः सं वर्त्तयति वर्त्तनिँ सुजातता ॥ ४५१
१ ५ २ ०७०६a इमा नु कं भुवना सीषधेमेन्द्रश्च विश्वे च देवाः ॥ ४५२
१ ५ २ ०७०७a वि स्रुतयो यथा पथ इन्द्र त्वद्यन्तु रातयः ॥ ४५३
१ ५ २ ०७०८a अया वाजं देवहितँ सनेम मदेम शतहिमाः सुवीराः ॥ ४५४
१ ५ २ ०७०९a ऊर्जा मित्रो वरुणः पिन्वतेडाः पीवरीमिषं कृणुही न इन्द्र ॥ ४५५
१ ५ २ ०७१०a इन्द्रो विश्वस्य राजति ॥ ४५६

१ ५ २ ०८०१a त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृम्पत्सोममपिबद्विष्णुना सुतं यथावशम् ।

१ ५ २ ०८०१c स ईं ममाद महि कर्म कर्त्तवे महामुरुँ सैनँ सश्चद्देवो देवँ सत्य इन्दुः सत्यमिन्द्रम् ॥ ४५७

१ ५ २ ०८०२a अयँ सहस्रमानवो दृशः कवीनां मतिर्ज्योतिर्विधर्म ।

१ ५ २ ०८०२c ब्रध्नः समीचीरुषसः समैरयदरेपसः सोचेतसः स्वसरे मन्युमन्तश्चिता गोः ॥ ४५८

१ ५ २ ०८०३a एन्द्र याह्युप नः परावतो नायमच्छा विदथानीव सत्पतिरस्ता राजेव सत्पतिः ।

१ ५ २ ०८०३c हवामहे त्वा प्रयस्वन्तः सुतेष्वा पुत्रासो न पितरं वाजसातये मँहिष्ठं वाजसातये ॥ ४५९

१ ५ २ ०८०४a तमिन्द्रं जोहवीमि मघवानमुग्रँ सत्रा दधानमप्रतिष्कुतँ श्रवाँसि भूरिः ।

१ ५ २ ०८०४c मँहिष्ठो गीर्भिरा च यज्ञियो ववर्त्त राये नो विश्वा सुपथा कृणोतु वज्री ॥ ४६०

१ ५ २ ०८०५a अस्तु श्रौष्ट्वुरो अग्निं धिया दध आ नु त्यच्छर्धो दिव्यं वृणीमह इन्द्रवायू वृणीमहे ।

१ ५ २ ०८०५c यद्ध क्राणा विवस्वते नाभा सन्दाय नव्यसे ।

१ ५ २ ०८०५e अध प्र नूनमुप यन्ति धीतयो देवाँअच्छा न धीतयः ॥ ४६१

१ ५ २ ०८०६a प्र वो महे मतयो यन्तु विष्णवे मरुत्वते गिरिजा एवयामरुत् ।

१ ५ २ ०८०६c प्र शर्धाय प्र यज्यवे सुखादये तवसे भन्ददिष्टये धुनिव्रताय शवसे ॥ ४६२

१ ५ २ ०८०७a अया रुचा हरिण्या पुनानो विश्वा द्वेषाँसि तरति सयुग्वभिः सूरो न सयुग्वभिः ।

१ ५ २ ०८०७c धारा पृष्ठस्य रोचते पुनानो अरुषो हरिः ।

१ ५ २ ०८०७e विश्वा यद्रूपा परियास्यृक्वभिः सप्तास्येभिर्ऋक्वभिः ॥ ४६३

१ ५ २ ०८०८a अभि त्यं देवँ सवितारमोण्योः कविक्रतुमर्चामि सत्यसवँ रत्नधामभि प्रियं मतिम्

१ ५ २ ०८०८c ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः ॥ ४६४

१ ५ २ ०८०९a अग्निँ होतारं मन्ये दास्वन्तं वसोः सूनुँ सहसो जातवेदसं विप्रं न जातवेदसम् ।

१ ५ २ ०८०९c य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा ।

१ ५ २ ०८०९c घृतस्य विभ्राष्टिमनु शुक्रशोचिष आजुह्वानस्य सर्पिषः ॥ ४६५

१ ५ २ ०८१०a तव त्यन्नर्यं नृतोऽप इन्द्र प्रथमं पूर्व्यं दिवि प्रवाच्यं कृतम् ।

१ ५ २ ०८१०c यो देवस्य शवसा प्रारिणा असु रिणन्नपः ।

१ ५ २ ०८१०e भुवो विश्वमभ्यदेवमोजसा विदेदूर्जं शतक्रतुर्विदेदिषम् ॥ ४६६

॥ इत्यैन्द्रं पर्व काण्डम् ॥

पावमान काण्डम्

१ ५ २ ०९०१a उच्चा ते जातमन्धसो दिवि सद्भूम्या ददे ।
१ ५ २ ०९०१c उग्रँ शर्म महि श्रवः ॥ ४६७
१ ५ २ ०९०२a स्वादिष्ठया मदिष्ठया पवस्व सोम धारया ।
१ ५ २ ०९०२c इन्द्राय पातवे सुतः ॥ ४६८
१ ५ २ ०९०३a वृषा पवस्व धारया मरुत्वते च मत्सरः ।
१ ५ २ ०९०३c विश्वा दधान ओजसा ॥ ४६९
१ ५ २ ०९०४a यस्ते मदो वरेण्यस्तेना पवस्वान्धसा ।
१ ५ २ ०९०४c देवावीरघशँसहा ॥ ४७०
१ ५ २ ०९०५a तिस्रो वाच उदीरते गावो मिमन्ति धेनवः ।
१ ५ २ ०९०५c हरिरेति कनिक्रदत् ॥ ४७१
१ ५ २ ०९०६a इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः ।
१ ५ २ ०९०६c अर्कस्य योनिमासदम् ॥ ४७२
१ ५ २ ०९०७a असाव्यँशुर्मदायाप्सु दक्षो गिरिष्ठाः ।
१ ५ २ ०९०७c श्येनो न योनिमासदत् ॥ ४७३
१ ५ २ ०९०८a पवस्व दक्षसाधनो देवेभ्यः पीतये हरे ।
१ ५ २ ०९०८c मरुद्भ्यो वायवे मदः ॥ ४७४
१ ५ २ ०९०९a परि स्वानो गिरिष्ठाः पवित्रे सोमो अक्षरत् ।
१ ५ २ ०९०९c मदेषु सर्वधा असि ॥ ४७५
१ ५ २ ०९१०a परि प्रिया दिवः कविर्वयाँसि नप्त्योर्हितः ।
१ ५ २ ०९१०c स्वानैर्याति कविक्रतुः ॥ ४७६

१ ५ २ १००१a प्र सोमासो मदच्युतः श्रवसे नो मघोनः ।
१ ५ २ १००१c सुता विदथे अक्रमुः ॥ ४७७
१ ५ २ १००२a प्र सोमासो विपश्चितोऽपो नयन्त ऊर्मयः ।
१ ५ २ १००२c वनानि महिषा इव ॥ ४७८
१ ५ २ १००३a पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने ।
१ ५ २ १००३c विश्वा अप द्विषो जहि ॥ ४७९
१ ५ २ १००४a वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे ।
१ ५ २ १००४c पवमान स्वर्दृशम् ॥ ४८०

१ ५ २ १००५a इन्दुः पविष्ट चेतनः प्रियः कवीनां मतिः ।
१ ५ २ १००५c सृजदश्वँ रथीरिव ॥ ४८१
१ ५ २ १००६a असृक्षत प्र वाजिनो गव्या सोमासो अश्वया ।
१ ५ २ १००६c शुक्रासो वीरयाशवः ॥ ४८२
१ ५ २ १००७a पवस्व देव आयुषगिन्द्रं गच्छतु ते मदः ।
१ ५ २ १००७c वायुमा रोह धर्मणा ॥ ४८३
१ ५ २ १००८a पवमानो अजीजनद्दिवश्चित्रं न तन्यतुम् ।
१ ५ २ १००८c ज्योतिर्वैश्वानरं बृहत् ॥ ४८४
१ ५ २ १००९a परि स्वानास इन्दवो मदाय बर्हणा गिरा ।
१ ५ २ १००९c मधो अर्षन्ति धारया ॥ ४८५
१ ५ २ १०१०a परि प्रासिष्यदत्कविः सिन्धोरूर्मावधि श्रितः ।
१ ५ २ १०१०c कारुं बिभ्रत्पुरुस्पृहम् ॥ ४८६

षष्ठ प्रपाठकः । प्रथमोऽर्धः

१ ६ १ ०१०१a उपो षु जातमप्तुरं गोभिर्भङ्गं परिष्कृतम् ।
१ ६ १ ०१०१c इन्दुं देवा अयासिषुः ॥ ४८७
१ ६ १ ०१०२a पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः ।
१ ६ १ ०१०२c शुम्भन्ति विप्रं धीतिभिः ॥ ४८८
१ ६ १ ०१०३a आविशन्कलशँ सुतो विश्वा अर्षन्नभि श्रियः ।
१ ६ १ ०१०३c इन्दुरिन्द्राय धीयते ॥ ४८९
१ ६ १ ०१०४a असर्जि रथ्यो यथा पवित्रे चम्वोः सुतः ।
१ ६ १ ०१०४c कार्ष्मन्वाजी न्यक्रमीत् ॥ ४९०
१ ६ १ ०१०५a प्र यद्गावो न भूर्णयस्त्वेषा अयासो अक्रमुः ।
१ ६ १ ०१०५c घ्नन्तः कृष्णामप त्वचम् ॥ ४९१
१ ६ १ ०१०६a अपघ्नन्पवसे मृधः क्रतुवित्सोम मत्सरः ।
१ ६ १ ०१०६c नुदस्वादेवयुं जनम् ॥ ४९२
१ ६ १ ०१०७a अया पवस्व धारया यया सूर्यमरोचयः ।
१ ६ १ ०१०७c हिन्वानो मानुषीरपः ॥ ४९३
१ ६ १ ०१०८a स पवस्व य आविथेन्द्रं वृत्राय हन्तवे ।
१ ६ १ ०१०८c वव्रिवाँसं महीरपः ॥ ४९४
१ ६ १ ०१०९a अया वीती परि स्रव यस्त इन्दो मदेष्वा ।
१ ६ १ ०१०९c अवाहन्नवतीर्नव ॥ ४९५

१ ६ १ ०११०a परि द्युक्षँ सनद्रायिं भरद्वाजं नो अन्धसा ।
१ ६ १ ०११०c स्वानो अर्ष पवित्र आ ॥ ४९६

१ ६ १ ०२०१a अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः ।
१ ६ १ ०२०१c सँ सूर्येण दिद्युते ॥ ४९७
१ ६ १ ०२०२a आ ते दक्षं मयोभुवं वह्निमद्या वृणीमहे ।
१ ६ १ ०२०२c पान्तमा पुरुस्पृहम् ॥ ४९८
१ ६ १ ०२०३a अध्वर्यो अद्रिभिः सुतँ सोमं पवित्र आ नय ।
१ ६ १ ०२०३c पुनीहीन्द्राय पातवे ॥ ४९९
१ ६ १ ०२०४a तरत्स मन्दी धावति धारा सुतस्यान्धसः ।
१ ६ १ ०२०४c तरत्स मन्दी धावति ॥ ५००
१ ६ १ ०२०५a आ पवस्व सहस्रिणँ रयिँ सोम सुवीर्यम् ।
१ ६ १ ०२०५c अस्मे श्रवाँसि धारय ॥ ५०१
१ ६ १ ०२०६a अनु प्रत्नास आयवः पदं नवीयो अक्रमुः ।
१ ६ १ ०२०६c रुचे जनन्त सूर्यम् ॥ ५०२
१ ६ १ ०२०७a अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत् ।
१ ६ १ ०२०७c सीदन्योनौ योनेष्वा ॥ ५०३
१ ६ १ ०२०८a वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः ।
१ ६ १ ०२०८c वृषा धर्माणि दध्रिषे ॥ ५०४
१ ६ १ ०२०९a इषे पवस्व धारया मृज्यमानो मनीषिभिः ।
१ ६ १ ०२०९c इन्दो रुचाभि गा इहि ॥ ५०५
१ ६ १ ०२१०a मन्द्रया सोम धारया वृषा पवस्व देवयुः ।
१ ६ १ ०२१०c अव्यो वारेभिरस्मयुः ॥ ५०६
१ ६ १ ०२११a अया सोम सुकृत्यपा महान्त्सन्नभ्यवर्धथाः ।
१ ६ १ ०२११c हिन्दान इद्वृषायसे ॥ ५०७
१ ६ १ ०२१२a अयं विचर्षणिर्हितः पवमानः स चेतति ।
१ ६ १ ०२१२c हिन्वान आप्यं बृहत् ॥ ५०८
१ ६ १ ०२१३a प्र ण इन्दो महे तु न ऊर्मिं न बिभ्रदर्षसि ।
१ ६ १ ०२१३c अभि देवाँ अयास्यः ॥ ५०९
१ ६ १ ०२१४a अपघ्नन्पवते मृधोऽप सोमो अराव्णः ।
१ ६ १ ०२१४c गच्छन्निन्द्रस्य निष्कृतम् ॥ ५१०

१ ६ १ ०३०१a पुनानः सोम धारयापो वसानो अर्षसि ।

१ ६ १ ०३०१c आ रत्नधा योनिमृतस्य सीदस्युत्सो देवो हिरण्ययः ॥ ५११
१ ६ १ ०३०२a परीतो षिञ्चता सुतँ सोमो य उत्तमँ हविः ।
१ ६ १ ०३०२c दधन्वाँ यो नर्यो अप्स्वा३न्तरा सुषाव सोममद्रिभिः ॥ ५१२
१ ६ १ ०३०३a आ सोम स्वानो अद्रिभिस्तिरो वाराण्यव्यया ।
१ ६ १ ०३०३c जनो न पुरि चम्वोर्विशद्धरिः सदो वनेषु दध्रिषे ॥ ५१३
१ ६ १ ०३०४a प्र सोम देववीतये सिन्धुर्न पिप्ये अर्णसा ।
१ ६ १ ०३०४c अँशोः पयसा मदिरो न जागृविरच्छा कोशं मधुश्चुतम् ॥ ५१४
१ ६ १ ०३०५a सोम उ ष्वाणः सोतृभिरधि ष्णुभिरवीनाम् ।
१ ६ १ ०३०५c अश्वयेव हरिता याति धारया मन्द्रया याति धारया ॥ ५१५
१ ६ १ ०३०६a तवाहँ सोम रारण सख्य इन्दो दिवेदिवे ।
१ ६ १ ०३०६c पुरूणि बभ्रो नि चरन्ति मामव परिधींरति ताँ इहि ॥ ५१६
१ ६ १ ०३०७a मृज्यमानः सुहस्त्या समुद्रे वाचमिन्वसि ।
१ ६ १ ०३०७c रयिं पिशङ्गं बहुलं पुरुस्पृहं पवमानाभ्यर्षसि ॥ ५१७
१ ६ १ ०३०८a अभि सोमास आयवः पवन्ते मद्यं मदम् ।
१ ६ १ ०३०८c समुद्रस्याधि विष्टपे मनीषिणो मत्सरासो मदच्युतः ॥ ५१८
१ ६ १ ०३०९a पुनानः सोम जागृविरव्या वारैः परि प्रियः ।
१ ६ १ ०३०९c त्वं विप्रो अभवोऽङ्गिरस्तम मध्वा यज्ञं मिमिक्ष णः ॥ ५१९
१ ६ १ ०३१०a इन्द्राय पवते मदः सोमो मरुत्वते सुतः ।
१ ६ १ ०३१०c सहस्रधारो अत्यव्यमर्षति तमी मृजन्त्यायवः ॥ ५२०
१ ६ १ ०३११a पवस्व वाजसातमोऽभि विश्वानि वार्या ।
१ ६ १ ०३११c त्वँ समुद्रः प्रथमे विधर्मं देवेभ्यं सोम मत्सरः ॥ ५२१
१ ६ १ ०३१२a पवमाना असृक्षत पवित्रमति धारया ।
१ ६ १ ०३१२c मरुत्वन्तो मत्सरा इन्द्रिया हया मेधामभि प्रयाँसि च ॥ ५२२

१ ६ १ ०४०१a प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजमर्ष ।
१ ६ १ ०४०१c अश्वं न त्वा वाजिनं मर्जयन्तोऽच्छा बर्ही रशनाभिर्नयन्ति ॥ ५२३
१ ६ १ ०४०२a प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।
१ ६ १ ०४०२c महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येति रेभन् ॥ ५२४
१ ६ १ ०४०३a तिस्रो वाच ईरयति प्र वह्निर्ऋतस्य धीतिं ब्रह्मणो मनीषाम् ।
१ ६ १ ०४०३c गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः ॥ ५२५
१ ६ १ ०४०४a अस्य प्रेषा हेमना पूयमानो देवो देवेभिः समपृक्त रसम् ।

१ ६ १ ०४०४c सुतः पवित्रं पर्येति रेभन्मितेव सद्म पशुमन्ति होता ॥ ५२६
१ ६ १ ०४०५a सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।
१ ६ १ ०४०५c जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥ ५२७
१ ६ १ ०४०६a अभि त्रिपृष्ठं वृषणं वयोधामाङ्गोषिणमवावशन्त वाणीः ।
१ ६ १ ०४०६c वना वसानो वरुणो न सिन्धूर्वि रत्नधा दयते वार्याणि ॥ ५२८
१ ६ १ ०४०७a अक्रान्त्समुद्रः प्रथमे विधर्मं जनयन्प्रजा भुवनस्य गोपाः ।
१ ६ १ ०४०७c वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे स्वानो अद्रिः ॥ ५२९
१ ६ १ ०४०८a कनिक्रन्ति हरिरा सृज्यमानः सीदन्वनस्य जठरे पुनानः ।
१ ६ १ ०४०८c नृभिर्यतः कृणुते निर्णिजं गामतो मतिं जनयत स्वधाभिः ॥ ५३०
१ ६ १ ०४०९a एष स्य ते मधुमाँ इन्द्र सोमो वृषा वृष्णः परि पवित्रे अक्षाः ।
१ ६ १ ०४०९c सहस्रदाः शतदा भूरिदावा शश्वत्तमं बर्हिरा वाज्यस्थात् ॥ ५३१
१ ६ १ ०४१०a पवस्व सोम मधुमाँ ऋतावापो वसानो अधि सानो अव्ये ।
१ ६ १ ०४१०c अव द्रोणानि घृतवन्ति रोह मदिन्तमो मत्सर इन्द्रपानः ॥ ५३२
१ ६ १ ०५०१a प्र सेनानीः शूरो अग्रे रथानां गव्यन्नेति हर्षते अस्य सेना ।
१ ६ १ ०५०१c भद्रान्कृण्वन्निन्द्रहवान्त्सखिभ्य आ सोमो वस्त्रा रभसानि दत्ते ॥ ५३३
१ ६ १ ०५०२a प्र ते धारा मधुमतीरसृग्रन्वारं यत्पूतो अत्येष्यव्यम् ।
१ ६ १ ०५०२c पवमान पवसे धाम गोनां जनयन्त्सूर्यमपिन्वो अर्कैः ॥ ५३४
१ ६ १ ०५०३a प्र गायताभ्यर्चाम देवान्त्सोमँ हिनोत महते धनाय ।
१ ६ १ ०५०३c स्वादुः पवतामति वारमव्यमा सीदतु कलशं देव इन्दुः ॥ ५३५
१ ६ १ ०५०४a प्र हिन्वानो जनिता रोदस्यो रथो न वाजँ सनिषन्नयासीत् ।
१ ६ १ ०५०४c इन्द्रं गच्छन्नायुधा सँशिशानो विश्वा वसु हस्तयोरादधानः ॥ ५३६
१ ६ १ ०५०५a तक्षद्यदी मनसो वेनतो वाग्ज्येष्ठस्य धर्मं द्युक्षोरनीके ।
१ ६ १ ०५०५c आदीमायन्वरमा वावशाना जुष्टं पतिं कलशे गाव इन्दुम् ॥ ५३७
१ ६ १ ०५०६a साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः ।
१ ६ १ ०५०६c हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी ॥ ५३८
१ ६ १ ०५०७a अधि यदस्मिन्वाजिनीव शुभः स्पर्धन्ते धियः सूरे न विशः ।
१ ६ १ ०५०७c अपो वृणानः पवते कवीयन्व्रजं न पशुवर्धनाय मन्म ॥ ५३९
१ ६ १ ०५०८a इन्दुर्वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन्मदाय ।
१ ६ १ ०५०८c हन्ति रक्षो बाधते पर्यरातिं वरिवस्कृण्वन्वृजनस्य राजा ॥ ५४०

१ ६ १ ०५०९a अया पवा पवस्वैना वसूनि माँश्चत्व इन्द्रो सरसि प्र धन्व ।
१ ६ १ ०५०९c ब्रघ्नश्चिद्यस्य वातो न जूतिं पुरुमेधाश्चित्तकवे नरं धात् ॥ ५४१
१ ६ १ ०५१०a महत्तत्सोमो महिषश्चकारापां यद्गर्भोऽवृणीत देवान् ।
१ ६ १ ०५१०c अदधादिन्द्रे पवमान ओजोऽजनयत्सूर्ये ज्योतिरिन्दुः ॥ ५४२
१ ६ १ ०५११a असर्जि वक्वा रथ्ये यथाजौ धिया मनोता प्रथमा मनीष ।
१ ६ १ ०५११c दश स्वसारो अधि सानो अव्ये मृजन्ति वह्निँ सदनेष्वच्छ ॥ ५४३
१ ६ १ ०५१२a अपामिवेदूर्मयस्तर्त्तुराणाः प्र मनीषा ईरते सोममच्छ ।
१ ६ १ ०५१२c नमस्यन्तीरुप च यन्ति सं चाच विशन्त्युशतीरुशन्तम् ॥ ५४४

षष्ठ प्रपाठकः । द्वितीयोऽर्धः

१ ६ २ ०६०१a पुरोजिती वो अन्धसः सुताय मादयित्नवे ।
१ ६ २ ०६०१c अप श्वानँ श्नथिष्टन सखायो दीर्घजिह्व्यम् ॥ ५४५
१ ६ २ ०६०२a अयं पूषा रयिर्भगः सोमः पुनानो अर्षति ।
१ ६ २ ०६०२c पतिर्विश्वस्य भूमनो व्यख्यद्रोदसी उभे ॥ ५४६
१ ६ २ ०६०३a सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः ।
१ ६ २ ०६०३c पवित्रवन्तो अक्षरन्देवान्गच्छन्तु वो मदाः ॥ ५४७
१ ६ २ ०६०४a सोमाः पवन्त इन्दवोऽस्मभ्यं गातुवित्तमाः ।
१ ६ २ ०६०४c मित्राः स्वाना अरेपसः स्वाध्यः स्वर्विदः ॥ ५४८
१ ६ २ ०६०५a अभी नो वाजसातमँ रयिमर्ष शतस्पृहम् ।
१ ६ २ ०६०५c इन्दो सहस्रभर्णसं तुविद्युम्नं विभासहम् ॥ ५४९
१ ६ २ ०६०६a अभी नवन्ते अद्रुहः प्रियमिन्द्रस्य काम्यम् ।
१ ६ २ ०६०६c वत्सं न पूर्व आयुनि जातँ रिहन्ति मातरः ॥ ५५०
१ ६ २ ०६०७a आ हर्यताय धृष्णवे धनुष्टन्वन्ति पौँस्यम् ।
१ ६ २ ०६०७c शुक्रा वि यन्त्यसुराय निर्णिजे विपामग्रे महीयुवः ॥ ५५१
१ ६ २ ०६०८a परि त्यँ हर्यतँ हरिं बभ्रुं पुनन्ति वारेण ।
१ ६ २ ०६०८c यो देवान्विश्वाँ इत्परि मदेन सह गच्छति ॥ ५५२
१ ६ २ ०६०९a प्र सुन्वानास्यान्धसो मर्तो न वष्ट तद्वचः ।
१ ६ २ ०६०९c अप श्वानमराधसँ हता मखं न भृगवः ॥ ५५३

१ ६ २ ०७०१a अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु वर्धते ।
१ ६ २ ०७०१c आ सूर्यस्य बृहतो बृहन्नधि रथं विष्वञ्चमरुहद्विचक्षणः ॥ ५५४
१ ६ २ ०७०२a अचोदसो नो धन्वन्त्विन्दवः प्र स्वानासो बृहद्देवेषु हरयः ।

१ ६ २ ०७०२c वि चिदश्नाना इषयो अरातयोऽर्यो नः सन्तु सनिषन्तु नो धियः ॥ ५५५

१ ६ २ ०७०३a एष प्र कोशे मधुमाँ अचिक्रददिन्द्रस्य वज्रो वपुषो वपुष्टमः ।

१ ६ २ ०७०३c अभ्यृ३तस्य सुदुघा घृतश्चुतो वाश्रा अर्षन्ति पयसा च धेनवः ॥ ५५६

१ ६ २ ०७०४a प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतँ सखा सख्युर्न प्र मिनाति सङ्गिरम् ।

१ ६ २ ०७०४c मर्य इव युवतिभिः समर्षति सोमः कलशे शतयामना पथा ॥ ५५७

१ ६ २ ०७०५a धर्ता दिवः पवते कृत्व्यो रसो दक्षो देवानामनुमाद्यो नृभिः ।

१ ६ २ ०७०५c हरिः सृजानो अत्यो न सत्वभिर्वृथा पाजाँसि कृणुषे नदीष्वा ॥ ५५८

१ ६ २ ०७०६a वृषा मतीनां पवते विचक्षणः सोमो अह्नां प्रतरीतोषसां दिवः ।

१ ६ २ ०७०६c प्राणा सिन्धूनां कलशाँ अचिक्रददिन्द्रस्य हार्द्याविशन्मनीषिभिः ॥ ५५९

१ ६ २ ०७०७a त्रिरस्मै सप्त धेनवो दुदुह्रिरे सत्यामाशिरं परमे व्योमनि ।

१ ६ २ ०७०७c चत्वार्यन्या भुवनानि निर्णिजे चारूणि चक्रे यदृतैरवर्धत ॥ ५६०

१ ६ २ ०७०८a इन्द्राय सोम सुषुतः परि स्रवापामीवा भवतु रक्षसा सह ।

१ ६ २ ०७०८c मा ते रसस्य मत्सत द्वयाविनो द्रविणस्वन्त इह सन्त्विन्दवः ॥ ५६१

१ ६ २ ०७०९a असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत् ।

१ ६ २ ०७०९c पुनानो वारमत्येष्यव्ययँ श्येनो न योनिं घृतवन्तमासदत् ॥ ५६२

१ ६ २ ०७१०a प्र देवमच्छा मधुमन्त इन्दवोऽसिष्यदन्त गाव आ न धेनवः ।

१ ६ २ ०७१०c बर्हिषदो वचनावन्त ऊधभिः परिस्रुतमुस्रिया निर्णिजं धिरे ॥ ५६३

१ ६ २ ०७११a अञ्जते व्यञ्जते समञ्जते क्रतुँ रिहन्ति मध्वाभ्यञ्जते ।

१ ६ २ ०७११c सिन्धोरुऽच्छ्वासे पतयन्तमुक्षणँ हिरण्यपावाः पशुमप्सु गृभ्णते ॥ ५६४

१ ६ २ ०७१२a पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।

१ ६ २ ०७१२c अतप्ततनूर्न तदामो अश्नुते शृतास इद्वहन्तः सं तदाशत ॥ ५६५

१ ६ २ ०८०१a इन्द्रमच्छ सुता इमे वृषणं यन्तु हरयः ।

१ ६ २ ०८०१c श्रुष्टे जातास इन्दवः स्वर्विदः ॥ ५६६
१ ६ २ ०८०२a प्र धन्वा सोम जागृविरिन्द्रायेन्दो परि स्रव ।
१ ६ २ ०८०२c द्युमन्तँ शुष्ममा भर स्वर्विदम् ॥ ५६७
१ ६ २ ०८०३a सखाय आ नि षीदत पुनानाय प्र गायत ।
१ ६ २ ०८०३c शिशुं न यज्ञैः परि भूषत श्रिये ॥ ५६८
१ ६ २ ०८०४a तं वः सखायो मदाय पुनानमभि गायत ।
१ ६ २ ०८०४c शिशुं न हव्यैः स्वदयन्त गूर्तिभिः ॥ ५६९
१ ६ २ ०८०५a प्राणा शिशुर्महीनाँ हिन्वन्नृतस्य दीधितिम् ।
१ ६ २ ०८०५c विश्वा परि प्रिया भुवदध द्विता ॥ ५७०
१ ६ २ ०८०६a पवस्व देववीतय इन्दो धाराभिरोजसा ।
१ ६ २ ०८०६c आ कलशं मधुमान्त्सोम नः सदः ॥ ५७१
१ ६ २ ०८०७a सोमः पुनान ऊर्मिणाव्यं वारं वि धावति ।
१ ६ २ ०८०७c अग्रे वाचः पवमानः कनिक्रदत् ॥ ५७२
१ ६ २ ०८०८a प्र पुनानाय वेधसे सोमाय वच उच्यते ।
१ ६ २ ०८०८c भृतिं न भरा मतिभिर्जुजोषते ॥ ५७३
१ ६ २ ०८०९a गोमन्न इन्दो अश्ववत्सुतः सुदक्ष धनिव ।
१ ६ २ ०८०९c शुचिं च वर्णमधि गोषु धार्य ॥ ५७४
१ ६ २ ०८१०a अस्मभ्यं त्वा वसुविदमभि वाणीरनूषत ।
१ ६ २ ०८१०c गोभिष्टे वर्णमभि वासयामसि ॥ ५७५
१ ६ २ ०८११a पवते हर्यतो हरिरति ह्वराँसि रँह्या ।
१ ६ २ ०८११c अभ्यर्ष स्तोतृभ्यो वीरवद्यशः ॥ ५७६
१ ६ २ ०८१२a परि कोशं मधुश्चुतँ सोमः पुनानो अर्षति ।
१ ६ २ ०८१२c अभि वाणीर्ऋषीणाँ सप्ता नूषत ॥ ५७७

१ ६ २ ०९०१a पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः ।
१ ६ २ ०९०१c महि द्युक्षतमो मदः ॥ ५७८
१ ६ २ ०९०२a अभि द्युम्नं बृहद्यश इषस्पते दिदीहि देव देवयुम् ।
१ ६ २ ०९०२c वि कोशं मध्यमं युव ॥ ५७९
१ ६ २ ०९०३a आ सोता परि षिञ्चताश्वं न स्तोममप्तुरँ रजस्तुरम् ।
१ ६ २ ०९०३c वनप्रक्षमुदप्रुतम् ॥ ५८०
१ ६ २ ०९०४a एतमु त्यं मदच्युतँ सहस्रधारं वृषभं दिवोदुहम् ।
१ ६ २ ०९०४c विश्वा वसूनि बिभ्रतम् ॥ ५८१

१ ६ २ ०९०५a स सुन्वे यो वसूनां यो रायामानेता य इडानाम् ।
१ ६ २ ०९०५c सोमो यः सुक्षितीनाम् ॥ ५८२
१ ६ २ ०९०६a त्वँ ह्या३ङ्ग दैव्या पवमान जनिमानि द्युमत्तमः ।
१ ६ २ ०९०६c अमृतत्वाय घोषयन् ॥ ५८३
१ ६ २ ०९०७a एष स्य धारया सुतोऽव्यो वारेभिः पवते मदिन्तमः ।
१ ६ २ ०९०७c क्रीडन्नूर्मिरपामिव ॥ ५८४
१ ६ २ ०९०८a य उस्रिया अपि या अन्तरश्मनि निर्गा अकृन्तदोजसा ।
१ ६ २ ०९०८c अभि व्रजं तत्निषे गव्यमश्व्यं वर्मीव धृष्णवा रुज ।
१ ६ २ ०९०८e ॐ वर्मीव धृष्णवा रुज ॥ ५८५

॥ इति सौम्यं पावमानं पर्व काण्डम् ॥

॥ इति पूर्वार्चिकः ॥

आरण्य आर्चिकः

आरण्य काण्डम्

२ ० ० ०१०१a इन्द्र ज्येष्ठं न आ भर ओजिष्ठं पुपुरि श्रवः ।
२ ० ० ०१०१c यद्दिधृक्षेम वज्रहस्त रोदसी ओभे सुशिप्र पप्राः ॥ ५८६
२ ० ० ०१०२a इन्द्रो राजा जगतश्चर्षणीनामधिक्षमा विश्वरूपं यदस्य ।
२ ० ० ०१०२c ततो ददाति दाशुषे वसूनि चोदद्राध उपस्तुतं चिदर्वाक् ॥ ५८७
२ ० ० ०१०३a यस्येदमा रजोयुजस्तुजे जने वनँ स्वः ।
२ ० ० ०१०३c इन्द्रस्य रन्त्यं बृहत् ॥ ५८८
२ ० ० ०१०४a उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमँ श्रथाय ।
२ ० ० ०१०४c अथादित्य व्रते वयं तवानागसो अदितये स्याम ॥ ५८९
२ ० ० ०१०५a त्वया वयं पवमानेन सोम भरे कृतं वि चिनुयाम शश्वत् ।
२ ० ० ०१०५c तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ५९०
२ ० ० ०१०६a इमं वृषणं कृणुतैकमिन्माम् ॥ ५९१
२ ० ० ०१०७a स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः ।
२ ० ० ०१०७c वरिवोवित्परिस्रव ॥ ५९२
२ ० ० ०१०८a एना विश्वान्यर्य आ द्युम्नानि मानुषाणाम् ।
२ ० ० ०१०८c सिषासन्तो वनामहे ॥ ५९३
२ ० ० ०१०९a अहमस्मि प्रथमजा ऋतस्य पूर्वं देवेभ्यो अमृतस्य नाम ।
२ ० ० ०१०९c यो मा ददाति स इदेवमावदहमन्नमन्नमदन्तमद्मि ॥ ५९४

२ ० ० ०२०१a त्वमेतदधारयः कृष्णासु रोहिणीषु च ।
२ ० ० ०२०१c परुष्णीषु रुशत्पयः ॥ ५९५
२ ० ० ०२०२a अरूरुचदुषसः पृश्निरग्रिय उक्षा मिमेति भुवनेषु वाजयुः ।
२ ० ० ०२०२c मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमादधुः ॥ ५९६
२ ० ० ०२०३a इन्द्र इद्धर्योः सचा सम्मिश्ल आ वचोयुजा ।
२ ० ० ०२०३c इन्द्रो वज्री हिरण्ययः ॥ ५९७
२ ० ० ०२०४a इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च ।
२ ० ० ०२०४c उग्र उग्राभिरूतिभिः ॥ ५९८
२ ० ० ०२०५a प्रथश्च यस्य सप्रथश्च नामानुष्टुभस्य हविषो हविर्यत् ।
२ ० ० ०२०५c धातुर्द्युतानात्सवितुश्च विष्णो रथन्तरमा जभारा वसिष्ठः ॥ ५९९
२ ० ० ०२०६a नियुत्वान्वायवा गह्ययँ शुक्रो अयामि ते ।
२ ० ० ०२०६c गन्तासि सुन्वतो गृहम् ॥ ६००
२ ० ० ०२०७a यज्ञायथा अपूर्व्य मघवन्वृत्रहत्याय ।
२ ० ० ०२०७c तत्पृथिवीमप्रथयस्तदस्तभ्ना उतो दिवम् ॥ ६०१

२ ० ० ०३०१a मयि वर्चो अथो यशोऽथो यज्ञस्य यत्पयः ।
२ ० ० ०३०१c परमेष्ठी प्रजापतिर्दिवि द्यामिव दृँहतु ॥ ६०२
२ ० ० ०३०२a सं ते पयाँसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः ।
२ ० ० ०३०२c आप्यायमानो अमृताय सोम दिवि श्रवाँस्युत्तमानि धिष्व ॥ ६०३
२ ० ० ०३०३a त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः ।
२ ० ० ०३०३c त्वमातनोरुर्वा३न्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ॥ ६०४
२ ० ० ०३०४a अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् ।
२ ० ० ०३०४c होतारं रत्नधातमम् ॥ ६०५
२ ० ० ०३०५a ते मन्वत प्रथमं नाम गोनां त्रिः सप्त परमं नाम जनान् ।
२ ० ० ०३०५c ता जानतीरभ्यनूषत क्षा आविर्भुवन्नरुणीर्यशसा गावः ॥ ६०६
२ ० ० ०३०६a समन्या यन्त्युपयन्त्यन्याः समानमूर्वं नद्यस्पृणन्ति ।
२ ० ० ०३०६c तमू शुचिँ शुचयो दीदिवाँसमपान्नपातमुप यन्त्यापः ॥ ६०७
२ ० ० ०३०७a आ प्रागाद्भद्रा युवतिरह्नः केतून्त्समीर्त्सति ।
२ ० ० ०३०७c अभूद्भद्रा निवेशनी विश्वस्य जगतो रात्री ॥ ६०८
२ ० ० ०३०८a प्रक्षस्य वृष्णो अरुषस्य नू महः प्र नो वचो विदथा जातवेदसे ।

२ ० ० ०३०८c वैश्वानराय मतिर्नव्यसे शुचिः सोम इव पवते चारुरग्नये ॥ ६०९
२ ० ० ०३०९a विश्वे देवा मम शृण्वन्तु यज्ञमुभे रोदसी अपां नपाच्च मन्म ।
२ ० ० ०३०९c मा वो वचाँसि परिचक्ष्याणि वोचँ सुम्नेष्विद्वो अन्तमा मदेम ॥ ६१०
२ ० ० ०३१०a यशो मा द्यावापृथिवी यशो मेन्द्रबृहस्पती ।
२ ० ० ०३१०c यशो भगस्य विन्दतु यशो मा प्रतिमुच्यताम् ।
२ ० ० ०३१०e यशस्व्या३स्याः सँ सदोऽहं प्रवदिता स्याम् ॥ ६११
२ ० ० ०३११a इन्द्रस्य नु वीर्याणि प्रवोचं यानि चकार प्रथमानि वज्री ।
२ ० ० ०३११c अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत्पर्वतानाम् ॥ ६१२
२ ० ० ०३१२a अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन् ।
२ ० ० ०३१२c त्रिधातुरर्को रजसो विमानोऽजस्रं ज्योतिर्हविरस्मि सर्वम् ॥ ६१३
२ ० ० ०३१३a पात्यग्निर्विपो अग्रं पदं वेः पाति यह्वश्चरणँ सूर्यस्य ।
२ ० ० ०३१३c पाति नाभा सप्तशीर्षाणमग्निः ॥ ६१४

२ ० ० ०४०१a भ्राजन्त्यग्ने समिधान दीदिवो जिह्वा चरत्यन्तरासनि ।
२ ० ० ०४०१c स त्वं नो अग्ने पयसा वसुविद्रयिं वर्चो दृशेऽदाः ॥ ६१५
२ ० ० ०४०२a वसन्त इन्नु रन्त्यो ग्रीष्म इन्नु रन्त्यः ।
२ ० ० ०४०२c वर्षाण्यनु शरदो हेमन्तः शिशिर इन्नु रन्त्यः ॥ ६१६
२ ० ० ०४०३a सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
२ ० ० ०४०३c स भूमिँ सर्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ ६१७
२ ० ० ०४०४a त्रिपादूर्ध्व उदैत्पुरुषः पदोऽस्येहाभवत्पुनः ।
२ ० ० ०४०४c तथा विष्वङ् व्यक्रामदशनानशने अभि ॥ ६१८
२ ० ० ०४०५a पुरुष एवेदँ सर्वं यद्भूतं यच्च भाव्यम् ।
२ ० ० ०४०५c पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ६१९
२ ० ० ०४०६a तावानस्य महिमा ततो ज्यायाँश्च पूरुषः ।
२ ० ० ०४०६c उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ ६२०
२ ० ० ०४०७a ततो विराडजायत विराजो अधि पूरुषः ।
२ ० ० ०४०७c स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ ६२१
२ ० ० ०४०८a मन्ये वाँ द्यावापृथिवी सुभोजसौ ये अप्रथेथाममितमभि योजनम् ।
२ ० ० ०४०८c द्यावापृथिवी भवतँ स्योने ते नो मुञ्चतमँहसः ॥ ६२२
२ ० ० ०४०९a हरी त इन्द्र श्मश्रूण्युतो ते हरितौ हरि ।
२ ० ० ०४०९c तं त्वा स्तुवन्ति कवयः पुरुषासो वनर्गवः ॥ ६२३
२ ० ० ०४१०a यद्वर्चो हिरण्यस्य यद्वा वर्चो गवामुत ।

२ ० ० ०४१०c सत्यस्य ब्रह्मणो वर्चस्तेन मा सँ सृजामसि ॥ ६२४
२ ० ० ०४११a सहस्तन्न इन्द्र दद्योज ईशे ह्यस्य महतो विरप्शिन् ।
२ ० ० ०४११c क्रतुं न नृम्णँ स्थविरं च वाजं वृत्रेषु शत्रून्त्सुहना कृधी नः ॥ ६२५
२ ० ० ०४१२a सहर्षभाः सहवत्सा उदेत विश्वा रूपाणी बिभ्रतीर्द्धूर्द्रीः ।
२ ० ० ०४१२c उरुः पृथुरयं वो अस्तु लोक इमा आपः सुप्रपाणा इह स्त ॥ ६२६

२ ० ० ०५०१a अग्न आयूँषि पवस आसुवोर्जमिषं च नः ।
२ ० ० ०५०१c आरे बाधस्व दुच्छुनाम् ॥ ६२७
२ ० ० ०५०२a विभ्राड्बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम् ।
२ ० ० ०५०२c वातजूतो यो अभिरक्षति त्मना प्रजाः पिपर्ति बहुधा वि राजति ॥ ६२८
२ ० ० ०५०३a चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
२ ० ० ०५०३c आप्रा द्यावापृथिवी अन्तरिक्षँ सूर्य आत्मा जगतस्तस्थुषश्च ॥ ६२९
२ ० ० ०५०४a आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः ।
२ ० ० ०५०४c पितरं च प्रयन्त्स्वः ॥ ६३०
२ ० ० ०५०५a अन्तश्चरति रोचनास्य प्राणादपानती ।
२ ० ० ०५०५c व्यख्यन्महिषो दिवम् ॥ ६३१
२ ० ० ०५०६a त्रिँषद्धाम वि राजति वाक्पतङ्गाय धीयते ।
२ ० ० ०५०६c प्रति वस्तोरह द्युभिः ॥ ६३२
२ ० ० ०५०७a अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः ।
२ ० ० ०५०७c सूराय विश्वचक्षसे ॥ ६३३
२ ० ० ०५०८a अदृश्रन्नस्य केतवो वि रश्मयो जनाँ अनु ।
२ ० ० ०५०८c भ्राजन्तो अग्नयो यथा ॥ ६३४
२ ० ० ०५०९a तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य ।
२ ० ० ०५०९c विश्वमाभासि रोचनम् ॥ ६३५
२ ० ० ०५१०a प्रत्यङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषान् ।
२ ० ० ०५१०c प्रत्यङ् विश्वँ स्वर्दृशे ॥ ६३६
२ ० ० ०५११a येना पावक चक्षसा भुरण्यन्तं जनाँ अनु ।
२ ० ० ०५११c त्वं वरुण पश्यसि ॥ ६३७
२ ० ० ०५१२a उद्द्यामेषि रजः पृथ्वहा मिमानो अक्तुभिः ।
२ ० ० ०५१२c पश्यञ्जन्मानि सूर्य ॥ ६३८
२ ० ० ०५१३a अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्त्र्यः ।

२ ० ० ०५१३c ताभिर्याति स्वयुक्तिभिः ॥ ६३९
२ ० ० ०५१४a सप्त त्वा हरितो रथे वहन्ति देव सूर्य ।
२ ० ० ०५१४c शोचिष्केशं विचक्षण ॥ ६४०
॥ इत्यारण्यं पर्व काण्डम् ॥

महानाम्न्य आर्चिकः

३ ० ० ०००१a विदा मघवन् विदा गातुमनुशँसिषो दिशः ।
३ ० ० ०००१c शिक्षा शचीनां पते पूर्वीणां पुरूवसो ॥ ६४१
३ ० ० ०००२a आभिष्ट्वमभिष्टिभिः स्वाऽ३न्नाँशुः ।
३ ० ० ०००२c प्रचेतन प्रचेतयेन्द्र द्युम्नाय न इषे ॥ ६४२
३ ० ० ०००३a एवा हि शक्रो राये वाजाय वज्रिवः ।
३ ० ० ०००३c शविष्ठ वज्रिन्नृञ्जसे मँहिष्ठ वज्रिन्नृञ्जस ।
३ ० ० ०००३e आ याहि पिब मत्स्व ॥ ६४३
३ ० ० ०००४a विदा राये सुवीर्यं भवो वाजानां पतिर्वशाँ अनु ।
३ ० ० ०००४c मँहिष्ठ वज्रिन्नृञ्जसे यः शविष्ठः शूराणाम् ॥ ६४४
३ ० ० ०००५a यो मँहिष्ठो मघोनाम्ँशुर्न्न शोचिः ।
३ ० ० ०००५c चिकित्वो अभि नो नयेन्द्रो विदे तमु स्तुहि ॥ ६४५
३ ० ० ०००६a ईशे हि शक्रस्तमूतये हवामहे जेतारमपराजितम् ।
३ ० ० ०००६c स नः स्वर्षदति द्विषः क्रतुश्छन्द ऋतं बृहत् ॥ ६४६
३ ० ० ०००७a इन्द्रं धनस्य सातये हवामहे जेतारमपराजितम् ।
३ ० ० ०००७c स नः स्वर्षदति द्विषः स नः स्वर्षदति द्विषः ॥ ६४७
३ ० ० ०००८a पूर्वस्य यत्ते अद्रिवोँऽशुर्मदाय ।
३ ० ० ०००८c सुम्न आ धेहि नो वसो पूर्तिः शविष्ठ शस्यते ।
३ ० ० ०००८e वशी हि शक्रो नूनं तन्नव्यँ संन्यसे ॥ ६४८
३ ० ० ०००९a प्रभो जनस्य वृत्रहन्त्समर्येषु ब्रवावहै ।
३ ० ० ०००९c शूरो यो गोषु गच्छति सखा सुशेवो अद्वयुः ॥ ६४९
अथ पञ्च पुरीषपदानि
३ ० ० ००१०a एवाह्योऽ३ऽ३ऽ३वा । एवा ह्यग्ने । एवाहीन्द्र ।
३ ० ० ००१०c एवा हि पूषन् । एवा हि देवाः ॐ एवाहि देवाः ॥ ६५०
॥ इति पञ्च पुरीषपदानि ॥

॥ इति महानाम्न्यार्चिकः ॥

उत्तर आर्चिकः

प्रथम प्रपाठकः । प्रथमोऽर्धः

असितः काश्यपो देवलो वा। गायत्री। पवमानः सोमः।

४ १ १ ०१ ०१a उपास्मै गायता नरः पवमानायेन्दवे ।
४ १ १ ०१ ०१c अभि देवाँ इयक्षते ॥ ६५१
४ १ १ ०१ ०२a अभि ते मधुना पयोऽथर्वाणो अशिश्रयुः ।
४ १ १ ०१ ०२c देवं देवाय देवयु ॥ ६५२
४ १ १ ०१ ०३a स नः पवस्व शं गवे शं जनाय शमर्वते ।
४ १ १ ०१ ०३c शँ राजन्नोषधीभ्यः ॥ ६५३

कश्यपो मारीचः। गायत्री। पवमानः सोमः।

४ १ १ ०२ ०१a दविद्युतत्या रुचा परिष्टोभन्त्या कृपा ।
४ १ १ ०२ ०१c सोमाः शुक्रा गवाशिरः ॥ ६५४
४ १ १ ०२ ०२a हिन्वानो हेतृभिर्हित आ वाजं वाज्यक्रमीत् ।
४ १ १ ०२ ०२c सीदन्तो वनुषो यथा ॥ ६५५
४ १ १ ०२ ०३a ऋधक्सोम स्वस्तये सञ्जग्मानो दिवा कवे ।
४ १ १ ०२ ०३c पवस्व सूर्यो दृशे ॥ ६५६

शतं वैखानसाः, गायत्री, पवमानः सोमः।

४ १ १ ०३ ०१a पवमानस्य ते कवे वाजिन्त्सर्गा असृक्षते ।
४ १ १ ०३ ०१c अर्वन्तो न श्रवस्यवः ॥ ६५७
४ १ १ ०३ ०२a अच्छा कोशं मधुश्चुतमसृग्रं वारे अव्यये ।
४ १ १ ०३ ०२c अवावशन्त धीतयः ॥ ६५८
४ १ १ ०३ ०३a अच्छा समुद्रमिन्दवोऽस्तं गावो न धेनवः ।
४ १ १ ०३ ०३c अग्मन्नृतस्य योनिमा ॥ ६५९

भरद्वाजो बार्हस्पत्यः, गायत्री, अग्निः।

४ १ १ ०४ ०१a अग्न आ याहि वीतये गृणानो हव्यदातये ।
४ १ १ ०४ ०१c नि होता सत्सि बर्हिषि ॥ ६६०
४ १ १ ०४ ०२a तं त्वा समिद्भिरङ्गिरो घृतेन वर्धयामसि ।
४ १ १ ०४ ०२c बृहच्छोचा यविष्ठ्य ॥ ६६१
४ १ १ ०४ ०३a स नः पृथु श्रवाय्यमच्छा देव विवाससि ।
४ १ १ ०४ ०३c बृहदग्ने सुवीर्यम् ॥ ६६२

विश्वामित्रो गाथिनः जमदग्निर्वा, गायत्री, मित्रावरुणौ।

४ १ १ ०५ ०१a आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम् ।
४ १ १ ०५ ०१c मध्वा रजाँसि सुक्रतू ॥ ६६३
४ १ १ ०५ ०२a उरुशँसा नमोवृधा मह्ना दक्षस्य राजथः ।
४ १ १ ०५ ०२c द्राघिष्ठाभिः शुचिव्रता ॥ ६६४
४ १ १ ०५ ०३a गृणाना जमदग्निना योनावृतस्य सीदतम् ।
४ १ १ ०५ ०३c पातँ सोममृतावृधा ॥ ६६५

इरीम्बिठिः काण्वः। गायत्री। इन्द्रः।
४ १ १ ०६ ०३a आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमम् ।
४ १ १ ०६ ०३c एदं बर्हिः सदो मम ॥ ६६६
४ १ १ ०६ ०३a आ त्वा ब्रह्मयुजा हरी वहतामिन्द्र केशिना ।
४ १ १ ०६ ०३c उप ब्रह्माणि नः शृणु ॥ ६६७
४ १ १ ०६ ०३a ब्रह्माणस्त्वा युजा वयँ सोमपामिन्द्र सोमिनः ।
४ १ १ ०६ ०३c सुतावन्तो हवामहे ॥ ६६८

विश्वामित्रो गाथिनः। गायत्री। इन्द्राग्नी।
४ १ १ ०७ ०१a इन्द्राग्नी आ गतँ सुतं गीर्भिर्नभो वरेण्यम् ।
४ १ १ ०७ ०१c अस्य पातं धियेषिता ॥ ६६९
४ १ १ ०७ ०२a इन्द्राग्नी जरितुः सचा यज्ञो जिगाति चेतनः ।
४ १ १ ०७ ०२c अया पातमिमँ सुतम् ॥ ६७०
४ १ १ ०७ ०३a इन्द्रमग्निं कविच्छदा यज्ञस्य जूत्या वृणे ।
४ १ १ ०७ ०३c ता सोमस्येह तृम्पताम् ॥ ६७१

अमहीयुराङ्गिरसः। गायत्री। पवमानः सोमः।
४ १ १ ०८ ०१a उच्चा ते जातमन्धसो दिवि सद्भूम्या ददे ।
४ १ १ ०८ ०१c उग्रँ शर्म महि श्रवः ॥ ६७२
४ १ १ ०८ ०२a स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः ।
४ १ १ ०८ ०२c वरिवोवित्परि स्रव ॥ ६७३
४ १ १ ०८ ०३a एना विश्वान्यर्य आ द्युम्नानि मानुषाणाम् ।
४ १ १ ०८ ०३c सिषासन्तो वनामहे ॥ ६७४

४ १ १ ०९ ०१a पुनानः सोम धारयापो वसानो अर्षसि ।
४ १ १ ०९ ०१c आ रत्नधा योनिमृतस्य सीदस्युत्सो देवो हिरण्ययः ॥ ६७५
४ १ १ ०९ ०२a दुहान ऊधर्दिव्यं मधु प्रियं प्रत्नँ सधस्थमासदत् ।

४ १ १ ०९ ०२c आपृच्छ्यं धरुणं वाज्यर्षसि नृभिर्धौतो विचक्षणः ॥ ६७६

४ १ १ १० ०१a प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजमर्ष ।
४ १ १ १० ०१c अश्वं न त्वा वाजिनं मर्जयन्तोऽच्छा बर्ही रशनाभिर्नयन्ति ॥ ६७७
४ १ १ १० ०२a स्वायुधः पवते देव इन्दुरशस्तिहा वृजना रक्षमाणः ।
४ १ १ १० ०२c पिता देवानां जनिता सुदक्षो विष्टम्भो दिवो धरुणः पृथिव्याः ॥ ६७८
४ १ १ १० ०३a ऋषिर्विप्रः पुरएता जनानामृभुर्धीर उशना काव्येन ।
४ १ १ १० ०३c स चिद्विवेद निहितं यदासामपीच्याꣳ गुह्यं नाम गोनाम् ॥ ६७९

४ १ १ ११ ०१a अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः ।
४ १ १ ११ ०१c ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥ ६८०
४ १ १ ११ ०२a न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।
४ १ १ ११ ०२c अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे ॥ ६८१

४ १ १ १२ ०१a कया नश्चित्र आ भुवदूती सदावृधः सखा ।
४ १ १ १२ ०१c कया शचिष्ठया वृता ॥ ६८२
४ १ १ १२ ०२a कस्त्वा सत्यो मदानां मँहिष्ठो मत्सदन्धसः ।
४ १ १ १२ ०२c दृढा चिदारुजे वसु ॥ ६८३
४ १ १ १२ ०३a अभी षु णः सखीनामविता जरितॄणाम् ।
४ १ १ १२ ०३c शतं भवास्यूतये ॥ ६८४

४ १ १ १३ ०१a तं वो दस्ममृतीषहं वसोर्मन्दानमन्धसः ।
४ १ १ १३ ०१c अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर्नवामहे ॥ ६८५
४ १ १ १३ ०२a द्युक्षँ सुदानुं तविषीभिरावृतं गिरिं न पुरुभोजसम् ।
४ १ १ १३ ०२c क्षुमन्तं वाजँ शतिनँ सहस्रिणं मक्षू गोमन्तमीमहे ॥ ६८६

४ १ १ १४ ०१a तरोभिर्वो विदद्वसुमिन्द्रँ सबाध ऊतये ।
४ १ १ १४ ०१c बृहद्गायन्तः सुतसोमे अध्वरे हुवे भरं न कारिणम् ॥ ६८७
४ १ १ १४ ०२a न यं दुध्रा वरन्ते न स्थिरा मुरो मदेषु शिप्रमन्धसः ।
४ १ १ १४ ०२c य आदृत्या शशमानाय सुन्वते दाता जरित्र उक्थ्यम् ॥ ६८८

४ १ १ १५ ०१a स्वादिष्ठया मदिष्ठया पवस्व सोम धारया ।
४ १ १ १५ ०१c इन्द्राय पातवे सुतः ॥ ६८९
४ १ १ १५ ०२a रक्षोहा विश्वचर्षणिरभि योनिमयोहते ।
४ १ १ १५ ०२c द्रोणे सधस्थमासदत् ॥ ६९०

४ १ १ १५ ०३a वरिवोधातमो भुवो मँहिष्ठो वृत्रहन्तमः ।
४ १ १ १५ ०३c पर्षि राधो मघोनाम् ॥ ६९१

४ १ १ १६ ०१a पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः ।
४ १ १ १६ ०१c महि द्युक्षतमो मदः ॥ ६९२
४ १ १ १६ ०२a यस्य ते पीत्वा वृषभो वृषायतेऽस्य पीत्वा स्वर्विदः ।
४ १ १ १६ ०२c स सुप्रकेतो अभ्यक्रमीदिषोऽच्छा वाजं नैतशः ॥ ६९३

४ १ १ १७ ०१a इन्द्रमच्छ सुता इमे वृषणं यन्तु हरयः ।
४ १ १ १७ ०१c श्रुष्टे जातास इन्दवः स्वर्विदः ॥ ६९४
४ १ १ १७ ०२a अयं भराय सानसिरिन्द्राय पवते सुतः ।
४ १ १ १७ ०२c सोमो जैत्रस्य चेतति यथा विदे ॥ ६९५
४ १ १ १७ ०३a अस्येदिन्द्रो मदेष्वा ग्राभं गृभ्णाति सानसिम् ।
४ १ १ १७ ०३c वज्रं च वृषणं भरत्समप्सुजित् ॥ ६९६

४ १ १ १८ ०१a पुरोजिती वो अन्धसः सुताय मादयित्नवे ।
४ १ १ १८ ०१c अप श्वानँ श्नथिष्टन सखायो दीर्घजिह्व्यम् ॥ ६९७
४ १ १ १८ ०२a यो धारया पावकया परिप्रस्यन्दते सुतः ।
४ १ १ १८ ०२c इन्दुरश्वो न कृत्व्यः ॥ ६९८
४ १ १ १८ ०३a तं दुरोषमभी नरः सोमं विश्वाच्या धिया ।
४ १ १ १८ ०३c यज्ञाय सन्त्वद्रयः ॥ ६९९

४ १ १ १९ ०१a अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु वर्धते ।
४ १ १ १९ ०१c आ सूर्यस्य बृहतो बृहन्नधि रथं विष्वञ्चमरुहद्विचक्षणः ॥ ७००
४ १ १ १९ ०२a ऋतस्य जिह्वा पवते मधु प्रियं वक्ता पतिर्धियो अस्या अदाभ्यः ।
४ १ १ १९ ०२c दधाति पुत्रः पित्रोरपीच्याꣳ नाम तृतीयमधि रोचनं दिवः ॥ ७०१
४ १ १ १९ ०३a अव द्युतानः कलशाँ अचिक्रदन्नृभिर्येमाणः कोश आ हिरण्यये ।
४ १ १ १९ ०३c अभी ऋतस्य दोहना अनूषताधि त्रिपृष्ठ उषसो वि राजसि ॥ ७०२

४ १ १ २० ०१a यज्ञायज्ञा वो अग्नये गिरागिरा च दक्षसे ।
४ १ १ २० ०१c प्रप्र वयममृतं जातवेदसं प्रियं मित्रं न शँसिषम् ॥ ७०३
४ १ १ २० ०२a ऊर्जो नपातँ स हिनायमस्मयुर्दाशेम हव्यदातये ।
४ १ १ २० ०२c भुवद्वाजेष्वविता भुवद्वृध उत त्राता तनूनाम् ॥ ७०४

४ १ १ २१ ०१a एह्यू षु ब्रवाणि तेऽग्न इत्थेतरा गिरः ।

४ १ १ २१ ०१c एभिर्वर्धास इन्दुभिः ॥ ७०५
४ १ १ २१ ०२a यत्र क्व च ते मनो दक्षं दधस उत्तरम् ।
४ १ १ २१ ०२c तत्रा योनिं कृणवसे ॥ ७०६
४ १ १ २१ ०३a न हि ते पूर्तमक्षिपद्भुवन्नेमानां पते ।
४ १ १ २१ ०३c अथा दुवो वनवसे ॥ ७०७

४ १ १ २२ ०१a वयमु त्वामपूर्व्य स्थूरं न कच्चिद्भरन्तोऽवस्यवः ।
४ १ १ २२ ०१c वज्रिंश्चित्रँ हवामहे ॥ ७०८
४ १ १ २२ ०२a उप त्वा कर्मन्नूतये स नो युवोग्रश्चक्राम यो धृषत् ।
४ १ १ २२ ०२c त्वामिध्यवितारं ववृमहे सखाय इन्द्र सानसिम् ॥ ७०९

४ १ १ २३ ०१a अधा हीन्द्र गिर्वण उप त्वा काम ईमहे ससृग्महे ।
४ १ १ २३ ०१c उदेव ग्मन्त उदभिः ॥ ७१०
४ १ १ २३ ०२a वार्ण त्वा यव्याभिर्वर्धन्ति शूर ब्रह्माणि ।
४ १ १ २३ ०२c ववृध्वाँसं चिदद्रिवो दिवेदिवे ॥ ७११
४ १ १ २३ ०३a पुञ्जन्ति हरी इषिरस्य गाथयोरौ रथ उरुयुगे वचोयुजा ।
४ १ १ २३ ०३c इन्द्रवाहा स्वर्विदा ॥ ७१२

प्रथम प्रपाठकः । द्वितीयोऽर्धः
४ १ २ ०१ ०१a पान्तमा वो अन्धस इन्द्रमभि प्र गायत ।
४ १ २ ०१ ०१c विश्वासाहँ शत्क्रतुं मँहिष्ठं चर्षणीनाम् ॥ ७१३
४ १ २ ०१ ०२a पुरुहूतं पुरुष्टुतं गाथान्याइँ सनश्रुतम् ।
४ १ २ ०१ ०२c इन्द्र इति ब्रवीतन ॥ ७१४
४ १ २ ०१ ०३a इन्द्र इन्नो महोनां दाता वाजानां नृतुः ।
४ १ २ ०१ ०३c महाँ अभिज्ञ्वा यमत् ॥ ७१५

४ १ २ ०२ ०१a प्र व इन्द्राय मादनँ हर्यश्वाय गायत ।
४ १ २ ०२ ०१c सखायः सोमपाव्ने ॥ ७१६
४ १ २ ०२ ०२a शँसेदुक्थँ सुदानव उत द्युक्षं यथ नरः ।
४ १ २ ०२ ०२c चकृमा सत्यराधसे ॥ ७१७
४ १ २ ०२ ०३a त्वं न इन्द्र वाजयुस्त्वं गव्युः शतक्रतो ।
४ १ २ ०२ ०३c त्वँ हिरण्ययुर्वसो ॥ ७१८

४ १ २ ०३ ०१a वयमु त्वा तदिदर्था इन्द्र त्वायन्तः सखायः ।
४ १ २ ०३ ०१c कण्वा उक्थेभिर्जरन्ते ॥ ७१९

४ १ २ ०३ ०२a न घेमन्यदा पपन वज्रिन्नपसो नविष्टौ ।
४ १ २ ०३ ०२c तवेदु स्तोमैश्चिकेत ॥ ७२०
४ १ २ ०३ ०३a इच्छन्ति देवाः सुन्वन्तं न स्वप्नाय स्पृहयन्ति ।
४ १ २ ०३ ०३c यन्ति प्रमादमतन्द्राः ॥ ७२१

४ १ २ ०४ ०१a इन्द्राय मद्वे सुतं परि ष्टोभन्तु नो गिरः ।
४ १ २ ०४ ०१c अर्कमर्चन्तु कारवः ॥ ७२२
४ १ २ ०४ ०२a यस्मिन्विश्वा अधि श्रियो रणन्ति सप्त सँसदः ।
४ १ २ ०४ ०२c इन्द्रँ सुते हवामहे ॥ ७२३
४ १ २ ०४ ०३a त्रिकद्रुकेषु चेतनं देवासो यज्ञमत्नत ।
४ १ २ ०४ ०३c तमिद्वर्धन्तु नो गिरः ॥ ७२४

४ १ २ ०५ ०१a अयं त इन्द्र सोमो निपूतो अधि बर्हिषि ।
४ १ २ ०५ ०१c एहीमस्य द्रवा पिब ॥ ७२५
४ १ २ ०५ ०२a शाचिगो शाचिपूजनायँ रणाय ते सुतः ।
४ १ २ ०५ ०२c आखण्डल प्र हूयसे ॥ ७२६
४ १ २ ०५ ०३a यस्ते शृङ्गवृषो णपात्प्रणपात्कुण्डपाय्यः ।
४ १ २ ०५ ०३c न्यस्मिं दध्र आ मनः ॥ ७२७

४ १ २ ०६ ०१a आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभँ सं गृभाय ।
४ १ २ ०६ ०१c महाहस्ति दक्षिणेन ॥ ७२८
४ १ २ ०६ ०२a विद्मा हि त्वा तुविकूर्मिं तुविदेष्णं तुवीमघम् ।
४ १ २ ०६ ०२c तुविमात्रमवोभिः ॥ ७२९
४ १ २ ०६ ०३a न हि त्वा शूर देवा न मर्तासो दित्सन्तम् ।
४ १ २ ०६ ०३c भीमं न गां वारयन्ते ॥ ७३०

४ १ २ ०७ ०१a अभि त्वा वृषभा सुते सुतँ सृजामि पीतये ।
४ १ २ ०७ ०१c तृम्पा व्यश्नुही मदम् ॥ ७३१
४ १ २ ०७ ०२a मा त्वा मूरा अविष्यवो मोपहस्वान आ दभन् ।
४ १ २ ०७ ०२c मा कीं ब्रह्मद्विषं वनः ॥ ७३२
४ १ २ ०७ ०३a इह त्वा गोपरीणसं महे मन्दन्तु राधसे ।
४ १ २ ०७ ०३c सरो गौरो यथा पिब ॥ ७३३

४ १ २ ०८ ०१a इदम् वसो सुतमन्धः पिबा सुपूर्णमुदरम् ।
४ १ २ ०८ ०१c अनाभयिन्नरिमा ते ॥ ७३४

४ १ २ ०८ ०२a नृभिर्धौतः सुतो अश्नैरव्या वारैः परिपूतः ।
४ १ २ ०८ ०२c अश्वो न निक्तो नदीषु ॥ ७३५
४ १ २ ०८ ०३a तं ते यवं यथा गोभिः स्वादुमकर्म श्रीणन्तः ।
४ १ २ ०८ ०३c इन्द्र त्वास्मिन्त्सधमादे ॥ ७३६

४ १ २ ०९ ०१a इदँ ह्यन्वोजसा सुतँ राधानां पते ।
४ १ २ ०९ ०१c पिबा त्वा३स्य गिर्वणः ॥ ७३७
४ १ २ ०९ ०२a यस्ते अनु स्वधामसत्सुते नि यच्छ तन्वम् ।
४ १ २ ०९ ०२c स त्वा ममत्तु सोम्यम् ॥ ७३८
४ १ २ ०९ ०३a प्र ते अश्नोतु कुक्ष्योः प्रेन्द्र ब्रह्मणा शिरः ।
४ १ २ ०९ ०३c प्र बाहू शूर राधसा ॥ ७३९

४ १ २ १० ०१a आ त्वेता नि षीदतेन्द्रमभि प्र गायत ।
४ १ २ १० ०१c सखाय स्तोमवाहसः ॥ ७४०
४ १ २ १० ०२a पुरूतमं पुरूणामीशानं वार्याणाम् ।
४ १ २ १० ०२c इन्द्रँ सोमे सचा सुते ॥ ७४१
४ १ २ १० ०३a स घा नो योग आ भुवत्स राये स पुरन्ध्या ।
४ १ २ १० ०३c गमद्वाजेभिरा स नः ॥ ७४२

४ १ २ ११ ०१a योगेयोगे तवस्तरं वाजेवाजे हवामहे ।
४ १ २ ११ ०१c सखाय इन्द्रमूतये ॥ ७४३
४ १ २ ११ ०२a अनु प्रत्नस्यौकसो हुवे तुविप्रतिं नरम् ।
४ १ २ ११ ०२c यं ते पूर्वं पिता हुवे ॥ ७४४
४ १ २ ११ ०३a आ घा गमद्यदि श्रवत्सहस्रिणीभिरूतिभिः ।
४ १ २ ११ ०३c वाजेभिरुप नो हवम् ॥ ७४५

४ १ २ १२ ०१a इन्द्र सुतेषु सोमेषु क्रतुं पुनीष उक्थ्यम् ।
४ १ २ १२ ०१c विदे वृधस्य दक्षस्य महाँ हि षः ॥ ७४६
४ १ २ १२ ०२a स प्रथमे व्योमनि देवानाँ सदने वृधः ।
४ १ २ १२ ०२c सुपारः सुश्रवस्तमः समप्सुजित् ॥ ७४७
४ १ २ १२ ०३a तमु हुवे वाजसातय इन्द्रं भराय शुष्मिणम् ।
४ १ २ १२ ०३c भवा नः सुम्ने अन्तमः सखा वृधे ॥ ७४८

४ १ २ १३ ०१a एना वो अग्निं नमसोर्जो नपातमा हुवे ।
४ १ २ १३ ०१c प्रियं चेतिष्ठमरतिँ स्वध्वरं विश्वस्य दूतममृतम् ॥ ७४९

४ १ २ १३ ०२a स योजते अरुषा विश्वभोजसा स दुद्रवत्स्वाहुतः ।
४ १ २ १३ ०२c सुब्रह्मा यज्ञः सुशमी वसूनां देवँ राधो जनानाम् ॥ ७५०

४ १ २ १४ ०१a प्रत्यु अदर्श्यायत्यू३च्छन्ती दुहिता दिवः ।
४ १ २ १४ ०१c अपो मही वृणुते चक्षुषा तमो ज्योतिष्कृणोति सूनरी ॥ ७५१
४ १ २ १४ ०२a उदुस्रियाः सृजते सूर्यः सचा उद्यन्नक्षत्रमर्चिवत् ।
४ १ २ १४ ०२c तवेदुषो व्युषि सूर्यस्य च सं भक्तेन गमेमहि ॥ ७५२

४ १ २ १५ ०१a इमा उ वां दिविष्टय उस्रा हवन्ते अश्विना ।
४ १ २ १५ ०१c अयं वामह्वेऽवसे शचीवसू विशंविशँ हि गच्छथः ॥ ७५३
४ १ २ १५ ०२a युवं चित्रं ददथुर्भोजनं नरा चोदेथाँ सूनृतावते ।
४ १ २ १५ ०२c अर्वाग्रथँ समनसा नि यच्छतं पिबतँ सोम्यं मधु ॥ ७५४

४ १ २ १६ ०१a अस्य प्रत्नामनु द्युतँ शुक्रं दुदुह्रे अह्रयः ।
४ १ २ १६ ०१c पयः सहस्रसामृषिम् ॥ ७५५
४ १ २ १६ ०२a अयँ सूर्य इवोपदृगयँ सराँसि धावति ।
४ १ २ १६ ०२c सप्त प्रवत आ दिवम् ॥ ७५६
४ १ २ १६ ०३a अयं विश्वानि तिष्ठति पुनानो भुवनोपरि ।
४ १ २ १६ ०३c सोमो देवो न सूर्यः ॥ ७५७

४ १ २ १७ ०१a एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः ।
४ १ २ १७ ०१c हरिः पवित्रे अर्षति ॥ ७५८
४ १ २ १७ ०२a एष प्रत्नेन मन्मना देवो देवेभ्यस्परि ।
४ १ २ १७ ०२c कविर्विप्रेण वावृधे ॥ ७५९
४ १ २ १७ ०३a दुहानः प्रत्नमित्पयः पवित्रे परि षिच्यसे ।
४ १ २ १७ ०३c क्रन्दं देवाँ अजीजनः ॥ ७६०

४ १ २ १८ ०१a उप शिक्षापतस्थुषो भियसमा धेहि शत्रवे ।
४ १ २ १८ ०१c पवमान विदा रयिम् ॥ ७६१
४ १ २ १८ ०२a उषो षु जातमप्तुरं गोभिर्भङ्गं परिष्कृतम् ।
४ १ २ १८ ०२c इन्दुं देवा अयासिषुः ॥ ७६२
४ १ २ १८ ०३a उपास्मै गायता नरः पवमानायेन्दवे ।
४ १ २ १८ ०३c अभि देवाँ इयक्षते ॥ ७६३

४ १ २ १९ ०१a प्र सोमासो विपश्चितोऽपो नयन्त ऊर्मयः ।
४ १ २ १९ ०१c वनानि महिषा इव ॥ ७६४

४ १ २ १९ ०२a अभि द्रोणानि बभ्रवः शुक्रा ऋतस्य धारया ।
४ १ २ १९ ०२c वाजं गोमन्तमक्षरन् ॥ ७६५
४ १ २ १९ ०३a सुता इन्द्राय वायवे वरुणाय मरुद्भ्यः ।
४ १ २ १९ ०३c सोमा अर्षन्तु विष्णवे ॥ ७६६

४ १ २ २० ०१a प्र सोम देववीतये सिन्धुर्न पिप्ये अर्णसा ।
४ १ २ २० ०१c अँशोः पयसा मदिरो न जागृविरच्छा कोशं मधुश्चुतम् ॥ ७६७
४ १ २ २० ०२a आ हर्यतो अर्जुनो अत्के अव्यत प्रियः सूनुर्न मर्ज्यः ।
४ १ २ २० ०२c तमीँ हिन्वन्त्यपसो यथा रथं नदीष्वा गभस्त्योः ॥ ७६८

४ १ २ २१ ०१a प्र सोमासो मदच्युतः श्रवसे नो मघोनाम् ।
४ १ २ २१ ०१c सुता विदथे अक्रमुः ॥ ७६९
४ १ २ २१ ०२a आदीँ हँसो यथा गणं विश्वस्यावीवशन्मतिम् ।
४ १ २ २१ ०२c अत्यो न गोभिरज्यते ॥ ७७०
४ १ २ २१ ०३a आदीं त्रितस्य योषणो हरिँ हिन्वन्त्यद्रिभिः ।
४ १ २ २१ ०३c इन्दुमिन्द्राय पीतये ॥ ७७१

४ १ २ २२ ०१a अया पवस्व देवयु रेभन्पवित्रं पर्येषि विश्वतः ।
४ १ २ २२ ०१c मधोर्धारा असृक्षत ॥ ७७२
४ १ २ २२ ०२a पवते हर्यतो हरिरति ह्वराँसि रँह्या ।
४ १ २ २२ ०२c अभ्यर्ष स्तोतृभ्यो वीरवद्यशः ॥ ७७३
४ १ २ २२ ०३a प्र सुन्वानास्यान्धसो मर्तो न वष्ट तद्वचः ।
४ १ २ २२ ०३c अप श्वानमराधसँ हता मखं न भृगवः ॥ ७७४

द्वितीय प्रपाठकः । प्रथमोऽर्धः
४ २ १ ०१ ०१a पवस्व वाचो अग्रियः सोम चित्राभिरूतिभिः ।
४ २ १ ०१ ०१c अभि विश्वानि काव्या ॥ ७७५
४ २ १ ०१ ०२a त्वँ समुद्रिया अपोऽग्रियो वाच ईरयन् ।
४ २ १ ०१ ०२c पवस्व विश्वचर्षणे ॥ ७७६
४ २ १ ०१ ०३a तुभ्येमा भुवना कवे महिम्ने सोम तस्थिरे ।
४ २ १ ०१ ०३c तुभ्यं धावन्ति धेनवः ॥ ७७७

४ २ १ ०२ ०१a पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने ।
४ २ १ ०२ ०१c विश्वा अप द्विषो जहि ॥ ७७८
४ २ १ ०२ ०२a यस्य ते सख्ये वयँ सासह्याम पृतन्यतः ।

४ २ १ ०२ ०२c तवेन्दो द्युम्न उत्तमे ॥ ७७९
४ २ १ ०२ ०३a या ते भीमान्यायुधा तिग्मानि सन्ति धूर्वणे ।
४ २ १ ०२ ०३c रक्षा समस्य नो निदः ॥ ७८०

४ २ १ ०३ ०१a वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः ।
४ २ १ ०३ ०१c वृषा धर्माणि दध्रिषे ॥ ७८१
४ २ १ ०३ ०२a वृष्णस्ते वृष्ण्यँ शवो वृषा वनं वृषा सुतः ।
४ २ १ ०३ ०२c स त्वं वृषन्वृषेदसि ॥ ७८२
४ २ १ ०३ ०३a अश्वो न चक्रदो वृषा सं गा इन्दो समर्वतः ।
४ २ १ ०३ ०३c वि नो राये दुरो वृधि ॥ ७८३

४ २ १ ०४ ०१a वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे ।
४ २ १ ०४ ०१c पवमान स्वर्दृशम् ॥ ७८४
४ २ १ ०४ ०२a यदद्भिः परिशिच्यसे मर्मृज्यमान आयुभिः ।
४ २ १ ०४ ०२c द्रोणे सधस्थमश्नुषे ॥ ७८५
४ २ १ ०४ ०३a आ पवस्व सुवीर्यं मन्दमानः स्वायुध ।
४ २ १ ०४ ०३c इहो ष्विन्दवा गहि ॥ ७८६

४ २ १ ०५ ०१a पवमानस्य ते वयं पवित्रमभ्युन्दतः ।
४ २ १ ०५ ०१c सखित्वमा वृणीमहे ॥ ७८७
४ २ १ ०५ ०२a ये ते पवित्रमूर्मयोऽभिक्षरन्ति धारया ।
४ २ १ ०५ ०२c तेभिर्नः सोम मृडय ॥ ७८८
४ २ १ ०५ ०३a स नः पुनान आ भर रयिं वीरवतीमिषम्
४ २ १ ०५ ०३c ईशानः सोम विश्वतः ॥ ७८९

४ २ १ ०६ ०१a अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् ।
४ २ १ ०६ ०१c अस्य यज्ञस्य सुक्रतुम् ॥ ७९०
४ २ १ ०६ ०२a अग्निमग्निँ हवीमभिः सदा हवन्त विश्पतिम् ।
४ २ १ ०६ ०२c हव्यवाहं पुरुप्रियम् ॥ ७९१
४ २ १ ०६ ०३a अग्ने देवाँ इहा वह जज्ञानो वृक्तबर्हिषे ।
४ २ १ ०६ ०३c असि होता न ईड्यः ॥ ७९२

४ २ १ ०७ ०१a मित्रं वयँ हवामहे वरुणँ सोमपीतये ।
४ २ १ ०७ ०१c य जाता पूतदक्षसा ॥ ७९३
४ २ १ ०७ ०२a ऋतेन यावृतावृधावृतस्य ज्योतिषस्पती ।

४ २ १ ०७ ०२c ता मित्रावरुणा हुवे ॥ ७९४
४ २ १ ०७ ०३a वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः ।
४ २ १ ०७ ०३c करतां नः सुराधसः ॥ ७९५

४ २ १ ०८ ०१a इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः ।
४ २ १ ०८ ०१c इन्द्रं वाणीरनूषत ॥ ७९६
४ २ १ ०८ ०२a इन्द्र इद्धर्योः सचा सम्मिश्ल आ वचोयुजा ।
४ २ १ ०८ ०२c इन्द्रो वज्री हिरण्ययः ॥ ७९७
४ २ १ ०८ ०३a इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च ।
४ २ १ ०८ ०३c उग्र उग्राभिरूतिभिः ॥ ७९८
४ २ १ ०८ ०४a इन्द्रो दीर्घाय चक्षस आ सूर्यं रोहयद्दिवि ।
४ २ १ ०८ ०४c वि गोभिरद्रिमैरयत् ॥ ७९९

४ २ १ ०९ ०१a इन्द्रे अग्ना नमो बृहत्सुवृक्तिमेरयामहे ।
४ २ १ ०९ ०१c धिया धेना अवस्यवः ॥ ८००
४ २ १ ०९ ०२a ता हि शश्वन्त ईडत इत्था विप्रास ऊतये ।
४ २ १ ०९ ०२c सबाधो वाजसातये ॥ ८०१
४ २ १ ०९ ०३a ता वां गीर्भिर्विपन्युवः प्रयस्वन्तो हवामहे ।
४ २ १ ०९ ०३c मेधसाता सनिष्यवः ॥ ८०२

४ २ १ १० ०१a वृषा पवस्व धारया मरुत्वते च मत्सरः ।
४ २ १ १० ०१c दिश्वा दधान ओजसा ॥ ८०३
४ २ १ १० ०२a तं त्वा धर्त्तारमोण्योऽः पवमान स्वर्दृशम् ।
४ २ १ १० ०२c हिन्वे वाजेषु वाजिनम् ॥ ८०४
४ २ १ १० ०३a अया चित्तो विपानया हरिः पवस्व धारया ।
४ २ १ १० ०३c युजं वाजेषु चोदय ॥ ८०५

४ २ १ ११ ०१a वृषा शोणो अभिकनिक्रदद्गा नदयन्नेषि पृथिवीमुत द्याम् ।
४ २ १ ११ ०१c इन्द्रस्येव वग्नुरा शृण्व आजौ प्रचोदयन्नर्षसि वाचमेमाम् ॥ ८०६
४ २ १ ११ ०२a रसाय्यः पयसा पिन्वमान ईरयन्नेषि मधुमन्तमँशुम् ।
४ २ १ ११ ०२c पवमान सन्तनिमेषि कृण्वन्निन्द्राय सोम परिषिच्यमानः ॥ ८०७
४ २ १ ११ ०३a एवा पवस्व मदिरो मदायोदग्राभस्य नमयन्वधस्नुम् ।
४ २ १ ११ ०३c परि वर्णं भरमाणो रुशन्तं गव्युर्नो अर्ष परि सोम सिक्तः ॥ ८०८

४ २ १ १२ ०१a त्वामिद्धि हवामहे सातौ वाजस्य कारवः ।

४ २ १ १२ ०१c त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥ ८०९
४ २ १ १२ ०२a स त्वं नश्चित्र वज्रहस्त धृष्णुया मह स्तवानो अद्रिवः ।
४ २ १ १२ ०२c गामश्वँ रथ्यमिन्द्र सं किर सत्रा वाजं न जिग्युषे ॥ ८१०

४ २ १ १३ ०१a अभि प्र वः सुराधसमिन्द्रमर्च यथा विदे ।
४ २ १ १३ ०१c यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति ॥ ८११
४ २ १ १३ ०२a शतानीकेव प्र जिगाति धृष्णुया हन्ति वृत्राणि दाशुषे ।
४ २ १ १३ ०२c गिरेरिव प्र रसा अस्य पिन्विरे दत्राणि पुरुभोजसः ॥ ८१२

४ २ १ १४ ०१a त्वामिदा ह्यो नरोऽपीप्यन्वज्रिन्भूर्णयः ।
४ २ १ १४ ०१c स इन्द्र स्तोमवाहस इह श्रुध्युप स्वसरमा गहि ॥ ८१३
४ २ १ १४ ०२a मत्स्वा सुशिप्रिन्हरिवस्तमीमहे त्वया भूषन्ति वेधसः ।
४ २ १ १४ ०२c तव श्रवाँस्युपमान्युक्थ्य सुतेष्विन्द्र गिर्वणः ॥ ८१४

४ २ १ १५ ०१a यस्ते मदो वरेण्यस्तेना पवस्वान्धसा ।
४ २ १ १५ ०१c देवावीरघशँसहा ॥ ८१५
४ २ १ १५ ०२a जघ्निर्वृत्रममित्रियँ सस्निर्वाजं दिवेदिवे ।
४ २ १ १५ ०२c गोषातिरश्वसा असि ॥ ८१६
४ २ १ १५ ०३a सम्मिश्लो अरुषो भुवः सूपस्थाभिर्न धेनुभि ।
४ २ १ १५ ०३c सीदं च्छ्येनो न योनिमा ॥ ८१७

४ २ १ १६ ०१a अयं पूषा रयिर्भगः सोमः पुनानो अर्षति ।
४ २ १ १६ ०१c पतिर्विश्वस्य भूमनो व्यख्यद्रोदसी उभे ॥ ८१८
४ २ १ १६ ०२a समु प्रिया अनूषत गावो मदाय घृष्वयः ।
४ २ १ १६ ०२c सोमासः कृण्वते पथः पवमानास इन्दवः ॥ ८१९
४ २ १ १६ ०३a य ओजिष्ठस्तमा भर पवमान श्रवाय्यम् ।
४ २ १ १६ ०३c यः पञ्च चर्षणीरभि रयिं येन वनामहे ॥ ८२०

४ २ १ १७ ०१a वृषा मतीनां पवते विचक्षणः सोमो अह्नां प्रतरीतोषसां दिवः ।
४ २ १ १७ ०१c प्राणा सिन्धूनां कलशाँ अचिक्रददिन्द्रस्य हार्द्याविशन्मनीषिभिः ॥ ८२१
४ २ १ १७ ०२a मनीषिभिः पवते पूर्व्यः कविर्नृभिर्यतः परि कोशाँ असिष्यदत् ।
४ २ १ १७ ०२c त्रितस्य नाम जनयन्मधु क्षरन्निन्द्रस्य वायूँ सख्याय वर्धयन् ॥ ८२२
४ २ १ १७ ०३a अयं पुनान उषसो अरोचयदयँ सिन्धुभ्यो अभवदु लोककृत् ।

४ २ १ १७ ०३c अयं त्रिः सप्त दुदुहान आशिरँ सोमो हृदे पवते चारु मत्सरः ॥ ८२३

४ २ १ १८ ०१a एवा ह्यसि वीरयुरेवा शूर उत स्थिरह् ।
४ २ १ १८ ०१c एवा ते राध्यं मनः ॥ ८२४
४ २ १ १८ ०२a एवा रातिस्तुवीमघ विश्वेभिर्धायि धातृभिः ।
४ २ १ १८ ०२c अधा चिदिन्द्र नः सचा ॥ ८२५
४ २ १ १८ ०३a मो षु ब्रह्मेव तदिन्द्रयुर्भुवो वाजानां पते ।
४ २ १ १८ ०३c मत्स्वा सुतस्य गोमतः ॥ ८२६

४ २ १ १९ ०१a इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः ।
४ २ १ १९ ०१c रथीतमँ रथीनां वाजानाँ सत्पतिं पतिम् ॥ ८२७
४ २ १ १९ ०२a सख्ये त इन्द्र वाजिनो मा भेम शवसस्पते ।
४ २ १ १९ ०२c त्वामभि प्र नोनुमो जेतारमपराजितम् ॥ ८२८
४ २ १ १९ ०३a पूर्वीरिन्द्रस्य रातयो न वि दस्यन्त्यूतयः ।
४ २ १ १९ ०३c यदा वाजस्य गोमत स्तोतृभ्यो मँहते मघम् ॥ ८२९

द्वितीय प्रपाठकः । द्वितीयोऽर्धः

४ २ २ ०१ ०१a एत असृग्रमिन्दवस्तिरः पवित्रमाशवः ।
४ २ २ ०१ ०१c विश्वान्यभि सौभगा ॥ ८३०
४ २ २ ०१ ०२a विघ्नन्तो दुरिता पुरु सुगा तोकाय वाजिनः ।
४ २ २ ०१ ०२c त्मना कृण्वन्तो अर्वतः ॥ ८३१
४ २ २ ०१ ०३a कृण्वन्तो वरिवो गवेऽभ्यर्षन्ति सुष्टुतिम् ।
४ २ २ ०१ ०३c इडामस्मभ्यँ संयतम् ॥ ८३२

४ २ २ ०२ ०१a राजा मेधाभिरीयते पवमानो मनावधि ।
४ २ २ ०२ ०१c अन्तरिक्षेण यातवे ॥ ८३३
४ २ २ ०२ ०२a आ नः सोम सहो जुवो रूपं न वर्चसे भर ।
४ २ २ ०२ ०२c सुष्वाणो देववीतये ॥ ८३४
४ २ २ ०२ ०३a आ न इन्दो शतग्विनं गवां पोषँ स्वश्व्यम् ।
४ २ २ ०२ ०३c वहा भगत्तिमूतये ॥ ८३५

४ २ २ ०३ ०१a तं त्वा नृम्णानि बिभ्रतँ सधस्थेषु महो दिवः ।
४ २ २ ०३ ०१c चारुँ सुकृत्ययेमहे ॥ ८३६
४ २ २ ०३ ०२a संवृक्तधृष्णुमुक्थ्यं महामहिव्रतं मदम् ।

४ २ २ ०३ ०२c शतं पुरो रुरुक्षणिम् ॥ ८३७
४ २ २ ०३ ०३a अतस्त्वा रयिरभ्ययद्राजानँ सुक्रतो दिवः ।
४ २ २ ०३ ०३c सुपर्णो अव्यथी भरत् ॥ ८३८
४ २ २ ०३ ०४a अधा हिन्वान इन्द्रियं ज्यायो महित्वमानशे ।
४ २ २ ०३ ०४c अभिष्टिकृद्विचर्षणिः ॥ ८३९
४ २ २ ०३ ०५a विश्वस्मा इत्स्वर्दृशे साधारणँ रजस्तुरम् ।
४ २ २ ०३ ०५c गोपामृतस्य विर्भरत् ॥ ८४०

४ २ २ ०४ ०१a इषे पवस्व धारया मृज्यमानो मनीषिभिः ।
४ २ २ ०४ ०१c इन्दो रुचाभि गा इहि ॥ ८४१
४ २ २ ०४ ०२a पुनानो वरिवस्कृध्यूर्जं जनाय गिर्वणः ।
४ २ २ ०४ ०२c हरे सृजान आशिरम् ॥ ८४२
४ २ २ ०४ ०३a पुनानो देववीतय इन्द्रस्य याहि निष्कृतम् ।
४ २ २ ०४ ०३c द्युतानो वाजिभिर्हितः ॥ ८४३

४ २ २ ०५ ०१a अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा ।
४ २ २ ०५ ०१c हव्यवाड्जुह्वास्यः ॥ ८४४
४ २ २ ०५ ०२a यस्त्वामग्ने हविष्पतिर्दूतं देव सपर्यति ।
४ २ २ ०५ ०२c तस्य स्म प्राविता भव ॥ ८४५
४ २ २ ०५ ०३a यो अग्निं देववीतये हविष्माँ आविवासति ।
४ २ २ ०५ ०३c तस्मै पावक मृडय ॥ ८४६

४ २ २ ०६ ०१a मित्रँ हुवे पूतदक्षं वरुणं च रिशादसम् ।
४ २ २ ०६ ०१c धियं घृताचीँ साधन्ता ॥ ८४७
४ २ २ ०६ ०२a ऋतेन मित्रावरुणावृतावृधावृतस्पृशा ।
४ २ २ ०६ ०२c क्रतुं बृहन्तमाशाथे ॥ ८४८
४ २ २ ०६ ०३a कवी नो मित्रावरुणा तुविजाता उरुक्षया ।
४ २ २ ०६ ०३c दक्षं दधाते अपसम् ॥ ८४९

४ २ २ ०७ ०१a इन्द्रेण सँ हि दृक्षसे सञ्जग्मानो अबिभ्युषा ।
४ २ २ ०७ ०१c मन्दू समानवर्चसा ॥ ८५०
४ २ २ ०७ ०२a आदह स्वधामनु पुनर्गर्भत्वमेरिरे ।
४ २ २ ०७ ०२c दधाना नाम यज्ञियम् ॥ ८५१
४ २ २ ०७ ०३a वीडु चिदारुजत्नुभिर्गुहा चिदिन्द्र वह्निभिः ।

४ २ २ ०७ ०३c अविन्द उस्रिया अनु ॥ ८५२

४ २ २ ०८ ०१a ता हुवे ययोरिदं पप्रे विश्वं पुरा कृतम् ।
४ २ २ ०८ ०१c इन्द्राग्नी न मर्धतः ॥ ८५३
४ २ २ ०८ ०२a उग्रा विघनिना मृध इन्द्राग्नी हवामहे ।
४ २ २ ०८ ०२c ता नो मृडात ईदृशे ॥ ८५४
४ २ २ ०८ ०३a हथो वृत्राण्यार्या हथो दासानि सत्पती ।
४ २ २ ०८ ०३c हथो विश्वा अप द्विषः ॥ ८५५

४ २ २ ०९ ०१a अभि सोमास आयवः पवन्ते मद्यं मदम् ।
४ २ २ ०९ ०१c समुद्रस्याधि विष्टपे मनीषिणो मत्सरासो मदच्युतः ॥ ८५६
४ २ २ ०९ ०२a तरत्समुद्रं पवमान ऊर्मिणा राजा देव ऋतं बृहत् ।
४ २ २ ०९ ०२c अर्षा मित्रस्य वरुणस्य धर्मणा प्र हिन्वान ऋतं बृहत् ॥ ८५७
४ २ २ ०९ ०३a नृभिर्येमाणो हर्यतो विचक्षणो राजा देवः समुद्र्यः ॥ ८५८

४ २ २ १० ०१a तिस्रो वाच ईरयति प्र वह्निर्ऋतस्य धीतिं ब्रह्मणो मनीषाम् ।
४ २ २ १० ०१c गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः ॥ ८५९
४ २ २ १० ०२a सोमं गावो धेनवो वावशानाः सोमं विप्रा मतिभिः पृच्छमानाः ।
४ २ २ १० ०२c सोमः सुत ऋच्यते पूयमानः सोमे अर्कास्त्रिष्टुभः सं नवन्ते ॥ ८६०
४ २ २ १० ०३a एवा नः सोम परिषिच्यमान आ पवस्व पूयमानः स्वस्ति ।
४ २ २ १० ०३c इन्द्रमा विश बृहता मदेन वर्धया वाचं जनया पुरन्धिम् ॥ ८६१

४ २ २ ११ ०१a यद्द्याव इन्द्र ते शतँशतं भूमीरुत स्युः ।
४ २ २ ११ ०१c न त्वा वज्रिन्त्सहस्रँ सुर्या अनु न जातमष्ट रोदसी ॥ ८६२
४ २ २ ११ ०२a आ पप्राथ महिना वृष्ण्या वृषन्विश्वा शविष्ठ शवसा ।
४ २ २ ११ ०२c अस्माँ अव मघवन्गोमति व्रजे वज्रिञ्चित्राभिरूतिभिः ॥ ८६३

४ २ २ १२ ०१a वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः ।
४ २ २ १२ ०१c पवित्रस्य प्रस्रवणेषु वृत्रहन्परि स्तोतार आसते ॥ ८६४
४ २ २ १२ ०२a स्वरन्ति त्वा सुते नरो वसो निरेक उक्थिनः ।
४ २ २ १२ ०२c कदा सुतं तृषाण ओक आ गम इन्द्र स्वब्दीव वँसगः ॥ ८६५
४ २ २ १२ ०३a कण्वेभिर्धृष्णवा धृषद्वाजं दर्षि सहस्रिणम् ।
४ २ २ १२ ०३c पिशङ्गरूपं मघवन्विचर्षणे मक्षू गोमन्तमीमहे ॥ ८६६

४ २ २ १३ ०१a तरणिरित्सिषासति वाजं पुरन्ध्या युजा ।

४ २ २ १३ ०१c आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्रुवम् ॥ ८६७
४ २ २ १३ ०२a न दुष्टुतिर्द्रविणोदेषु शस्यते न स्रेधन्तँ रयिर्नशत् ।
४ २ २ १३ ०२c सुशक्तिरिन्मघवं तुभ्यं मावते देष्णं यत्पार्ये दिवि ॥ ८६८

४ २ २ १४ ०१a तिस्रो वाच उदीरते गावो मिमन्ति धेनवः ।
४ २ २ १४ ०१c हरिरेति कनिक्रदत् ॥ ८६९
४ २ २ १४ ०२a अभि ब्रह्मीरनूषत यह्वीर्ऋतस्य मातरः ।
४ २ २ १४ ०२c मर्जयन्तीर्दिवः शिशुम् ॥ ८७०
४ २ २ १४ ०३a रायः समुद्राँश्चतुरोऽस्मभ्यँ सोम विश्वतः ।
४ २ २ १४ ०३c आ पवस्व सहस्रिणः ॥ ८७१

४ २ २ १५ ०१a सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः ।
४ २ २ १५ ०१c पवित्रवन्तो अक्षरं देवान्गच्छन्तु वो मदाः ॥ ८७२
४ २ २ १५ ०२a इन्दुरिन्द्राय पवत इति देवासो अब्रुवन् ।
४ २ २ १५ ०२c वाचस्पतिर्मखस्यते विश्वस्येशान ओजसाः ॥ ८७३
४ २ २ १५ ०३a सहस्रधारः पवते समुद्रो वाचमीङ्खयः ।
४ २ २ १५ ०३c सोमस्पती रयीणाँ सखेन्द्रस्य दिवेदिवे ॥ ८७४

४ २ २ १६ ०१a पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।
४ २ २ १६ ०१c अतप्ततनूर्न तदामो अश्नुते शृतास इद्वहन्तः सं तदाशत ॥ ८७५
४ २ २ १६ ०२a तपोष्पवित्रं विततं दिवस्पदेऽर्चन्तो अस्य तन्तवो व्यस्थिरन् ।
४ २ २ १६ ०२c अवन्त्यस्य पवीतारमाशवो दिवः पृष्ठमधि रोहन्ति तेजसा ॥ ८७६
४ २ २ १६ ०३a अरूरुचदुषसः पृश्निरग्रिय उक्षा मिमेति भुवनेषु वाजयुः ।
४ २ २ १६ ०३c मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमा दधुः ॥ ८७७

४ २ २ १७ ०१a प्र मँहिष्ठाय गायत ऋताव्ने बृहते शुक्रशोचिषे ।
४ २ २ १७ ०१c उपस्तुतासो अग्नये ॥ ८७८
४ २ २ १७ ०२a आ वँसते मघवा वीरवद्यशः समिद्धो द्युम्न्याहुतः ।
४ २ २ १७ ०२c कुविन्नो अस्य सुमतिर्भवीयस्यच्छा वाजेभिरागमत् ॥ ८७९

४ २ २ १८ ०१a तं ते मदं गृणीमसि वृषणं पृक्षु सासहिम् ।
४ २ २ १८ ०१c उ लोककृत्नुमद्रिवो हरिश्रियम् ॥ ८८०
४ २ २ १८ ०२a येन ज्योतीँष्यायवे मनवे च विवेदिथ ।
४ २ २ १८ ०२c मन्दानो अस्य बर्हिषो वि राजसि ॥ ८८१

४ २ २ १८ ०३a तदद्या चित्त उक्थिनोऽनु ष्टुवन्ति पूर्वथा ।
४ २ २ १८ ०३c वृषपत्नीरपो जया दिवेदिवे ॥ ८८२

४ २ २ १९ ०१a श्रुधी हवं तिरश्च्या इन्द्र यस्त्वा सपर्यति ।
४ २ २ १९ ०१c सुवीर्यस्य गोमतो रायस्पूर्धि महाँ असि ॥ ८८३
४ २ २ १९ ०२a यस्त इन्द्र नवीयसीं गिरं मन्द्रामजीजनत् ।
४ २ २ १९ ०२c चिकित्विन्मनसं धियं प्रत्नामृतस्य पिप्युषीम् ॥ ८८४
४ २ २ १९ ०३a तमु ष्टवाम यं गिर इन्द्रमुक्थानि वावृधुः ।
४ २ २ १९ ०३c पुरूण्यस्य नौँस्या सिषासन्तो वनामहे ॥ ८८५

तृतीय प्रपाठकः । प्रथमोऽर्धः

४ ३ १ ०१ ०१a प्र त आश्विनीः पवमान धेनवो दिव्या असृग्रन्पयसा धरीमणि ।
४ ३ १ ०१ ०१c प्रान्तरिक्षात्स्थाविरीस्ते असृक्षत ये त्वा मृजन्त्यृषिषाण वेधसः ॥ ८८६

४ ३ १ ०१ ०२a उभयतः पवमानस्य रश्मयो ध्रुवस्य सतः परि यन्ति केतवः ।
४ ३ १ ०१ ०२c यदी पवित्रे अधि मृज्यते हरिः सत्ता नि योनौ कलशेषु सीदति ॥ ८८७

४ ३ १ ०१ ०३a विश्वा धामानि विश्वचक्ष ऋभ्वसः प्रभोष्टे सतः परि यन्ति केतवः ।
४ ३ १ ०१ ०३c व्यानशी पवसे सोम धर्मणा पतिर्विश्वस्य भुवनस्य राजसि ॥ ८८८

४ ३ १ ०२ ०१a पवमानो अजीजनद्दिवश्चित्रं न तन्यतुम् ।
४ ३ १ ०२ ०१c ज्योतिर्वैश्वानरं बृहत् ॥ ८८९
४ ३ १ ०२ ०२a पवमान रसस्तव मदो राजन्नदुच्छुनः ।
४ ३ १ ०२ ०२c वि वारमव्यमर्षति ॥ ८९०
४ ३ १ ०२ ०३a पवमानस्य ते रसो दक्षो वि राजति द्युमान् ।
४ ३ १ ०२ ०३c ज्योतिर्विश्वँ स्वर्दृशे ॥ ८९१

४ ३ १ ०३ ०१a प्र यद्गावो न भूर्णयस्त्वेषा अयासो अक्रमुः ।
४ ३ १ ०३ ०१c घ्नन्तः कृष्णामप त्वचम् ॥ ८९२
४ ३ १ ०३ ०२a सुवितस्य मनामहेऽति सेतुं दुराय्यम् ।
४ ३ १ ०३ ०२c साह्याम दस्युमव्रतम् ॥ ८९३
४ ३ १ ०३ ०३a शृण्वे वृष्टेरिव स्वनः पवमानस्य शुष्मिणः ।
४ ३ १ ०३ ०३c चरन्ति विद्युतो दिवि ॥ ८९४
४ ३ १ ०३ ०४a आ पवस्व महीमिषं गोमदिन्दो हिरण्यवत् ।

४ ३ १ ०३ ०४c अश्ववत्सोम वीरवत् ॥ ८९५
४ ३ १ ०३ ०५a पवस्व विश्वचर्षण आ मही रोदसी पृण ।
४ ३ १ ०३ ०५c उषाः सूर्यो न रश्मिभिः ॥ ८९६
४ ३ १ ०३ ०६a परि नः शर्मयन्त्या धारया सोम विश्वतः ।
४ ३ १ ०३ ०६c सरा रसेव विष्टपम् ॥ ८९७

४ ३ १ ०४ ०१a आशुरर्ष बृहन्मते परि प्रियेण धाम्ना ।
४ ३ १ ०४ ०१c यत्र देवा इति ब्रुवन् ॥ ८९८
४ ३ १ ०४ ०२a परिष्कृण्वन्ननिष्कृतं जनाय यातयन्निषः ।
४ ३ १ ०४ ०२c वृष्टिं दिवः परि स्रव ॥ ८९९
४ ३ १ ०४ ०३a अयँ स यो दिवस्परि रघुयामा पवित्र आ ।
४ ३ १ ०४ ०३c सिन्धोरूर्मा व्यक्षरत् ॥ ९००
४ ३ १ ०४ ०४a सुत एति पवित्र आ त्विषिं दधान ओजसा ।
४ ३ १ ०४ ०४c विचक्षाणो विरोचयन् ॥ ९०१
४ ३ १ ०४ ०५a आविवासन्परावतो अथो अर्वावतः सुतः ।
४ ३ १ ०४ ०५c इन्द्राय सिच्यते मधु ॥ ९०२
४ ३ १ ०४ ००a समीचीना अनूषत हरिँ हिन्वन्त्यद्रिभिः ।
४ ३ १ ०४ ००c इन्दुमिन्द्राय पीतये ॥ ९०३

४ ३ १ ०५ ०१a हिन्वन्ति सूरमुस्रयः स्वसारो जामयस्पतिम् ।
४ ३ १ ०५ ०१c महामिन्दुं महीयुवः ॥ ९०४
४ ३ १ ०५ ०२a पवमान रुचारुचा देवो देवेभ्यः सुतः ।
४ ३ १ ०५ ०२c विश्वा वसून्या विश ॥ ९०५
४ ३ १ ०५ ०३a आ पवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः ।
४ ३ १ ०५ ०३c इषे पवस्व संयतम् ॥ ९०६

४ ३ १ ०६ ०१a जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे ।
४ ३ १ ०६ ०१c घृतप्रतीको बृहता दिविस्पृषा द्युमद्वि भाति भरतेभ्यः शुचिः ॥ ९०७
४ ३ १ ०६ ०२a त्वामग्ने अङ्गिरसो गुहा हितमन्वविन्दञ्छिश्रियाणं वनेवने ।
४ ३ १ ०६ ०२c स जायसे मथ्यमानः सहो महत्वामाहुः सहसस्पुत्रमङ्गिरः ॥ ९०८
४ ३ १ ०६ ०३a यज्ञस्य केतुं प्रथमं पुरोहितमग्निं नरस्त्रिषधस्थे समिन्धते ।
४ ३ १ ०६ ०३c इन्द्रेण देवैः सरथँ स बर्हिषि सीदन्नि होता यजथाय सुक्रतुः ॥ ९०९

४ ३ १ ०७ ०१a अयं वां मित्रावरुणा सुतः सोम ऋतावृधा ।
४ ३ १ ०७ ०१c ममेदिह श्रुतँ हवम् ॥ ९१०
४ ३ १ ०७ ०२a राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे ।
४ ३ १ ०७ ०२c सहस्रस्थूण आशाते ॥ ९११
४ ३ १ ०७ ०३a ता सम्राजा घृतासुती आदित्या दानुनस्पती ।
४ ३ १ ०७ ०३c सचेते अनवह्वरम् ॥ ९१२

४ ३ १ ०८ ०१a इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः ।
४ ३ १ ०८ ०१c जघान नवतीर्नव ॥ ९१३
४ ३ १ ०८ ०२a इच्छन्नश्वस्य यच्छिरः पर्वतेष्वपश्रितम् ।
४ ३ १ ०८ ०२c तद्विदच्छर्यणावति ॥ ९१४
४ ३ १ ०८ ०३a अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम् ।
४ ३ १ ०८ ०३c इत्था चन्द्रमसो गृहे ॥ ९१५

४ ३ १ ०९ ०१a इयं वामस्य मन्मन इन्द्राग्नी पूर्व्यस्तुतिः ।
४ ३ १ ०९ ०१c अभ्राद्वृष्टिरिवाजनि ॥ ९१६
४ ३ १ ०९ ०२a शृणुतं जरितुर्हवमिन्द्राग्नी वनतं गिरः ।
४ ३ १ ०९ ०२c ईशाना पिप्यतं धियः ॥ ९१७
४ ३ १ ०९ ०३a मा पापत्वाय नो नरेन्द्राग्नी माभिशस्तये ।
४ ३ १ ०९ ०३c मा नो रीरधतं निदे ॥ ९१८

४ ३ १ १० ०१a पवस्व दक्षसाधनो देवेभ्यः पीतये हरे ।
४ ३ १ १० ०१c मरुद्भ्यो वायवे मदः ॥ ९१९
४ ३ १ १० ०२a सं देवैः शोभते वृषा कविर्योनावधि प्रियः ।
४ ३ १ १० ०२c पवमानो अदाभ्यः ॥ ९२०
४ ३ १ १० ०३a पवमान धिया हितो३ऽभि योनिं कनिक्रदत् ।
४ ३ १ १० ०३c धर्मणा वायुमारुहः ॥ ९२१

४ ३ १ ११ ०१a तवाहँ सोम रारण सख्य इन्दो दिवेदिवे ।
४ ३ १ ११ ०१c पुरूणि बभ्रो नि चरन्ति मामव परिधीँ रति ताँइहि ॥ ९२२
४ ३ १ ११ ०२a तवाहं नक्तमुत सोम ते दिवा दुहानो बभ्र ऊधनि ।
४ ३ १ ११ ०२c घृणा तपन्तमति सूर्यं परः शकुना इव पप्तिम ॥ ९२३

४ ३ १ १२ ०१a पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः ।

४ ३ १ १२ ०१c शुम्भन्ति विप्रं धीतिभिः ॥ ९२४
४ ३ १ १२ ०२a आ योनिमरुणो रुहद्गमदिन्द्रं वृषा सुतम् ।
४ ३ १ १२ ०२c ध्रुवे सदसि सीदतु ॥ ९२५
४ ३ १ १२ ०३a नू नो रयिं महामिन्दोऽस्मभ्यँ सोम विश्वतः ।
४ ३ १ १२ ०३c आ पवस्व सहस्रिणम् ॥ ९२६

४ ३ १ १३ ०१a पिबा सोममिन्द्र मदन्तु त्वा यं ते सुषाव हर्यश्वाद्रिः ।
४ ३ १ १३ ०१c सोतुर्बाहुभ्याँ सुयतो नार्वा ॥ ९२७
४ ३ १ १३ ०२a यस्ते मदो युज्यश्चारुरस्ति येन वृत्राणि हर्यश्व हँसि ।
४ ३ १ १३ ०२c स त्वामिन्द्र प्रभूवसो ममत्तु ॥ ९२८
४ ३ १ १३ ०३a बोधा सु मे मघवन्वाचमेमां यां ते वसिष्ठो अर्चति प्रशस्तिम् ।
४ ३ १ १३ ०३c इमा ब्रह्म सधमादे जुषस्व ॥ ९२९

४ ३ १ १४ ०१a विश्वाः पृतना अभिभूतरं नरः सजूस्ततक्षुरिन्द्रं जजनुश्च राजसे ।
४ ३ १ १४ ०१c क्रत्वे वरे स्थेमन्यामुरीमुतोग्रमोजिष्ठं तरसं तरस्विनम् ॥ ९३०
४ ३ १ १४ ०२a नेमिं नमन्ति चक्षसा मेषं विप्रा अभिस्वरे ।
४ ३ १ १४ ०२c सुदीतयो वो अद्रुहोऽपि कर्णे तरस्विनः समृक्वभिः ॥ ९३१
४ ३ १ १४ ०३a समु रेभसो अस्वरन्निन्द्रँ सोमस्य पीतये ।
४ ३ १ १४ ०३c स्वःपतिर्यदी वृधे धृतव्रतो ह्योजसा समूतिभिः ॥ ९३२

४ ३ १ १५ ०१a यो राजा चर्षणीनां याता रथेभिरध्रिगुः ।
४ ३ १ १५ ०१c विश्वासां तरुता पृतनानां ज्येष्ठं यो वृत्रहा गृणे ॥ ९३३
४ ३ १ १५ ०२a इन्द्रं तँ शुम्भ्य पुरुहन्मन्नवसे यस्य द्विता विधर्त्तरि ।
४ ३ १ १५ ०२c हस्तेन वज्रः प्रति धायि दर्शतो महां देवो न सूर्यः ॥ ९३४

४ ३ १ १६ ०१a परि प्रिया दिवः कविर्वयाँसि नप्त्योर्हितः ।
४ ३ १ १६ ०१c स्वानैर्याति कविक्रतुः ॥ ९३५
४ ३ १ १६ ०२a स सूनुर्मातरा शुचिर्जातो जाते अरोचयत् ।
४ ३ १ १६ ०२c महान्मही ऋतावृधा ॥ ९३६
४ ३ १ १६ ०३a प्रप्र क्षयाय पन्यसे जनाय जुष्टो अद्रुहः ।
४ ३ १ १६ ०३c वीत्यर्ष पनिष्टये ॥ ९३७

४ ३ १ १७ ०१a त्वँ ह्याङ्गिरसँ दैव्या पवमान जनिमानि द्युमत्तमः ।
४ ३ १ १७ ०१c अमृतत्वाय घोषयन् ॥ ९३८
४ ३ १ १७ ०२a येना नवग्वो दध्यङ्ङपोर्णुते येन विप्रास आपिरे ।

४ ३ १ १७ ०२c देवानाँ सुम्ने अमृतस्य चारुणो येन श्रवाँस्याशत ॥ ९३९

४ ३ १ १८ ०१a सोमः पुनान ऊर्मिणाव्यं वारं वि धावति ।
४ ३ १ १८ ०१c अग्रे वाचः पवमानः कनिक्रदत् ॥ ९४०
४ ३ १ १८ ०२a धीभिर्मृजन्ति वाजिनं वने क्रीडन्तमत्यविम् ।
४ ३ १ १८ ०२c अभि त्रिपृष्ठं मतयः समस्वरन् ॥ ९४१
४ ३ १ १८ ०३a असर्जि कलशाँ अभि मीढ्वान्त्सप्तिर्न वाजयुः ।
४ ३ १ १८ ०३c पुनानो वाचं जनयन्नसिष्यदत् ॥ ९४२

४ ३ १ १९ ०१a सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।
४ ३ १ १९ ०१c जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥ ९४३
४ ३ १ १९ ०२a ब्रह्मा देवानां पदवीः कवीनां ऋषिर्विप्राणां महिषोमृगाणाम् ।
४ ३ १ १९ ०२c श्येनो गृध्राणाँ स्वधितिर्वनानाँ सोमः पवित्रमत्येति रेभन् ॥ ९४४
४ ३ १ १९ ०३a प्रावीविपद्वाच ऊर्मिं न सिन्धुर्गिर स्तोमान्पवमानो मनीषाः ।
४ ३ १ १९ ०३c अन्तः पश्यन्वृजनेमावराण्या तिष्ठति वृषभो गोषु जानन् ॥ ९४५

४ ३ १ २० ०१a अग्निं वो वृधन्तमध्वराणां पुरूतमम् ।
४ ३ १ २० ०१c अच्छा नप्त्रे सहस्वते ॥ ९४६
४ ३ १ २० ०२a अयं यथा न आभुवत्त्वष्टा रूपेव तक्ष्या ।
४ ३ १ २० ०२c अस्य क्रत्वा यशस्वतः ॥ ९४७
४ ३ १ २० ०३a अयं विश्वा अभि श्रियोऽग्निर्देवेषु पत्यते ।
४ ३ १ २० ०३c आ वाजैरुप नो गमत् ॥ ९४८

४ ३ १ २१ ०१a इममिन्द्र सुतं पिब ज्येष्ठममर्त्यं मदम् ।
४ ३ १ २१ ०१c शुक्रस्य त्वाभ्यक्षरन्धारा ऋतस्य सादने ॥ ९४९
४ ३ १ २१ ०२a न किष्ट्वद्रथीतरो हरी यदिन्द्र यच्छसे ।
४ ३ १ २१ ०२c न किष्ट्वानु मज्मना न किः स्वश्व आनशे ॥ ९५०
४ ३ १ २१ ०३a इन्द्राय नूनमर्चतोक्थानि च ब्रवीतन ।
४ ३ १ २१ ०३c सुता अमत्सुरिन्दवो ज्येष्ठं नमस्यता सहः ॥ ९५१

४ ३ १ २२ ०१a इन्द्र जुषस्व प्र वहा याहि शूर हरिह ।
४ ३ १ २२ ०१c पिबा सुतस्य मतिर्न मधोश्चकानश्चारुर्मदाय ॥ ९५२
४ ३ १ २२ ०२a इन्द्र जठरं नव्यं न पृणस्व मधोर्दिवो न ।
४ ३ १ २२ ०२c अस्य सुतस्य स्वा३र्नोप त्वा मदाः सुवाचो अस्थुः ॥ ९५३
४ ३ १ २२ ०३a इन्द्रस्तुराषाण्मित्रो न जघान वृत्रं यतिर्न ।

४ ३ १ २२ ०३c बिभेद वलं भृगुर्न ससाहे शत्रून्मदे सोमस्य ॥ ९५४

तृतीय प्रपाठकः । द्वितीयोऽर्धः

४ ३ २ ०१ ०१a गोवित्पवस्व वसुविद्धिरण्यविद्रेतोधा इन्दो भुवनेष्वर्पितः ।
४ ३ २ ०१ ०१c त्वँ सुवीरो असि सोम विश्ववित्तं त्वा नर उप गिरेम आसते ॥ ९५५

४ ३ २ ०१ ०२a त्वं नृचक्षा असि सोम विश्वतः पवमान वृषभ ता वि धावसि ।
४ ३ २ ०१ ०२c स नः पवस्व वसुमद्धिरण्यवद्वयँ स्याम भुवनेषु जीवसे ॥ ९५६

४ ३ २ ०१ ०३a ईशान इमा भुवनानि ईयसे युजान इन्दो हरितः सुपर्ण्यः ।
४ ३ २ ०१ ०३c तास्ते क्षरन्तु मधुमद्घृतं पयस्तव व्रते सोम तिष्ठन्तु कृष्टयः ॥ ९५७

४ ३ २ ०२ ०१a पवमानस्य विश्ववित्प्र ते सर्गा असृक्षत ।
४ ३ २ ०२ ०१c सूर्यस्येव न रश्मयः ॥ ९५८

४ ३ २ ०२ ०२a केतुं कृण्वं दिवस्परि विश्वा रूपाभ्यर्षसि ।
४ ३ २ ०२ ०२c समुद्रः सोम पिन्वसे ॥ ९५९

४ ३ २ ०२ ०३a जज्ञानो वाचमिष्यसि पवमान विधर्मणि ।
४ ३ २ ०२ ०३c क्रन्दं देवो न सूर्यः ॥ ९६०

४ ३ २ ०३ ०१a प्र सोमासो अधन्विषुः पवमानास इन्दवः ।
४ ३ २ ०३ ०१c श्रीणाना अप्सु वृञ्जते ॥ ९६१

४ ३ २ ०३ ०२a अभि गावो अधन्विषुरापो न प्रवता यतीः ।
४ ३ २ ०३ ०२c पुनाना इन्द्रमाशत ॥ ९६२

४ ३ २ ०३ ०३a प्र पवमान धन्वसि सोमेन्द्राय मादनः ।
४ ३ २ ०३ ०३c नृभिर्यतो वि नीयसे ॥ ९६३

४ ३ २ ०३ ०४a इन्दो यदद्रिभिः सुतः पवित्रं परिदीयसे ।
४ ३ २ ०३ ०४c अरमिन्द्रस्य धाम्ने ॥ ९६४

४ ३ २ ०३ ०५a त्वँ सोम नृमादनः पवस्व चर्षणीधृतिः ।
४ ३ २ ०३ ०५c सस्निर्यो अनुमाद्यः ॥ ९६५

४ ३ २ ०३ ०६a पवस्व वृत्रहन्तम उक्थेभिरनुमाद्यः ।
४ ३ २ ०३ ०६c शुचिः पावको अद्भुतः ॥ ९६६

४ ३ २ ०३ ०७a शुचिः पावक उच्यते सोमः सुतः स मधुमान् ।
४ ३ २ ०३ ०७c देवावीरघशँसहा ॥ ९६७

४ ३ २ ०४ ०१a प्र कविर्देववीतयेऽव्या वारेभिरव्यत ।
४ ३ २ ०४ ०१c साह्वान्विश्वा अभि स्पृधः ॥ ९६८
४ ३ २ ०४ ०२a स हि ष्मा जरितृभ्य आ वाजं गोमन्तमिन्वति ।
४ ३ २ ०४ ०२c पवमानः सहस्रिणम् ॥ ९६९
४ ३ २ ०४ ०३a परि विश्वानि चेतसा मृज्यसे पवसे मती ।
४ ३ २ ०४ ०३c स नः सोम श्रवो विदः ॥ ९७०
४ ३ २ ०४ ०४a अभ्यर्ष बृहद्यशो मघवद्भ्यो ध्रुवँ रयिम् ।
४ ३ २ ०४ ०४c इषँ स्तोतृभ्य आ भर ॥ ९७१
४ ३ २ ०४ ०५a त्वँ राजेव सुव्रतो गिरः सोमाविवेशिथ ।
४ ३ २ ०४ ०५c पुनानो वह्ने अद्भुत ॥ ९७२
४ ३ २ ०४ ०६a स वह्निरप्सु दुष्टरो मृज्यमानो गभस्त्योः ।
४ ३ २ ०४ ०६c सोमश्चमूषु सीदति ॥ ९७३
४ ३ २ ०४ ०७a क्रीडुर्मखो न मँहयुः पवित्रँ सोम गच्छसि ।
४ ३ २ ०४ ०७c दधत्स्तोत्रे सुवीर्यम् ॥ ९७४

४ ३ २ ०५ ०१a यवंयवं नो अन्धसा पुष्टंपुष्टं परि स्रव ।
४ ३ २ ०५ ०१c विश्वा च सोम सौभगा ॥ ९७५
४ ३ २ ०५ ०२a इन्दो यथा तव स्तवो यथा ते जातमन्धसः ।
४ ३ २ ०५ ०२c नि बर्हिषि प्रिये सदः ॥ ९७६
४ ३ २ ०५ ०३a उत नो गोविदश्ववित्पवस्व सोमान्धसा ।
४ ३ २ ०५ ०३c मक्षूतमेभिरहभिः ॥ ९७७
४ ३ २ ०५ ०४a यो जिनाति न जीयते हन्ति शत्रुमभीत्य ।
४ ३ २ ०५ ०४c स पवस्व सहस्रजित् ॥ ९७८

४ ३ २ ०६ ०१a यास्ते धारा मधुश्चुतोऽसृग्रमिन्द ऊतये ।
४ ३ २ ०६ ०१c ताभिः पवित्रमासदः ॥ ९७९
४ ३ २ ०६ ०२a सो अर्षेन्द्राय पीतये तिरो वाराण्यव्यया ।
४ ३ २ ०६ ०२c सीदन्नृतस्य योनिमा ॥ ९८०
४ ३ २ ०६ ०३a त्वँ सोम परि स्रव स्वादिष्ठो अङ्गिरोभ्यः ।
४ ३ २ ०६ ०३c वरिवोविद्धृतं पयः ॥ ९८१

४ ३ २ ०७ ०१a तव श्रियो वर्ष्यस्येव विद्युतोग्नेश्चिकित्र उषसामिवेतयः ।
४ ३ २ ०७ ०१c यदोषधीरभिसृष्टो वनानि च परि स्वयं चिनुषे अन्नमासनि ॥ ९८२

४ ३ २ ०७ ०२a वातोपजूत इषितो वशाँ अनु तृषु यदन्ना वेविषद्वितिष्ठसे ।
४ ३ २ ०७ ०२c आ ते यतन्ते रथ्यो३ यथा पृथक्षधाँस्यग्ने अजरस्य धक्षतः ॥ ९८३

४ ३ २ ०७ ०३a मेधाकारं विदथस्य प्रसाधनमग्निँ होतारं परिभूतरं मतिम् ।
४ ३ २ ०७ ०३c त्वामर्भस्य हविषः समानमित्तवां महो वृणते नान्यं त्वत् ॥ ९८४

४ ३ २ ०८ ०१a पुरूरुणा चिद्ध्यस्त्यवो नूनं वां वरुण ।
४ ३ २ ०८ ०१c मित्र वँसि वाँ सुमतिम् ॥ ९८५
४ ३ २ ०८ ०२a ता वाँ सम्यगद्रुह्वाणेषमश्याम धाम च ।
४ ३ २ ०८ ०२c वयं वां मित्रा स्याम ॥ ९८६
४ ३ २ ०८ ०३a पातं नो मित्रा पायुभिरुत त्रायेथाँ सुत्रात्रा ।
४ ३ २ ०८ ०३c साह्याम दस्यूं तनूभिः ॥ ९८७

४ ३ २ ०९ ०१a उत्तिष्ठन्नोजसा सह पीत्वा शिप्रे अवेपयः ।
४ ३ २ ०९ ०१c सोममिन्द्र चमूसुतम् ॥ ९८८
४ ३ २ ०९ ०२a अनु त्वा रोदसी उभे स्पर्धमानमददेताम् ।
४ ३ २ ०९ ०२c इन्द्र यद्दस्युहाभवः ॥ ९८९
४ ३ २ ०९ ०३a वाचमष्टापदीमहं नवस्रक्तिमृतावृधम् ।
४ ३ २ ०९ ०३c इन्द्रात्परितन्वं ममे ॥ ९९०

४ ३ २ १० ०१a इन्द्राग्नी युवामिमे३ऽभि स्तोमा अनूषत ।
४ ३ २ १० ०१c पिबतँ शम्भुवा सुतम् ॥ ९९१
४ ३ २ १० ०२a या वाँ सन्ति पुरुस्पृहो नियुतो दाशुषे नरा ।
४ ३ २ १० ०२c इन्द्राग्नी ताभिरा गतम् ॥ ९९२
४ ३ २ १० ०३a ताभिरा गच्छतं नरोपेदँ सवनँ सुतम् ।
४ ३ २ १० ०३c इन्द्राग्नी सोमपीतये ॥ ९९३

४ ३ २ ११ ०१a अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत् ।
४ ३ २ ११ ०१c सीदन्योनौ योनेष्वा ॥ ९९४
४ ३ २ ११ ०२a अप्सा इन्द्राय वायवे वरुणाय मरुद्भ्यः ।
४ ३ २ ११ ०२c सोमा अर्षन्तु विष्णवे ॥ ९९५
४ ३ २ ११ ०३a इषं तोकाय नो दधदस्मभ्यँ सोम विश्वतः ।
४ ३ २ ११ ०३c आ पवस्व सहस्रिणम् ॥ ९९६

४ ३ २ १२ ०१a सोम उ ष्वाणः सोतृभिरधि ष्णुभिरवीनाम् ।

४ ३ २ १२ ०१c अश्वयेव हरिता याति धारया मन्द्रया याति धारया ॥ ९९७
४ ३ २ १२ ०२a अनूपे गोमान्गोभिरक्षाः सोमो दुग्धाभिरक्षाः ।
४ ३ २ १२ ०२c समुद्रं न संवरणान्यग्मन्मन्दी मदाय तोशते ॥ ९९८

४ ३ २ १३ ०१a यत्सोम चित्रमुक्थ्यं दिव्यं पार्थिवं वसु ।
४ ३ २ १३ ०१c तन्नः पुनान आ भर ॥ ९९९
४ ३ २ १३ ०२a वृषा पुनान आयुँषि स्तनयन्नधि बर्हिषि ।
४ ३ २ १३ ०२c हरिः सन्योनिमासदः ॥ १०००
४ ३ २ १३ ०३a युवँ हि स्थः स्वःपती इन्द्रश्च सोम गोपती ।
४ ३ २ १३ ०३c ईशाना पिप्यतं धियः ॥ १००१

४ ३ २ १४ ०१a इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः ।
४ ३ २ १४ ०१c तमिन्महत्स्वाजिषूतिमर्भे हवामहे स वाजेषु प्र नोऽविषत् ॥ १००२
४ ३ २ १४ ०२a असि हि वीर सेन्योऽसि भूरि परादिदः ।
४ ३ २ १४ ०२c असि दभ्रस्य चिद्वृधो यजमानाय शिक्षसि सुन्वते भूरि ते वसु ॥ १००३
४ ३ २ १४ ०३a यदुदीरत आजयो धृष्णवे धीयते धनाम् ।
४ ३ २ १४ ०३c युङ्क्षा मदच्युता हरी कं हनः कं वसौ दधोऽस्मां इन्द्र वसौ दधः ॥ १००४

४ ३ २ १५ ०१a स्वादोरित्था विषूवतो मध्वः पिबन्ति गौर्यः ।
४ ३ २ १५ ०१c या इन्द्रेण सयावरीर्वृष्णा मदन्ति शोभसे वस्वीरनु स्वराज्यम् ॥ १००५
४ ३ २ १५ ०२a ता अस्य पृशनायुवः सोमँ श्रीणन्ति पृश्नयः ।
४ ३ २ १५ ०२c प्रिया इन्द्रस्य धेनवो वज्रँ हिन्वन्ति सायकं वस्वीरनु स्वराज्यम् ॥ १००६
४ ३ २ १५ ०३a ता अस्य नमसा सहः सपर्यन्ति प्रचेतसः ।
४ ३ २ १५ ०३c व्रतान्यस्य सश्चिरे पुरूणि पूर्वचित्तये वस्वीरनु स्वराज्यम् ॥ १००७

४ ३ २ १६ ०१a असाव्यँशुर्मदायाप्सु दक्षो गिरिष्ठाः ।
४ ३ २ १६ ०१c श्येनो न योनिमासदत् ॥ १००८
४ ३ २ १६ ०२a शुभ्रमन्धो देववातमप्सु धौतं नृभिः सुतम् ।
४ ३ २ १६ ०२c स्वदन्ति गावः पयोभिः ॥ १००९
४ ३ २ १६ ०३a आदीमश्वं न हेतारमशूशुभन्नमृताय ।

४ ३ २ १६ ०३c मधो रसँ सधमादे ॥ १०१०

४ ३ २ १७ ०१a अभि द्युम्नं बृहद्यश इषस्पते दीदिहि देव देवयुम् ।
४ ३ २ १७ ०१c वि कोशं मध्यमं युव ॥ १०११
४ ३ २ १७ ०२a आ वच्यस्व सुदक्ष चम्वोः सुतो विशां वह्निर्न विश्पतिः ।
४ ३ २ १७ ०२c वृष्टिं दिवः पवस्व रीतिमपो जिन्वन्गविष्टये धियः ॥ १०१२

४ ३ २ १८ ०१a प्राणा शिशुर्महीनाँ हिन्वन्नृतस्य दीधितिम् ।
४ ३ २ १८ ०१c विश्वा परि प्रिया भुवदध द्विता ॥ १०१३
४ ३ २ १८ ०२a उप त्रितस्य पाष्यो३रभक्त यद्गुहा पदम् ।
४ ३ २ १८ ०२c यज्ञस्य सप्त धामभिरध प्रियम् ॥ १०१४
४ ३ २ १८ ०३a त्रीणि त्रितस्य धारया पृष्टेष्वैरयद्रयिम् ।
४ ३ २ १८ ०३c मिमीते अस्य योजना वि सुक्रतुः ॥ १०१५

४ ३ २ १९ ०१a पवस्व वाजसातये पवित्रे धारया सुतः ।
४ ३ २ १९ ०१c इन्द्राय सोम विष्णवे देवेभ्यो मधुमत्तरः ॥ १०१६
४ ३ २ १९ ०२a त्वाँ रिहन्ति धीतयो हरिं पवित्रे अद्रुहः ।
४ ३ २ १९ ०२c वत्सं जातं न मातरः पवमान विधर्मणि ॥ १०१७
४ ३ २ १९ ०३a त्वं द्यां च महिव्रत पृथिवीं चाति जभ्रिषे ।
४ ३ २ १९ ०३c प्रति द्रापिममुञ्चथाः पवमान महित्वना ॥ १०१८

४ ३ २ २० ०१a इन्दुर्वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन्मदाय ।
४ ३ २ २० ०१c हन्ति रक्षो बाधते पर्यरातिं वरिवस्कृण्वन्वृजनस्य राजा ॥ १०१९
४ ३ २ २० ०२a अध धारया मध्वा पृचानस्तिरो रोम पवते अद्रिदुग्धः ।
४ ३ २ २० ०२c इन्दुरिन्द्रस्य सख्यं जुषाणो देवो देवस्य मत्सरो मदाय ॥ १०२०
४ ३ २ २० ०३a अभि व्रतानि पवते पुनानो देवो देवान्त्स्वेन रसेन पृञ्चन् ।
४ ३ २ २० ०३c इन्दुर्धर्माण्यृतुथा वसानो दश क्षिपो अव्यत सानो अव्ये ॥ १०२१

४ ३ २ २१ ०१a आ ते अग्न इधीमहि द्युमन्तं देवाजरम् ।
४ ३ २ २१ ०१c युद्ध स्या ते पनीयसी समिद्दीदयति द्यवीषँ स्तोतृभ्य आ भर ॥ १०२२
४ ३ २ २१ ०२a आ ते अग्न ऋचा हविः शुक्रस्य ज्योतिषस्पते ।
४ ३ २ २१ ०२c सुश्चन्द्र दस्म विश्पते हव्यवाट्तुभ्यँ हूयत इषँ स्तोतृभ्य आ भर ॥ १०२३
४ ३ २ २१ ०३a ओभे सुश्चन्द्र विश्पते दर्वी श्रीणीष आसनि ।

४ ३ २ २१ ०३c उतो न उत्पुपूर्या उक्थेषु शवसस्पत इषँ स्तोतृभ्य आ भर ॥ १०२४

४ ३ २ २२ ०१a इन्द्राय साम गायत विप्राय बृहते बृहत् ।
४ ३ २ २२ ०१c ब्रह्माकृते विपश्चिते पनस्यवे ॥ १०२५
४ ३ २ २२ ०२a त्वमिन्द्राभिभूरसि त्वँ सूर्यमरोचयः ।
४ ३ २ २२ ०२c विश्वकर्मा विश्वदेवो महाँ असि ॥ १०२६
४ ३ २ २२ ०३a विभ्राजं ज्योतिषा त्व३रगच्छो रोचनं दिवः ।
४ ३ २ २२ ०३c देवास्त इन्द्र सख्याय येमिरे ॥ १०२७

४ ३ २ २३ ०१a असावि सोम इन्द्र ते शविष्ठ धृष्णवा गहि ।
४ ३ २ २३ ०१c आ त्वा पृणक्त्विन्द्रियँ रजः सूर्यो न रश्मिभिः ॥ १०२८
४ ३ २ २३ ०२a आ तिष्ठ वृत्रहन्त्रथं युक्ता ते ब्रह्मणा हरी ।
४ ३ २ २३ ०२c अर्वाचीनँ सु ते मनो ग्रावा कृणोतु वग्नुना ॥ १०२९
४ ३ २ २३ ०३a इन्द्रमिद्धरी वहतोऽप्रतिधृष्टशवसम् ।
४ ३ २ २३ ०३c ऋषीणाँ सुष्टुतीरुप यज्ञं च मानुषाणाम् ॥ १०३०

चतुर्थ प्रपाठकः । प्रथमोऽर्धः

४ ४ १ ०१ ०१a ज्योतिर्यज्ञस्य पवते मधु प्रियं पिता देवानां जनिता विभूवसुः ।
४ ४ १ ०१ ०१c दधाति रत्नँ स्वधयोरपीच्यं मदिन्तमो मत्सर इन्द्रियो रसः ॥ १०३१
४ ४ १ ०१ ०२a अभिक्रन्दन्कलशं वाज्यर्षति पतिर्दिवः शतधारो विचक्षणः ।
४ ४ १ ०१ ०२c हरिर्मित्रस्य सदनेषु सीदति मर्मृजानोऽविभिः सिन्धुभिर्वृषा ॥ १०३२
४ ४ १ ०१ ०३a अग्रे सिन्धूनां पवमानो अर्षत्यग्रे वाचो अग्रियो गोषु गच्छसि ।
४ ४ १ ०१ ०३c अग्रे वाजस्य भजसे महद्धनँ स्वायुधः सोतृभिः सोम सूयसे ॥ १०३३

४ ४ १ ०२ ०१a असृक्षत प्र वाजिनो गव्या सोमासो अश्वया ।
४ ४ १ ०२ ०१c शुक्रासो वीरयाशवः ॥ १०३४
४ ४ १ ०२ ०२a शुम्भमानो ऋतायुभिर्मृज्यमाना गभस्त्योः ।
र्म् ४ ४ १ ०२ ०२c पवन्ते वारे अव्यये ॥ १०३५
४ ४ १ ०२ ०३a ते विश्वा दाशुषे वसु सोमा दिव्यानि पार्थिवा ।
४ ४ १ ०२ ०३c पवन्तामान्तरिक्ष्या ॥ १०३६

४ ४ १ ०३ ०१a पवस्व देववीरति पवित्रँ सोम रँह्या ।

४ ४ १ ०३ ०१c इन्द्रमिन्दो वृषा विश ॥ १०३७
४ ४ १ ०३ ०२a आ वच्यस्व महि प्सरो वृषेन्दो द्युम्नवत्तमः ।
४ ४ १ ०३ ०२c आ योनिं धर्णसिः सदः ॥ १०३८
४ ४ १ ०३ ०३a अधुक्षत प्रियं मधु धारा सुतस्य वेधसः ।
४ ४ १ ०३ ०३c अपो वसिष्ट सुक्रतुः ॥ १०३९
४ ४ १ ०३ ०४a महान्तं त्वा महीरन्वापो अर्षन्ति सिन्धवः ।
४ ४ १ ०३ ०४c यद्गोभिर्वासयिष्यसे ॥ १०४०
४ ४ १ ०३ ०५a समुद्रो अप्सु मामृजे विष्टम्भो धरुणो दिवः ।
४ ४ १ ०३ ०५c सोमः पवित्रे अस्मयुः ॥ १०४१
४ ४ १ ०३ ०६a अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः ।
४ ४ १ ०३ ०६c सँ सूर्येण दिद्युते ॥ १०४२
४ ४ १ ०३ ०७a गिरस्त इन्द ओजसा मर्मृज्यन्ते अपस्युवः ।
४ ४ १ ०३ ०७c याभिर्मदाय शुम्भसे ॥ १०४३
४ ४ १ ०३ ०८a तं त्वा मदाय घृष्वय उ लोककृत्नुमीमहे ।
४ ४ १ ०३ ०८c तव प्रशस्तये महे ॥ १०४४
४ ४ १ ०३ ०९a गोषा इन्दो नृषा अस्यश्वसा वाजसा उत ।
४ ४ १ ०३ ०९c आत्मा यज्ञस्य पूर्व्यः ॥ १०४५
४ ४ १ ०३ १०a अस्मभ्यमिन्दविन्द्रियं मधोः पवस्व धारया ।
४ ४ १ ०३ १०c पर्जन्यो वृष्टिमाँ इव ॥ १०४६

४ ४ १ ०४ ०१a सना च सोम जेषि च पवमान महि श्रवः ।
४ ४ १ ०४ ०१c अथा नो वस्यसस्कृधि ॥ १०४७
४ ४ १ ०४ ०२a सना ज्योतिः सना स्वा३र्विश्वा च सोम सौभगा ।
४ ४ १ ०४ ०२c अथा नो वस्यसस्कृधि ॥ १०४८
४ ४ १ ०४ ०३a सना दक्षमुत क्रतुमप सोम मृधो जहि ।
४ ४ १ ०४ ०३c अथा नो वस्यसस्कृधि ॥ १०४९
४ ४ १ ०४ ०४a पवीतारः पुनीतन सोममिन्द्राय पातवे ।
४ ४ १ ०४ ०४c अथा नो वस्यसस्कृधि ॥ १०५०
४ ४ १ ०४ ०५a त्वँ सूर्ये न आ भज तव क्रत्वा तवोतिभिः ।
४ ४ १ ०४ ०५c अथा नो वस्यसस्कृधि ॥ १०५१
४ ४ १ ०४ ०६a तव क्रत्वा तवोतिभिर्ज्योक्पश्येम सूर्यम् ।
४ ४ १ ०४ ०६c अथा नो वस्यसस्कृधि ॥ १०५२

४ ४ १ ०४ ०७a अभ्यर्ष स्वायुध सोम द्विबर्हसँ रयिम् ।
४ ४ १ ०४ ०७c अथा नो वस्यसस्कृधि ॥ १०५३
४ ४ १ ०४ ०८a अभ्या३र्षानपच्युतो वाजिन्त्समत्सु सासहिः ।
४ ४ १ ०४ ०८c अथा नो वस्यसस्कृधि ॥ १०५४
४ ४ १ ०४ ०९a त्वां यज्ञैरवीवृधन्पवमान विधर्मणि ।
४ ४ १ ०४ ०९c अथा नो वस्यसस्कृधि ॥ १०५५
४ ४ १ ०४ १०a रयिं नश्चित्रमश्विनमिन्दो विश्वायुमा भर ।
४ ४ १ ०४ १०c अथा नो वस्यसस्कृधि ॥ १०५६

४ ४ १ ०५ ०१a तरत्स मन्दी धावति धारा सुतस्यान्धसः ।
४ ४ १ ०५ ०१c तरत्स मन्दी धावति ॥ १०५७
४ ४ १ ०५ ०२a उस्रा वेद वसूनां मर्त्तस्य देव्यवसः ।
४ ४ १ ०५ ०२c तरत्स मन्दी धावति ॥ १०५८
४ ४ १ ०५ ०३a ध्वस्रयोः पुरुषन्त्योरा सहस्राणि दद्महे ।
४ ४ १ ०५ ०३c तरत्स मन्दी धावति ॥ १०५९
४ ४ १ ०५ ०४a आ ययोस्त्रिँशतं तना सहस्राणि च दद्महे ।
४ ४ १ ०५ ०४c तरत्स मन्दी धावति ॥ १०६०

४ ४ १ ०६ ०१a एते सोमा असृक्षत गृणानाः शवसे महे ।
४ ४ १ ०६ ०१c मदिन्तमस्य धारया ॥ १०६१
४ ४ १ ०६ ०२a अभि गव्यानि वीतये नृम्णा पुनानो अर्षसि ।
४ ४ १ ०६ ०२c सनद्वाजः परि स्रव ॥ १०६२
४ ४ १ ०६ ०३a उत नो गोमतीरिषो विश्वा अर्ष परिष्टुभः ।
४ ४ १ ०६ ०३c गृणानो जमदग्निना ॥ १०६३

४ ४ १ ०७ ०१a इमँ स्तोममर्हते जातवेदसे रथमिव सं महेमा मनीषया ।
४ ४ १ ०७ ०१c भद्रा हि नः प्रमतिरस्य सँसद्यग्ने सख्ये मा रिषामा वयं तव ॥ १०६४
४ ४ १ ०७ ०२a भरामेध्मं कृणवामा हवीँषि ते चितयन्तः पर्वणापर्वणा वयम् ।
४ ४ १ ०७ ०२c जीवातवे प्रतरँ साधया धियोऽग्ने सख्ये म रिषामा वयं तव ॥ १०६५
४ ४ १ ०७ ०३a शकेम त्वा समिधँ साधया धियस्त्वे देवा हविरदन्त्याहुतम् ।
४ ४ १ ०७ ०३c त्वमादित्याँ आ वह तान्ह्यू३श्मस्यग्ने सख्ये मा रिषामा वयं तव ॥ १०६६

४ ४ १ ०८ ०१a प्रति वाँ सूर उदिते मित्रं गृणीषे वरुणम् ।
४ ४ १ ०८ ०१c अर्यमणँ रिशादसम् ॥ १०६७
४ ४ १ ०८ ०२a राया हिरण्यया मतिरियमवृकाय शवसे ।
४ ४ १ ०८ ०२c इयं विप्रामेधसातये ॥ १०६८
४ ४ १ ०८ ०३a ते स्याम देव वरुण ते मित्र सूरिभिः सह ।
४ ४ १ ०८ ०३c इषँ स्वश्च धीमहि ॥ १०६९

४ ४ १ ०९ ०१a भिन्धि विश्वा अप द्विषः परि बाधो जही मृधः ।
४ ४ १ ०९ ०१c वसु स्पार्हं तदा भर ॥ १०७०
४ ४ १ ०९ ०२a यस्य ते विश्वमानुषग्भूरेर्दत्तस्य वेदति ।
४ ४ १ ०९ ०२c वसु स्पार्हं तदा भर ॥ १०७१
४ ४ १ ०९ ०३a यद्वीडाविन्द्र यत्स्थिरे यत्पर्शाने पराभृतम् ।
४ ४ १ ०९ ०३c वसु स्पार्हं तदा भर ॥ १०७२

४ ४ १ १० ०१a यज्ञस्य हि स्थ ऋत्विजा सस्नी वाजेषु कर्मसु ।
४ ४ १ १० ०१c इन्द्राग्नी तस्य बोधतम् ॥ १०७३
४ ४ १ १० ०२a तोशासा रथयावाना वृत्रहणापराजिता ।
४ ४ १ १० ०२c इन्द्राग्नी तस्य बोधतम् ॥ १०७४
४ ४ १ १० ०३a इदं वां मदिरं मध्वधुक्षन्नद्रिभिर्नरः ।
४ ४ १ १० ०३c इन्द्राग्नी तस्य बोधतम् ॥ १०७५

४ ४ १ ११ ०१a इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः ।
४ ४ १ ११ ०१c अर्कस्य योनिमासदम् ॥ १०७६
४ ४ १ ११ ०२a तं त्वा विप्रा वचोविदः परिष्कृण्वन्ति धर्णसिम् ।
४ ४ १ ११ ०२c सं त्वा मृजन्त्यायवः ॥ १०७७
४ ४ १ ११ ०३a रसं ते मित्रो अर्यमा पिबन्तु वरुणः कवे ।
४ ४ १ ११ ०३c पवमानस्य मरुतः ॥ १०७८

४ ४ १ १२ ०१a मृज्यमानः सुहस्त्य समुद्रे वाचमिन्वसि ।
४ ४ १ १२ ०१c रयिं पिशङ्गं बहुलं पुरुस्पृहं पवमानाभ्यर्षसि ॥ १०७९
४ ४ १ १२ ०२a पुनानो वरे पवमनो अव्यये वृषो अचिक्रदद्वने ।
४ ४ १ १२ ०२c देवानाँ सोम पवमान निष्कृतं गोभिरञ्जानो अर्षसि ॥ १०८०

४ ४ १ १३ ०१a एतमु त्यं दश क्षिपो मृजन्ति सिन्धुमातरम् ।

४ ४ १ १३ ०१c समादित्येभिरख्यत ॥ १०८१
४ ४ १ १३ ०२a समिन्द्रेणोत वायुना सुत एति पवित्र आ ।
४ ४ १ १३ ०२c सँ सूर्यस्य रश्मिभिः ॥ १०८२
४ ४ १ १३ ०३a स नो भगाय वायवे पूष्णे पवस्व मधुमान् ।
४ ४ १ १३ ०३c चारुर्मित्रे वरुणे च ॥ १०८३

४ ४ १ १४ ०१a रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः ।
४ ४ १ १४ ०१c क्षुमन्तो याभिर्मदेम ॥ १०८४
४ ४ १ १४ ०२a आ घ त्वावां त्मना युक्तः स्तोतृभ्यो धृष्णवीयानः ।
४ ४ १ १४ ०२c ऋणोरक्षं न चक्र्योः ॥ १०८५
४ ४ १ १४ ०३a आ यद्दुवः शतक्रतवा कामं जरितॄणाम् ।
४ ४ १ १४ ०३c ऋणोरक्षं न शचीभिः ॥ १०८६

४ ४ १ १५ ०१a सुरूपकृत्नुमूतये सुदुघामिव गोदुहे ।
४ ४ १ १५ ०१c जुहूमसि द्यविद्यवि ॥ १०८७
४ ४ १ १५ ०२a उप नः सवना गहि सोमस्य सोमपाः पिब ।
४ ४ १ १५ ०२c गोदा इद्रेवतो मदः ॥ १०८८
४ ४ १ १५ ०३a अथा ते अन्तमानां विद्याम सुमतीनाम् ।
४ ४ १ १५ ०३c मा नो अति ख्य आ गहि ॥ १०८९

४ ४ १ १६ ०१a उभे यदिन्द्र रोदसी आपप्राथोषा इव ।
४ ४ १ १६ ०१c महान्तं त्वा महीनाँ सम्राजं चर्षणीनाम् ।
४ ४ १ १६ ०१e देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥ १०९०
४ ४ १ १६ ०२a दीर्घं ह्यङ्कुशं यथा शक्तिं बिभर्षि मन्तुमः ।
४ ४ १ १६ ०२c पूर्वेण मघवन्पदा वयामजो यथा यमः ।
४ ४ १ १६ ०२e देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥ १०९१
४ ४ १ १६ ०३a अव स्म दुर्हृणायतो मर्त्तस्य तनुहि स्थिरम् ।
४ ४ १ १६ ०३c अधस्पदं तमीं कृधि यो अस्माँ अभिदासति ।
४ ४ १ १६ ०३e देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥ १०९२

४ ४ १ १७ ०१a परि स्वानो गिरिष्ठाः पवित्रे सोमो अक्षरत् ।
४ ४ १ १७ ०१c मदेषु सर्वधा असि ॥ १०९३
४ ४ १ १७ ०२a त्वं विप्रस्त्वं कविर्मधु प्र जातमन्धसः ।
४ ४ १ १७ ०२c मदेषु सर्वधा असि ॥ १०९४

४ ४ १ १७ ०३a त्वे विश्वे सजोषसो देवासः पीतिमाशत ।
४ ४ १ १७ ०३c मदेषु सर्वधा असि ॥ १०९५

४ ४ १ १८ ०१a स सुन्वे यो वसूनां यो रायामानेता य इडानाम् ।
४ ४ १ १८ ०१c सोमो यः सुक्षितीनाम् ॥ १०९६
४ ४ १ १८ ०२a यस्य त इन्द्रः पिबाद्यस्य मरुतो यस्य वार्यमणा भगः ।
४ ४ १ १८ ०२c आ येन मित्रावरुणा करामह एन्द्रमवसे महे ॥ १०९७

४ ४ १ १९ ०१a तं वः सखायो मदाय पुनानमभि गायत ।
४ ४ १ १९ ०१c शिशुं न हव्यैः स्वदयन्त गूर्तिभिः ॥ १०९८
४ ४ १ १९ ०२a सं वत्स इव मातृभिरिन्दुर्हिन्वानो अज्यते ।
४ ४ १ १९ ०२c देवावीर्मदो मतिभिः परिष्कृतः ॥ १०९९
४ ४ १ १९ ०३a अयं दक्षाय साधनोऽयँ शर्धाय वीतये ।
४ ४ १ १९ ०३c अयं देवेभ्यो मधुमत्तरः सुतः ॥ ११००

४ ४ १ २० ०१a सोमाः पवन्त इन्दवोऽस्मभ्यं गातुवित्तमाः ।
४ ४ १ २० ०१c मित्राः सुवाना अरेपसः स्वाध्यः स्वर्विदः ॥ ११०१
४ ४ १ २० ०२a ते पूतासो विपश्चितः सोमासो दध्याशिरः ।
४ ४ १ २० ०२c सूरासो न दर्शतासो जिगत्नवो ध्रुवा घृते ॥ ११०२
४ ४ १ २० ०३a सुष्वाणासो व्यद्रिभिश्चिताना गोरधि त्वचि ।
४ ४ १ २० ०३c इषमस्मभ्यमभितः समस्वरन्वसुविदः ॥ ११०३

४ ४ १ २१ ०१a अया पवा पवस्वैना वसूनि माँश्चत्व इन्दो सरसि प्र धन्व ।
४ ४ १ २१ ०१c ब्रध्नश्चिद्यस्य वातो न जूतिं पुरुमेधाश्चित्तकवे नरं धात् ॥ ११०४
४ ४ १ २१ ०२a उत न एना पवया पवस्वाधि श्रुते श्रवाय्यस्य तीर्थे ।
४ ४ १ २१ ०२c षष्टिँ सहस्रा नैगुतो वसूनि वृक्षं न पक्वं धूनवद्रणाय ॥ ११०५
४ ४ १ २१ ०३a महीमे अस्य वृष नाम शूषे माँश्चत्वे वा पृशने वा वधत्रे ।
४ ४ १ २१ ०३c अस्वापयन्निगुतः स्नेहयच्चापामित्राँ अपाचितो अचेतः ॥ ११०६

४ ४ १ २२ ०१a अग्ने त्वं नो अन्तम उत त्राता शिवो भुवो वरूथ्यः ॥ ११०७
४ ४ १ २२ ०२a वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमो रयिं दाः ॥ ११०८
४ ४ १ २२ ०३a तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः ॥ ११०९

४ ४ १ २३ ०१a इमा नु कं भुवना सीषधेमेन्द्रश्च विश्वे च देवाः ॥ १११०
४ ४ १ २३ ०२a यज्ञं च नस्तन्वं च प्रजां चादित्यैरिन्द्रः सह सीषधातु ॥ १११११
४ ४ १ २३ ०३a आदित्यैरिन्द्रः सगणो मरुद्भिरस्मभ्यं भेषजा करत् ॥ १११२

४ ४ १ २४ ०१a प्र व इन्द्राय वृत्रहन्तमाय विप्राय गाथं गायत यं जुजोषते ॥ १११३

४ ४ १ २४ ०२a अर्चन्त्यर्कं मरुतः स्वर्का आ स्तोभति श्रुतो युवा स इन्द्रः ॥ १११४

४ ४ १ २४ ०३a उप प्रक्षे मधुमति क्षियन्तः पुष्येम रयिं धीमहे त इन्द्र ॥ १११५

चतुर्थ प्रपाठकः । द्वितीयोऽर्धः

४ ४ २ ०१ ०१a प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।

४ ४ २ ०१ ०१c महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येति रेभन् ॥ १११६

४ ४ २ ०१ ०२a प्र हँसासस्तृपला वग्नुमच्छामादस्तं वृषगणा अयासुः ।

४ ४ २ ०१ ०२c आङ्गोषिणं पवमानँ सखायो दुर्मर्षं वाणं प्र वदन्ति साकम् ॥ १११७

४ ४ २ ०१ ०३a स योजत उरुगायस्य जूतिं वृथा क्रीडन्तं मिमते न गावः ।

४ ४ २ ०१ ०३c परीणसं कृणुते तिग्मशृङ्गो दिवा हरिर्ददृशे नक्तमृज्रः ॥ १११८

४ ४ २ ०१ ०४a प्र स्वानासो रथा इवार्वन्तो न अवस्यवः ।

४ ४ २ ०१ ०४c सोमासो राये अक्रमुः ॥ १११९

४ ४ २ ०१ ०५a हिन्वानासो रथा इव दधन्विरे गभस्त्योः ।

४ ४ २ ०१ ०५c भरासः कारिणामिव ॥ ११२०

४ ४ २ ०१ ०६a राजानो न प्रशस्तिभिः सोमासो गोभिरञ्जते ।

४ ४ २ ०१ ०६c यज्ञो न सप्त धातृभिः ॥ ११२१

४ ४ २ ०१ ०७a परि स्वानास इन्दवो मदाय बर्हणा गिरा ।

४ ४ २ ०१ ०७c मधो अर्षन्ति धारया ॥ ११२२

४ ४ २ ०१ ०८a आपानासो विवस्वतो जिन्वन्त उषसो भगम् ।

४ ४ २ ०१ ०८c सूरा अण्वं वि तन्वते ॥ ११२३

४ ४ २ ०१ ०९a अप द्वारा मतीनां प्रत्ना ऋण्वन्ति कारवः ।

४ ४ २ ०१ ०९c वृष्णो हरस आयवः ॥ ११२४

४ ४ २ ०१ १०a समीचीनास आशत होतारः सप्तजानयः ।

४ ४ २ ०१ १०c पदमेकस्य पिप्रतः ॥ ११२५

४ ४ २ ०१ ११a नाभा नाभिं न आ ददे चक्षुषा सूर्य दृशे ।

४ ४ २ ०१ ११c कवेरपत्यमा दुहे ॥ ११२६

४ ४ २ ०१ १२a अभि प्रियं दिवस्पदमध्वर्युभिर्गुहा हितम् ।

४ ४ २ ०१ १३c सूरः पस्यति चक्षसा ॥ ११२७

४ ४ २ ०२ ०१a असृग्रमिन्दवः पथा धर्मन्नृतस्य सुश्रियः ।
४ ४ २ ०२ ०१c विदाना अस्य योजना ॥ ११२८
४ ४ २ ०२ ०२a प्र धारा मधो अग्रियो महीरपो वि गाहते ।
४ ४ २ ०२ ०२c हविर्हविःषु वन्द्यः ॥ ११२९
४ ४ २ ०२ ०३a प्र युजा वाचो अग्रियो वृषो अचिक्रदद्वने ।
४ ४ २ ०२ ०३c सद्माभि सत्यो अध्वरः ॥ ११३०
४ ४ २ ०२ ०४a परि यत्काव्या कविर्नृम्णा पुनानो अर्षति ।
४ ४ २ ०२ ०४c स्वर्वाजी सिषासति ॥ ११३१
४ ४ २ ०२ ०५a पवमानो अभि स्पृधो विशो राजेव सीदति ।
४ ४ २ ०२ ०५c यदीमृण्वन्ति वेधसः ॥ ११३२
४ ४ २ ०२ ०६a अव्या वारे परि प्रियो हरिर्वनेषु सीदति ।
४ ४ २ ०२ ०६c रेभो वनुष्यते मति ॥ ११३३
४ ४ २ ०२ ०७a स वायुमिन्द्रमश्विना साकं मदेन गच्छति ।
४ ४ २ ०२ ०७c रणा यो अस्य धर्मणा ॥ ११३४
४ ४ २ ०२ ०८a आ मित्रे वरुणे भगे मधोः पवन्त ऊर्मयः ।
४ ४ २ ०२ ०८c विदाना अस्य शक्मभिः ॥ ११३५
४ ४ २ ०२ ०९a अस्मभ्यँ रोदसी रयिं मध्वो वाजस्य सातये ।
४ ४ २ ०२ ०९c श्रवो वसूनि सञ्जितम् ॥ ११३६
४ ४ २ ०२ १०a आ ते दक्षं मयोभुवं वह्निमद्या वृणीमहे ।
४ ४ २ ०२ १०c पान्तमा पुरुस्पृहम् ॥ ११३७
४ ४ २ ०२ ११a आ मन्द्रमा वरेण्यमा विप्रमा मनीषिणम् ।
४ ४ २ ०२ ११c पान्तमा पुरुस्पृहम् ॥ ११३८
४ ४ २ ०२ १२a आ रयिमा सुचेतुनमा सुक्रतो तनूष्वा ।
४ ४ २ ०२ १२c पान्तमा पुरुस्पृहम् ॥ ११३९

४ ४ २ ०३ ०१a मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।
४ ४ २ ०३ ०१c कविँ सम्राजमतिथिं जनानामासन्नः पात्रं जनयन्त देवाः ॥ ११४०
४ ४ २ ०३ ०२a त्वां विश्वे अमृत जायमानँ शिशुं न देवा अभि सं नवन्ते ।
४ ४ २ ०३ ०२c तव क्रतुभिरमृतत्वमायन्वैश्वानर यत्पित्रोरदीदेः ॥ ११४१
४ ४ २ ०३ ०३a नाभिं यज्ञानाँ सदनँ रयीणां महामाहावमभि सं नवन्त ।
४ ४ २ ०३ ०३c वैश्वानरँ रथ्यमध्वराणां यज्ञस्य केतुं जनयन्त देवाः ॥ ११४२

४ ४ २ ०४ ०१a प्र वो मित्राय गायत वरुणाय विपा गिरा ।
४ ४ २ ०४ ०१c महिक्षत्रावृतं बृहत् ॥ ११४३
४ ४ २ ०४ ०२a सम्राजा या घृतयोनी मित्रश्चोभा वरुणश्च ।
४ ४ २ ०४ ०२c देवा देवेषु प्रशस्ता ॥ ११४४
४ ४ २ ०४ ०३a ता नः शक्तं पर्थिवस्य महो रायो दिव्यस्य ।
४ ४ २ ०४ ०३c महि वां क्षत्रं देवेषु ॥ ११४५

४ ४ २ ०५ ०१a इन्द्रा याहि चित्रभानो सुता इमे त्वायवः ।
४ ४ २ ०५ ०१c अण्वीभिस्तना पूतासः ॥ ११४६
४ ४ २ ०५ ०२a इन्द्रा याहि धियेषितो विप्रजूतः सुतावतः ।
४ ४ २ ०५ ०२c उप ब्रह्माणि वाघतः ॥ ११४७
४ ४ २ ०५ ०३a इन्द्रा याहि तूतुजान उप ब्रह्माणि हरिवः ।
४ ४ २ ०५ ०३c सुते दधिष्व नश्चनः ॥ ११४८

४ ४ २ ०६ ०१a तमीडिष्व यो अर्चिषा वना विश्वा परिष्वजत् ।
४ ४ २ ०६ ०१c कृष्णा कृणोति जिह्वया ॥ ११४९
४ ४ २ ०६ ०२a य इद्ध आविवासति सुम्नमिन्द्रस्य मर्त्यः ।
४ ४ २ ०६ ०२c द्युम्नाय सुतरा अपः ॥ ११५०
४ ४ २ ०६ ०३a ता नो वाजवतीरिष आशून्पिपृतमर्वतः ।
४ ४ २ ०६ ०३c एन्द्रमग्निं च वोढवे ॥ ११५१

४ ४ २ ०७ ०१a प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतँ सखा सख्युर्न प्र मिनाति सङ्गिरम् ।
४ ४ २ ०७ ०१c मर्य इव युवतिभिः समर्षति सोमः कलशे शतयाम्ना पथा ॥ ११५२
४ ४ २ ०७ ०२a प्र वो धियो मन्द्रयुवो विपन्युवः पनस्युवः संवरणेष्वक्रमुः ।
४ ४ २ ०७ ०२c हरिं क्रीडन्तमभ्यनूषत स्तुभोऽभि धेनवः पयसेदशिश्रयुः ॥ ११५३
४ ४ २ ०७ ०३a आ नः सोम संयतं पिप्युषीमिषमिन्दो पवस्व पवमान ऊर्मिणा ।
४ ४ २ ०७ ०३c या नो दोहते त्रिरहन्नसश्चुषी क्षुमद्वाजवन्मधुमत्सुवीर्यम् ॥ ११५४

४ ४ २ ०८ ०१a न किष्टं कर्मणा नशद्यश्चकार सदावृधम् ।
४ ४ २ ०८ ०१c इन्द्रं न यज्ञैर्विश्वगूर्त्तमृभ्वसमधृष्टं धृष्णुमोजसा ॥ ११५५
४ ४ २ ०८ ०२a अषाढमुग्रं पृतनासु सासहिं यस्मिन्महीरुरुज्रयः ।
४ ४ २ ०८ ०२c सं धेनवो जायमाने अनोनवुर्द्यावः क्षामीरनोनवुः ॥ ११५६

४ ४ २ ०९ ०१a सखाय आ नि षीदत पुनानाय प्र गायत ।
४ ४ २ ०९ ०१c शिशुं न यज्ञैः परि भूषत श्रिये ॥ ११५७
४ ४ २ ०९ ०२a समी वत्सं न मातृभिः सृजता गयसाधनम् ।
४ ४ २ ०९ ०२c देवाव्याꣳ मदमभि द्विशवसम् ॥ ११५८
४ ४ २ ०९ ०३a पुनाता दक्षसाधनं यथा शर्धाय वीतये ।
४ ४ २ ०९ ०३c यथा मित्राय वरुणाय शन्तमम् ॥ ११५९

४ ४ २ १० ०१a प्र वाज्यक्षाः सहस्रधारस्तिरः पवित्रं वि वारमव्यम् ॥ ११६०
४ ४ २ १० ०२a स वाज्यक्षाः सहस्ररेता अद्भिर्मृजानो गोभिः श्रीणानः ॥ ११६१
४ ४ २ १० ०३a प्र सोम याहीन्द्रस्य कुक्षा नृभिर्येमानो अद्रिभिः सुतः ॥ ११६२

४ ४ २ ११ ०१a ये सोमासः परावति ये अर्वावति सुन्विरे ।
४ ४ २ ११ ०१c ये वादः शर्यणावति ॥ ११६३
४ ४ २ ११ ०२a य आर्जीकेषु कृत्वसु ये मध्ये पस्त्यानाम् ।
४ ४ २ ११ ०२c ये वा जनेषु पञ्चसु ॥ ११६४
४ ४ २ ११ ०३a ते नो वृष्टिं दिवस्परि पवन्तामा सुवीर्यम् ।
४ ४ २ ११ ०३c स्वाना देवास इन्दवः ॥ ११६५

४ ४ २ १२ ०१a आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात् ।
४ ४ २ १२ ०१c अग्ने त्वां कामये गिरा ॥ ११६६
४ ४ २ १२ ०२a पुरुत्रा हि सदृङ्ङसि दिशो विश्वा अनु प्रभुः ।
४ ४ २ १२ ०२c समत्सु त्वा हवामहे ॥ ११६७
४ ४ २ १२ ०३a समत्स्वग्निमवसे वाजयन्तो हवामहे ।
४ ४ २ १२ ०३c वाजेषु चित्रराधसम् ॥ ११६८

४ ४ २ १३ ०१a त्वं न इन्द्रा भर ओजो नृम्णँ शतक्रतो विचर्षणे ।
४ ४ २ १३ ०१c आ वीरं पृतनासहम् ॥ ११६९
४ ४ २ १३ ०२a त्वँ हि नः पिता वसो त्वं माता शतक्रतो बभूविथ ।
४ ४ २ १३ ०२c अथा ते सुम्नमीमहे ॥ ११७०
४ ४ २ १३ ०३a त्वाँ शुष्मिन्पुरुहूत वाजयन्तमुप ब्रुवे सहस्कृत ।
४ ४ २ १३ ०३c स नो रास्व सुवीर्यम् ॥ ११७१
४ ४ २ १३ ०४a यदिन्द्र चित्र म इह नास्ति त्वादातमद्रिवः ।
४ ४ २ १३ ०४c राधस्तन्नो विदद्वस उभयाहस्त्या भर ॥ ११७२
४ ४ २ १३ ०५a यन्मन्यसे वरेण्यमिन्द्र द्युक्षं तदा भर ।

४ ४ २ १३ ०५c विद्याम तस्य ते वयमकूपारस्य दावनः ॥ ११७३
४ ४ २ १३ ०६a यत्ते दिक्षु प्रराध्यं मनो अस्ति श्रुतं बृहत् ।
४ ४ २ १३ ०६c तेन दृढा चिदद्रिव आ वाजं दर्षि सातये ॥ ११७४

पञ्चम प्रपाठकः । प्रथमोऽर्धः

४ ५ १ ०१ ०१a शिशुं जज्ञानँ हर्यतं मृजन्ति शुम्भन्ति विप्रं मरुतो गणेन ।
४ ५ १ ०१ ०१c कविर्गीर्भिः काव्येना कविः सन्त्सोमः पवित्रमत्येति रेभन् ॥ ११७५
४ ५ १ ०१ ०२a ऋषिमना य ऋषिकृत्स्वर्षाः सहस्रनीथः पदवीः कवीनाम् ।
४ ५ १ ०१ ०२c तृतीयं धाम महिषः सिषासन्त्सोमो विराजमनु राजति ष्टुप् ॥ ११७६
४ ५ १ ०१ ०३a चमूषच्छ्येनः शकुनो विभृत्वा गोविन्दुर्द्रप्स आयुधानि बिभ्रत् ।
४ ५ १ ०१ ०३c अपामूर्मिँ सचमानः समुद्रं तुरीयं धाम महिषो विवक्ति ॥ ११७७

४ ५ १ ०२ ०१a एते सोमा अभि प्रियमिन्द्रस्य काममक्षरन् ।
४ ५ १ ०२ ०१c वर्धन्तो अस्य वीर्यम् ॥ ११७८
४ ५ १ ०२ ०२a पुनानासश्चमूषदो गच्छन्तो वायुमश्विना ।
४ ५ १ ०२ ०२c ते नो धत्त सुवीर्यम् ॥ ११८१
४ ५ १ ०२ ०३a इन्द्रस्य सोम राधसे पुनानो हार्दि चोदय ।
४ ५ १ ०२ ०३c देवानां योनिमासदम् ॥ ११८०
४ ५ १ ०२ ०४a मृजन्ति त्वा देश क्षिपो हिन्वन्ति सप्त धीतयः ।
४ ५ १ ०२ ०४c अनु विप्रा अमादिषुः ॥ ११८१
४ ५ १ ०२ ०५a देवेभ्यस्त्वा मदाय कँ सृजानमति मेष्यः ।
४ ५ १ ०२ ०५c स गोभिर्वासयामसि ॥ ११८२
४ ५ १ ०२ ०६a पुनानः कलशेष्वा वस्त्राण्यरुषो हरिः ।
४ ५ १ ०२ ०६c परि गव्यान्यव्यत ॥ ११८३
४ ५ १ ०२ ०७a मघोन आ पवस्व नो जहि विश्वा अप द्विषः ।
४ ५ १ ०२ ०७c इन्दो सखायमा विश ॥ ११८४
४ ५ १ ०२ ०८a नृचक्षसं त्वा वयमिन्द्रपीतँ स्वर्विदम् ।
४ ५ १ ०२ ०८c भक्षीमहि प्रजामिषम् ॥ ११८५
४ ५ १ ०२ ०९a वृष्टिं दिवः परि स्रव द्युम्नं पृथिव्या अधि ।
४ ५ १ ०२ ०९c सहो नः सोम पृत्सु धाः ॥ ११८६

४ ५ १ ०३ ०१a सोमः पुनानो अर्षति सहस्रधारो अत्यविः ।
४ ५ १ ०३ ०१c वायोरिन्द्रस्य निष्कृतम् ॥ ११८७

४ ५ १ ०३ ०२a पवमानमवस्यवो विप्रमभि प्र गायत ।
४ ५ १ ०३ ०२c सुष्वाणं देववीतये ॥ ११८८
४ ५ १ ०३ ०३a पवन्ते वाजसातये सोमाः सहस्रपाजसः ।
४ ५ १ ०३ ०३c गृणाना देववीतये ॥ ११८९
४ ५ १ ०३ ०४a उत नो वाजसातये पवस्व बृहतीरिषः ।
४ ५ १ ०३ ०४c द्युमदिन्दो सुवीर्यम् ॥ ११९०
४ ५ १ ०३ ०५a अत्या हियाना न हेतृभिरसृग्रं वाजसातये ।
४ ५ १ ०३ ०५c वि वारमव्यमाशवः ॥ ११९१
४ ५ १ ०३ ०६a ते नः सहस्रिणँ रयिं पवन्तामा सुवीर्यम् ।
४ ५ १ ०३ ०६c सुवाना देवास इन्दवः ॥ ११९२
४ ५ १ ०३ ०७a वाश्रा अर्षन्तीन्दवोऽभि वत्सं न मातरः ।
४ ५ १ ०३ ०७c दधन्विरे गभस्त्योः ॥ ११९३
४ ५ १ ०३ ०८a जुष्ट इन्द्राय मत्सरः पवमान कनिक्रदत् ।
४ ५ १ ०३ ०८c विश्वा अप द्विषो जहि ॥ ११९४
४ ५ १ ०३ ०९a अपघ्नन्तो अराव्णः पवमानाः स्वर्दृशः ।
४ ५ १ ०३ ०९c योनावृतस्य सीदत ॥ ११९५

४ ५ १ ०४ ०१a सोमा असृग्रमिन्दवः सुता ऋतस्य धारया ।
४ ५ १ ०४ ०१c इन्द्राय मधुमत्तमाः ॥ ११९६
४ ५ १ ०४ ०२a अभि विप्रा अनूषत गावो वत्सं न धेनवः ।
४ ५ १ ०४ ०२c इन्द्रँ सोमस्य पीतये ॥ ११९७
४ ५ १ ०४ ०३a मदच्युत्क्षेति सादने सिन्धोरूर्मा विपश्चित् ।
४ ५ १ ०४ ०३c सोमो गौरी अधि श्रितः ॥ ११९८
४ ५ १ ०४ ०४a दिवो नाभा विचक्षणोऽव्यो वारे महीयते ।
४ ५ १ ०४ ०४c सोमो यः सुक्रतुः कविः ॥ ११९९
४ ५ १ ०४ ०५a यः सोमः कलशेष्वा अन्तः पवित्र आहितः ।
४ ५ १ ०४ ०५c तमिन्दुः परि षस्वजे ॥ १२००
४ ५ १ ०४ ०६a प्र वाचमिन्दुरिष्यति समुद्रस्याधि विष्टपि ।
४ ५ १ ०४ ०६c जिन्वन्कोशं मधुश्चुतम् ॥ १२०१
४ ५ १ ०४ ०७a नित्यस्तोत्रो वनस्पतिर्धेनामन्तः सबर्दुघाम् ।
४ ५ १ ०४ ०७c हिन्वानो मानुषा युजा ॥ १२०२
४ ५ १ ०४ ०८a आ पवमान धारय रयिँ सहस्रवर्चसम् ।

४ ५ १ ०४ ०८c अस्मे इन्दो स्वाभुवम् ॥ १२०३
४ ५ १ ०४ ०९a अभि प्रिया दिवः कविर्विप्रः स धारया सुतः ।
४ ५ १ ०४ ०९c सोमो हिन्वे परावति ॥ १२०४

४ ५ १ ०५ ०१a उत्ते शुष्मास ईरते सिन्धोरूर्मेरिव स्वनः ।
४ ५ १ ०५ ०१c वाणस्य चोदया पविम् ॥ १२०५
४ ५ १ ०५ ०२a प्रसवे त उदीरते तिस्रो वाचो मखस्युवः ।
४ ५ १ ०५ ०२c यदव्य एषि सानवि ॥ १२०६
४ ५ १ ०५ ०३a अव्या वारैः परि प्रियँ हरिँ हिन्वन्त्यद्रिभिः ।
४ ५ १ ०५ ०३c पवमानं मधुश्चुतम् ॥ १२०७
४ ५ १ ०५ ०४a आ पवस्व मदिन्तम पवित्रं धारया कवे ।
४ ५ १ ०५ ०४c अर्कस्य योनिमासदम् ॥ १२०८
४ ५ १ ०५ ०५a स पवस्व मदिन्तम गोभिरञ्जानो अक्तुभिः ।
४ ५ १ ०५ ०५c एन्द्रस्य जठरं विश ॥ १२०९

४ ५ १ ०६ ०१a अया वीती परि स्रव यस्त इन्दो मदेष्वा ।
४ ५ १ ०६ ०१c अवाहन्नवतीर्नव ॥ १२१०
४ ५ १ ०६ ०२a पुरः सद्य इत्थाधिये दिवोदासाय शम्बरम् ।
४ ५ १ ०६ ०२c अध त्यं तुर्वशं यदुम् ॥ १२१च्लिस्दर्
४ ५ १ ०६ ०३a परि नो अश्वमश्वविद्गोमदिन्दो हिरण्यवत् ।
४ ५ १ ०६ ०३c क्षरा सहस्रिणीरिषः ॥ १२१२

४ ५ १ ०७ ०१a अपघ्नन्पवते मृधोऽप सोमो अराव्णः ।
४ ५ १ ०७ ०१c गच्छन्निन्द्रस्य निष्कृतम् ॥ १२१३
४ ५ १ ०७ ०२a महो नो राय आ भर पवमान जही मृधः ।
४ ५ १ ०७ ०२c रास्वेन्दो वीरवद्यशः ॥ १२१४
४ ५ १ ०७ ०३a न त्वा शतं च न ह्रुतो राधो दित्सन्तमा मिनन् ।
४ ५ १ ०७ ०३c यत्पुनानो मखस्यसे ॥ १२१५

४ ५ १ ०८ ०१a अया पवस्व धारया यया सूर्यमरोचयः ।
४ ५ १ ०८ ०१c हिन्वानो मानुषीरपः ॥ १२१६
४ ५ १ ०८ ०२a अयुक्त सूर एतशं पवमानो मनावधि ।
४ ५ १ ०८ ०२c अन्तरिक्षेण यातवे ॥ १२१७
४ ५ १ ०८ ०३a उत त्या हरितो रथे सूरो अयुक्त यातवे ।

४ ५ १ ०८ ०३c इन्दुरिन्द्र इति ब्रुवन् ॥ १२१८

४ ५ १ ०९ ०१a अग्निं वो देवमग्निभिः सजोषा यजिष्ठं दूतमध्वरे कृणुध्वम् ।
४ ५ १ ०९ ०१c यो मर्त्येषु निध्रुविर्ऋतावा तपुर्मूर्धा घृतान्नः पावकः ॥ १२१९
४ ५ १ ०९ ०२a प्रोथदश्वो न यवसेऽविष्यन्यदा महः संवरणाद्व्यस्थात् ।
४ ५ १ ०९ ०२c आदस्य वातो अनु वाति शोचिरध स्म ते व्रजनं कृष्णमस्ति ॥ १२२०
४ ५ १ ०९ ०३a उद्यस्य ते नवजातस्य वृष्णोऽग्ने चरन्त्यजरा इधानाः ।
४ ५ १ ०९ ०३c अच्छा द्यामरुषो धूम एषि सं दूतो अग्न ईयसे हि देवान् ॥ १२२१

४ ५ १ १० ०१a तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे ।
४ ५ १ १० ०१c स वृषा वृषभो भुवत् ॥ १२२२
४ ५ १ १० ०२a इन्द्रः स दामने कृत ओजिष्ठः स बले हितः ।
४ ५ १ १० ०२c द्युम्नी श्लोकी स सोम्यः ॥ १२२३
४ ५ १ १० ०३a गिरा वज्रो न सम्भृतः सबलो अनपच्युतः ।
४ ५ १ १० ०३c ववक्ष उग्रो अस्तृतः ॥ १२२४

४ ५ १ ११ ०१a अध्वर्यो अद्रिभिः सुतँ सोमं पवित्र आ नय ।
४ ५ १ ११ ०१c पुनाहीन्द्राय पातवे ॥ १२२५
४ ५ १ ११ ०२a तव त्य इन्दो अन्धसो देवा मधोर्व्याशत ।
४ ५ १ ११ ०२c पवमानस्य मरुतः ॥ १२२६
४ ५ १ ११ ०३a दिवः पीयूषमुत्तमँ सोममिन्द्राय वज्रिणे ।
४ ५ १ ११ ०३c सुनोता मधुमत्तमम् ॥ १२२७

४ ५ १ १२ ०१a धर्त्ता दिवः पवते कृत्व्यो रसो दक्षो देवानामनुमाद्यो नृभिः ।
४ ५ १ १२ ०१c हरिः सृजानो अत्यो न सत्वभिर्वृथा पाजाँसि कृणुषे नदीष्वा ॥ १२२८
४ ५ १ १२ ०२a शूरो न धत्त आयुधा गभस्त्योः स्वा३ः सिषासन्रथिरो गविष्टिषु ।
४ ५ १ १२ ०२c इन्द्रस्य शुष्ममीरयन्नपस्युभिरिन्दुर्हिन्वानो अज्यते मनीषिभिः ॥ १२२९
४ ५ १ १२ ०३a इन्द्रस्य सोम पवमान ऊर्मिणा तविष्यमाणो जठरेष्वा विश ।
४ ५ १ १२ ०३c प्र नः पिन्व विद्युदभ्रेव रोदसी धिया नो वाजाँ उप माहि शश्वतः ॥ १२३०

४ ५ १ १३ ०१a यदिन्द्र प्रागपागुदङ्ङ्ग्वा हूयसे नृभिः ।

४ ५ १ १३ ०१c सिमा पुरू नृषूतो अस्यानवेऽसि प्रशर्ध तुर्वशे ॥ १२३१
४ ५ १ १३ ०२a यद्वा रुमे रुशमे श्यावके कृप इन्द्र मादयसे सचा ।
४ ५ १ १३ ०२c कण्वासस्त्वा स्तोमेभिर्ब्रह्मवाहस इन्द्रा यच्छन्त्या गहि ॥ १२३२

४ ५ १ १४ ०१a उभयँ शृणवच्च न इन्द्रो अर्वागिदं वचः ।
४ ५ १ १४ ०१c सत्राच्या मघवान्त्सोमपीतये धिया शविष्ठ आ गमत् ॥ १२३३
४ ५ १ १४ ०२a तँ हि स्वराजं वृषभं तमोजसा धिषणे निष्टतक्षतुः ।
४ ५ १ १४ ०२c उतोपमानां प्रथमो नि षीदसि सोमकामँ हि ते मनः ॥ १२३४

४ ५ १ १५ ०१a पवस्व देव आयुषगिन्द्रं गच्छतु ते मदः ।
४ ५ १ १५ ०१c वायुमा रोह धर्मणा ॥ १२३५
४ ५ १ १५ ०२a पवमान नि तोशसे रयिँ सोम श्रवाय्यम् ।
४ ५ १ १५ ०२c इन्दो समुद्रमा विश ॥ १२३६
४ ५ १ १५ ०३a अपघ्नन्पवसे मृधः क्रतुवित्सोम मत्सरः ।
४ ५ १ १५ ०३c नुदस्वादेवयुं जनम् ॥ १२३७

४ ५ १ १६ ०१a अभी नो वाजसातमँ रयिमर्ष शतस्पृहम् ।
४ ५ १ १६ ०१c इन्दो सहस्रभर्णसं तुविद्युम्नं विभासहम् ॥ १२३८
४ ५ १ १६ ०२a वयं ते अस्य राधसो वसोर्वसो पुरुस्पृहः ।
४ ५ १ १६ ०२c नि नेदिष्ठतमा इषः स्याम सुम्ने ते आध्रिगो ॥ १२३९
४ ५ १ १६ ०३a परि स्य स्वानो अक्षरिदिन्दुरव्ये मदच्युतः ।
४ ५ १ १६ ०३c धारा य ऊर्ध्वो अध्वरे भ्राजा न याति गव्ययुः ॥ १२४०
४ ५ १ १६ ०४a पवस्व सोम महान्त्समुद्रः पिता देवानां विश्वाभि धाम ॥ १२४१
४ ५ १ १६ ०५a शुक्रः पवस्व देवेभ्यः सोम दिवे पृथिव्यै शं च प्रजाभ्यः ॥ १२४२
४ ५ १ १६ ०६a दिवो धर्त्तासि शुक्रः पीयूषः सत्ये विधर्मन्वाजी पवस्व ॥ १२४३

४ ५ १ १८ ०१a प्रेष्ठं वो अतिथिँ स्तुषे मित्रमिव प्रियम् ।
४ ५ १ १८ ०१c अग्ने रथं न वेद्यम् ॥ १२४४
४ ५ १ १८ ०२a कविमिव प्रशँस्यं यं देवास इति द्विता ।
४ ५ १ १८ ०२c नि मर्त्येष्वादधुः ॥ १२४५
४ ५ १ १८ ०३a त्वं यविष्ठ दाशुषो नॄँपाहि शृणुही गिरः ।
४ ५ १ १८ ०३c रक्षा तोकमुत त्मना ॥ १२४६

४ ५ १ १९ ०१a एन्द्र नो गधि प्रिय सत्राजिदगोह्य ।
४ ५ १ १९ ०१c गिरिर्न विश्वतः पृथुः पतिर्दिवः ॥ १२४७

४ ५ १ १९ ०२a अभि हि सत्य सोमपा उभे बभूथ रोदसी ।
४ ५ १ १९ ०२c इन्द्रासि सुन्वतो वृधः पतिर्दिवः ॥ १२४८
४ ५ १ १९ ०३a त्वँ हि शश्वतीनामिन्द्र धर्त्ता पुरामसि ।
४ ५ १ १९ ०३c हन्ता दस्योर्मनोर्वृधः पतिर्दिवः ॥ १२४९

४ ५ १ २० ०१a पुरां भिन्दुर्युवा कविरमितौजा अजायत ।
४ ५ १ २० ०१c इन्द्रो विश्वस्य कर्मणो धर्त्ता वज्री पुरुष्टुतः ॥ १२५०
४ ५ १ २० ०२a त्वं वलस्य गोमतोऽपावरद्रिवो बिलम् ।
४ ५ १ २० ०२c त्वां देवा अबिभ्युषस्तुज्यमानास आविषुः ॥ १२५१
४ ५ १ २० ०३a इन्द्रमीशानमोजसाभि स्तोमैरनूषत ।
४ ५ १ २० ०३c सहस्रं यस्य रातय उत वा सन्ति भूयसीः ॥ १२५२

पञ्चम प्रपाठकः । द्वितीयोऽर्धः

४ ५ २ ०१ ०१a अक्रान्त्समुद्रः प्रथमे विधर्मं जनयन्प्रजा भुवनस्य गोपाः ।
४ ५ २ ०१ ०१c वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे स्वानो अद्रिः ॥ १२५३
४ ५ २ ०१ ०२a मत्सि वायुमिष्टये राधसे च मत्सि मित्रावरुणा पूयमानः ।
४ ५ २ ०१ ०२c मत्सि शर्धो मारुतं मत्सि देवान्मत्सि द्यावापृथिवी देव सोम ॥ १२५४
४ ५ २ ०१ ०३a महत्तत्सोमो महिषश्चकारापां यद्गर्भोऽवृणीत देवान् ।
४ ५ २ ०१ ०३c अदधादिन्द्रे पवमान ओजोऽजनयत्सूर्ये ज्योतिरिन्दुः ॥ १२५५

४ ५ २ ०२ ०१a एष देवो अमर्त्यः पर्णवीरिव दीयते ।
४ ५ २ ०२ ०१c अभि द्रोणान्यासदम् ॥ १२५६
४ ५ २ ०२ ०२a एष विप्रैरभिष्टुतोऽपो देवो वि गाहते ।
४ ५ २ ०२ ०२c दधद्रत्नानि दाशुषे ॥ १२५७
४ ५ २ ०२ ०३a एष विश्वानि वार्या शूरो यन्निव सत्वभिः ।
४ ५ २ ०२ ०३c पवमानः सिषासति ॥ १२५८
४ ५ २ ०२ ०४a एष देवो रथर्यति पवमानो दिशस्यति ।
४ ५ २ ०२ ०४c आविष्कृणोति वग्वनुम् ॥ १२५९
४ ५ २ ०२ ०५a एष देवो विपन्युभिः पवमान ऋतायुभिः ।
४ ५ २ ०२ ०५c हरिर्वाजाय मृज्यते ॥ १२६०
४ ५ २ ०२ ०६a एष देवो विपा कृतोऽति ह्वराँसि धावति ।
४ ५ २ ०२ ०६c पवमानो अदाभ्यः ॥ १२६१

४ ५ २ ०२ ०७a एष दिवं वि धावति तिरो रजाँसि धारया ।
४ ५ २ ०२ ०७c पवमानः कनिक्रदत् ॥ १२६२
४ ५ २ ०२ ०८a एष दिवं व्यासरत्तिरो रजाँस्यस्पृतः ।
४ ५ २ ०२ ०८c पवमानः स्वध्वरः ॥ १२६३
४ ५ २ ०२ ०९a एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः ।
४ ५ २ ०२ ०९c हरिः पवित्रे अर्षति ॥ १२६४
४ ५ २ ०२ १०a एष उ स्य पुरुव्रतो जज्ञानो जनयन्निषः ।
४ ५ २ ०२ १०c धारया पवते सुतः ॥ १२६५

४ ५ २ ०३ ०१a एष धिया यात्यण्व्य शूरो रथेभिराशुभिः ।
४ ५ २ ०३ ०१c गच्छन्निन्द्रस्य निष्कृतम् ॥ १२६६
४ ५ २ ०३ ०२a एष पुरू धियायते बृहते देवतातये ।
४ ५ २ ०३ ०२c यत्रामृतास आशत ॥ १२६७
४ ५ २ ०३ ०३a एतं मृजन्ति मर्ज्यमुप द्रोणेष्वायवः ।
४ ५ २ ०३ ०३c प्रचक्राणं महीरिषः ॥ १२६८
४ ५ २ ०३ ०४a एष हितो वि नीयतेऽन्तः शुन्ध्यावता पथा ।
४ ५ २ ०३ ०४c यदी तुञ्जन्ति भूर्णयः ॥ १२६९
४ ५ २ ०३ ०५a एष रुक्मिभिरीयते वाजि शुभ्रेभिरँशुभिः ।
४ ५ २ ०३ ०५c पतिः सिन्धूनां भवन् ॥ १२७०
४ ५ २ ०३ ०६a एष शृङ्गाणि दोधुवच्छिशीते यूथ्यो३ वृषा ।
४ ५ २ ०३ ०६c नृम्णा दधान ओजसा ॥ १२७१
४ ५ २ ०३ ०७a एष वसूनि पिब्दनः परुषा ययिवाँ अति ।
४ ५ २ ०३ ०७c अव शादेषु गच्छति ॥ १२७२
४ ५ २ ०३ ०८a एतमु त्यं दश क्षिपो हरिँ हिवन्ति यातवे ।
४ ५ २ ०३ ०८c स्वायुधं मदिन्तमम् ॥ १२७३

४ ५ २ ०४ ०१a एष उ स्य वृषा रथोऽव्या वारेभिरव्यत ।
४ ५ २ ०४ ०१c गच्छन्वाजँ सहस्रिणम् ॥ १२७४
४ ५ २ ०४ ०२a एतं त्रितस्य योषणो हरिँ हिन्वन्त्यद्रिभिः ।
४ ५ २ ०४ ०२c इन्दुमिन्द्राय पीतये ॥ १२७५
४ ५ २ ०४ ०३a एष स्य मानुषीष्वा श्येनो न विक्षु सीदति ।
४ ५ २ ०४ ०३c गच्छं जारो न योषितम् ॥ १२७६
४ ५ २ ०४ ०४a एष स्य मद्यो रसोऽव चष्टे दिवः शिशुः ।

४ ५ २ ०४ ०४c य इन्दुर्वारमाविशत् ॥ १२७७
४ ५ २ ०४ ०५a एष स्य पीतये सुतो हरिरर्षति धर्णसिः ।
४ ५ २ ०४ ०५c क्रन्दन्योनिमभि प्रियम् ॥ १२७८
४ ५ २ ०४ ०६a एतं त्यँ हरितो दश मर्मृज्यन्ते अपस्युवः ।
४ ५ २ ०४ ०६c याभिर्मदाय शुम्भते ॥ १२७९

४ ५ २ ०५ ०१a एष वाजी हितो नृभिर्विश्वविन्मनसस्पतिः ।
४ ५ २ ०५ ०१c अव्यो वारं वि धावति ॥ १२८०
४ ५ २ ०५ ०२a एष पवित्रे अक्षरत्सोमो देवेभ्यः सुतः ।
४ ५ २ ०५ ०२c विश्वा धामान्याविशन् ॥ १२८१
४ ५ २ ०६ ०३a एष देवः शुभायतेऽधि योनावमर्त्यः ।
४ ५ २ ०६ ०३c वृत्रहा देववीतमः ॥ १२८२
४ ५ २ ०७ ०४a एष वृषा कनिक्रदद्दशभिर्जामिभिर्यतः ।
४ ५ २ ०७ ०४c अभि द्रोणानि धावति ॥ १२८३
४ ५ २ ०८ ०५a एष सूर्यमरोचयत्पवमानो अधि द्यवि ।
४ ५ २ ०८ ०५c पवित्रे मत्सरो मदः ॥ १२८४
४ ५ २ ०९ ०६a एष सूर्येण हासते संवसानो विवस्वता ।
४ ५ २ ०९ ०६c पतिर्वाचो अदाभ्यः ॥ १२८५

४ ५ २ ०६ ०१a एष कविरभिष्टुतः पवित्रे अधि तोशते ।
४ ५ २ ०६ ०१c पुनानो घ्नन्नप द्विषः ॥ १२८६
४ ५ २ ०६ ०२a एष इन्द्राय वायवे स्वर्जित्परि षिच्यते ।
४ ५ २ ०६ ०२c पवित्रे दक्षसाधनः ॥ १२८७
४ ५ २ ०६ ०३a एष नृभिर्वि नीयते दिवो मूर्धा वृषा सुतः ।
४ ५ २ ०६ ०३c सोमो वनेषु विश्ववित् ॥ १२८८
४ ५ २ ०६ ०४a एष गव्युरचिक्रदत्पवमानो हिरण्ययुः ।
४ ५ २ ०६ ०४c इन्दुः सत्राजिदस्तृतः ॥ १२८९
४ ५ २ ०६ ०५a एष शुष्म्यसिष्यददन्तरिक्षे वृषा हरिः ।
४ ५ २ ०६ ०५c पुनान इन्दुरिन्द्रमा ॥ १२९०
४ ५ २ ०६ ०६a एष शुष्म्यदाभ्यः सोमः पुनानो अर्षति ।
४ ५ २ ०६ ०६c देवावीरघशँसहा ॥ १२९१

४ ५ २ ०७ ०१a स सुतः पीतये वृषा सोमः पवित्रे अर्षति ।
४ ५ २ ०७ ०१c विघ्नन्रक्षाँसि देवयुः ॥ १२९२

४ ५ २ ०७ ०२a स पवित्रे विचक्षणो हरिरर्षति धर्णसिः ।
४ ५ २ ०७ ०२c अभि योनिं कनिक्रदत् ॥ १२९३
४ ५ २ ०७ ०३a स वाजी रोचना दिवः पवमानो वि धावति ।
४ ५ २ ०७ ०३c रक्षोहा वारमव्ययम् ॥ १२९४
४ ५ २ ०७ ०४a स त्रितस्याधि सानवि पवमानो अरोचयत् ।
४ ५ २ ०७ ०४c जामिभिः सूर्यं सह ॥ १२९५
४ ५ २ ०७ ०५a स वृत्रहा वृषा सुतो वरिवोविददाभ्यः ।
४ ५ २ ०७ ०५c सोमो वाजमिवासरत् ॥ १२९६
४ ५ २ ०७ ०६a स देवः कविनेषितो३ऽभि द्रोणानि धावति ।
४ ५ २ ०७ ०६c इन्दुरिन्द्राय मँहयन् ॥ १२९७

४ ५ २ ०८ ०१a यः पावमानीरध्येत्यृषिभिः सम्भृतँ रसम् ।
४ ५ २ ०८ ०१c सर्वं स पूतमश्नाति स्वदितं मातरिश्वना ॥ १२९८
४ ५ २ ०८ ०२a पावमानीर्यो अध्येत्यृषिभिः सम्भृतँ रसम् ।
४ ५ २ ०८ ०२c तस्मै सरस्वती दुहे क्षीरँ सर्पिर्मधूदकम् ॥ १२९९
४ ५ २ ०८ ०३a पावमानीः स्वस्त्ययनीः सुदुघा हि घृतश्चुतः ।
४ ५ २ ०८ ०३c ऋषिभिः सम्भृतो रसो ब्राह्मणेष्वमृतँ हितम् ॥ १३००
४ ५ २ ०८ ०४a पावमानीर्दधन्तु न इमं लोकमथो अमुम् ।
४ ५ २ ०८ ०४c कामान्त्समर्धयन्तु नो देवीर्देवैः समाहृताः ॥ १३०१
४ ५ २ ०८ ०५a येन देवाः पवित्रेणात्मानं पुनते सदा ।
४ ५ २ ०८ ०५c तेन सहस्रधारेण पावमानीः पुनन्तु नः ॥ १३०२
४ ५ २ ०८ ०६a पावमानीः स्वस्त्ययनीस्ताभिर्गच्छति नान्दनम् ।
४ ५ २ ०८ ०६c पुण्याँश्च भक्षान्भक्षयत्यमृतत्वं च गच्छति ॥ १३०३

४ ५ २ ०९ ०१a अगन्म महा नमसा यविष्ठं यो दीदाय समिद्धः स्वे दुरोणे ।
४ ५ २ ०९ ०१c चित्रभानुँ रोदसी अन्तरुर्वी स्वाहुतं विश्वतः प्रत्यञ्चम् ॥ १३०४
४ ५ २ ०९ ०२a स मह्ना विश्वा दुरितानि साह्वानग्नि ष्टवे दम आ जातवेदाः ।
४ ५ २ ०९ ०२c स नो रक्षिषद्दुरितादवद्यादस्मान्गृणत उत नो मघोनः ॥ १३०५
४ ५ २ ०९ ०३a त्वं वरुण उत मित्रो अग्ने त्वां वर्धन्ति मतिभिर्वसिष्ठाः ।
४ ५ २ ०९ ०३c त्वे वसु सुषणनानि सन्तु यूयं पात स्वस्तिभिः सदा नः ॥ १३०६

४ ५ २ १० ०१a महाँ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाँ इव ।
४ ५ २ १० ०१c स्तोमैर्वत्सस्य वावृधे ॥ १३०७
४ ५ २ १० ०१a कण्वा इन्द्रं यदक्रत स्तोमैर्यज्ञस्य साधनम् ।

४ ५ २ १० ०१c जामि ब्रुवत आयुधा ॥ १३०८
४ ५ २ १० ०१a प्रजामृतस्य पिप्रतः प्र यद्भरन्त वह्नयः ।
४ ५ २ १० ०१c विप्रा ऋतस्य वाहसा ॥ १३०९

४ ५ २ ११ ०१a पवमानस्य जिघ्नतो हरेश्चन्द्रा असृक्षत ।
४ ५ २ ११ ०१c जीरा अजिरशोचिषः ॥ १३१०
४ ५ २ ११ ०२a पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः ।
४ ५ २ ११ ०२c हरिश्चन्द्रो मरुद्गणः ॥ १३११
४ ५ २ ११ ०३a पवमान् व्यश्नुहि रश्मिभिर्वाजसातमः ।
४ ५ २ ११ ०३c दधत्स्तोत्रे सुवीर्यम् ॥ १३१२

४ ५ २ १२ ०१a परीतो षिञ्चता सुतँ सोमो य उत्तमँ हविः ।
४ ५ २ १२ ०१c दधन्वाँ यो नर्यो अप्स्वा३न्तरा सुषाव सोममद्रिभिः ॥ १३१३
४ ५ २ १२ ०२a नूनं पुनानोऽविभिः परि स्रवादब्धः सुरभिन्तरः ।
४ ५ २ १२ ०२c सुते चित्वाप्सु मदामो अन्धसा श्रीणन्तो गोभिरुत्तरम् ॥ १३१४
४ ५ २ १२ ०३a परि स्वानश्चक्षसे देवमादनः क्रतुरिन्दुर्विचक्षणः ॥ १३१५

४ ५ २ १३ ०१a असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत् ।
४ ५ २ १३ ०१c पुनानो वारमत्येष्यव्ययँ श्येनो न योनिं घृतवन्तमासदत् ॥ १३१६
४ ५ २ १३ ०२a पर्जन्यः पिता महिषस्य पर्णिनो नाभा पृथिव्या गिरिषु क्षयं दधे ।
४ ५ २ १३ ०२c स्वसार आपो अभि गा उदासरन्त्सं ग्रावभिर्वसते वीते अध्वरे ॥ १३१७
४ ५ २ १३ ०३a कविर्वेधस्या पर्येषि माहिनमत्यो न मृष्टो अभि वाजमर्षसि ।
४ ५ २ १३ ०३c अपसेधन्दुरिता सोम नो मृड घृता वसानः परि यासि निर्णिजम् ॥ १३१८

४ ५ २ १४ ०१a श्रायन्त इव सूर्यं विश्वेदिन्द्रस्य भक्षत ।
४ ५ २ १४ ०१c वसूनि जातो जनिमान्योजसा प्रति भागं न दीधिमः ॥ १३१९
४ ५ २ १४ ०२a अलर्षिरातिं वसुदामुप स्तुहि भद्रा इन्द्रस्य रातयः ।
४ ५ २ १४ ०२c यो अस्य कामं विधतो न रोषति मनो दानाय चोदयन् ॥ १३२०

४ ५ २ १५ ०१a यत इन्द्र भयामहे ततो नो अभ्यं कृधि ।
४ ५ २ १५ ०१c मघवन्छग्धि तव तन्न ऊतये वि द्विषो वि मृधो जहि ॥ १३२१
४ ५ २ १५ ०२a त्वँ हि राधस्पते राधसो महः क्षयस्यासि विध्रत्ता ।

४ ५ २ १५ ०२c तं त्वा वयं मघवन्निन्द्र गिर्वणः सुतावन्तो हवामहे ॥ १३२२

४ ५ २ १६ ०१a त्वँ सोमासि धारयुर्मन्द्र ओजिष्ठो अध्वरे ।
४ ५ २ १६ ०१c पवस्व मँहयद्रयिः ॥ १३२३
४ ५ २ १६ ०२a त्वँ सुतो मदिन्तमो दधन्वान्मत्सरिन्तमः ।
४ ५ २ १६ ०२c इन्दुः सत्राजिदस्तृतः ॥ १३२४
४ ५ २ १६ ०३a त्वँ सुष्वाणो अद्रिभिरभ्यर्ष कनिक्रदत् ।
४ ५ २ १६ ०३c द्युमन्तँ शुष्मा भर ॥ १३२५

४ ५ २ १७ ०१a पवस्व देववीतय इन्दो धाराभिरोजसा ।
४ ५ २ १७ ०१c आ कलशं मधुमान्त्सोम नः सदः ॥ १३२६
४ ५ २ १७ ०२a तव द्रप्सा उदप्रुत इन्द्रं मदाय वावृधुः ।
४ ५ २ १७ ०२c त्वां देवासो अमृताय कं पपुः ॥ १३२७
४ ५ २ १७ ०३a आ नः सुतास इन्दवः पुनाना धावता रयिम् ।
४ ५ २ १७ ०३c वृष्टिद्यावो रीत्यापः स्वर्विदः ॥ १३२८

४ ५ २ १८ ०१a परि त्यँ हर्यतँ हरिं बभ्रुं पुनन्ति वारेण ।
४ ५ २ १८ ०१c यो देवान्विश्वाँ इत्परि मदेन सह गच्छति ॥ १३२९
४ ५ २ १८ ०२a द्विर्यं पञ्च स्वयशसँ सखायो अद्रिसँहतम् ।
४ ५ २ १८ ०२c प्रियमिन्द्रस्य काम्यं प्रस्नापयन्त ऊर्मयः ॥ १३३०
४ ५ २ १८ ०३a इन्द्राय सोम पातवे वृत्रघ्ने परि षिच्यसे ।
४ ५ २ १८ ०३c नरे च दक्षिणावते वीराय सदनासदे ॥ १३३१

४ ५ २ १९ ०१a पवस्व सोम महे दक्षायाश्वो न निक्तो वाजी धनाय ॥ १३३२
४ ५ २ १९ ०२a प्र ते सोतारो रसं मदाय पुनन्ति सोमं महे द्युम्नाय ॥ १३३३
४ ५ २ १९ ०३a शिशुं जज्ञानँ हरिं मृजन्ति पवित्रे सोमं देवेभ्य इन्दुम् ॥ १३३४

४ ५ २ २० ०१a उषो षु जातमसुरं गोभिर्भङ्गं परिष्कृतम् ।
४ ५ २ २० ०१c इन्दुं देवा अयासिषुः ॥ १३३५
४ ५ २ २० ०२a तमिद्वर्धन्तु नो गिरो वत्सँ सँशिश्वरीरिव ।
४ ५ २ २० ०२c य इन्द्रस्य हृदँसनिः ॥ १३३६
४ ५ २ २० ०३a अर्षा नः सोम शं गवे धुक्षस्व पिप्युषीमिषम् ।
४ ५ २ २० ०३c वर्धा समुद्रमुक्थ्यम् ॥ १३३७

४ ५ २ २१ ०१a आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक् ।
४ ५ २ २१ ०१c येषामिन्द्रो युवा सखा ॥ १३३८

४ ५ २ २१ ०२a बृहन्निदिध्म एषां भूरि शस्त्रं पृथुः स्वरुः ।
४ ५ २ २१ ०२c येषामिन्द्रो युवा सखा ॥ १३३९
४ ५ २ २१ ०३a अयुद्ध इद्युधा वृतँ शूर आजति सत्वभिः ।
४ ५ २ २१ ०३c येषामिन्द्रो युवा सखा ॥ १३४०

४ ५ २ २२ ०१a य एक इद्विदयते वसु मर्त्ताय दाशुषे ।
४ ५ २ २२ ०१c ईशानो अप्रतिष्कुत इन्द्रो अङ्ग ॥ १३४१
४ ५ २ २२ ०२a यश्चिद्धि त्वा बहुभ्य आ सुतावाँ आविवासति ।
४ ५ २ २२ ०२c उग्रं तत्पत्यते शव इन्द्रो अङ्ग ॥ १३४२
४ ५ २ २२ ०३a कदा मर्त्तमराधसं पदा क्षुम्पमिव स्फुरत् ।
४ ५ २ २२ ०३c कदा नः शुश्रवद्गिर इन्द्रो अङ्ग ॥ १३४३

४ ५ २ २३ ०१a गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः ।
४ ५ २ २३ ०१c ब्रह्माणस्त्वा शतक्रत उद्वँशमिव येमिरे ॥ १३४४
४ ५ २ २३ ०२a यत्सानोः सान्वारुहो भूर्यस्पष्ट कर्त्त्वम् ।
४ ५ २ २३ ०२c तदिन्द्रो अर्थं चेतति यूथेन वृष्णिरेजति ॥ १३४५
४ ५ २ २३ ०३a युङ्क्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा ।
४ ५ २ २३ ०३c अथा न इन्द्र सोमपा गिरामुपश्रुतिं चर ॥ १३४६

षष्ठ प्रपाठकः । प्रथमोऽर्धः
४ ६ १ ०१ ०१a सुषमिद्धो न आ वह देवाँ अग्ने हविष्मते ।
४ ६ १ ०१ ०१c होतः पावक यक्षि च ॥ १३४७
४ ६ १ ०१ ०२a मधुमन्तं तनूनपाद्यज्ञं देवेषु नः कवे ।
४ ६ १ ०१ ०२c अद्या कृणुह्यूतये ॥ १३४८
४ ६ १ ०१ ०३a नराशँसमिह प्रियमस्मिन्यज्ञ उप ह्वये ।
४ ६ १ ०१ ०३c मधुजिह्वँ हविष्कृतम् ॥ १३४९
४ ६ १ ०१ ०४a अग्ने सुखतमे रथे देवाँ ईडित आ वह ।
४ ६ १ ०१ ०४c असि होता मनुर्हितः ॥ १३५०

४ ६ १ ०२ ०१a यदद्य सूर उदितेऽनागा मित्रो अर्यमा ।
४ ६ १ ०२ ०१c सुवाति सविता भगः ॥ १३५१
४ ६ १ ०२ ०२a सुप्रावीरस्तु स क्षयः प्र नु यामन्त्सुदानवः ।
४ ६ १ ०२ ०२c ये नो अँहोऽतिपिप्रति ॥ १३५२
४ ६ १ ०२ ०३a उत स्वराजो अदितिरदब्धस्य व्रतस्य ये ।

४ ६ १ ०२ ०३c महो राजान ईशते ॥ १३५३

४ ६ १ ०३ ०१a उ त्वा मन्दन्तु सोमाः कृणुष्व राधो अद्रिवः ।
४ ६ १ ०३ ०१c अव ब्रह्मद्विषो जहि ॥ १३५४
४ ६ १ ०३ ०२a पदा पणीनराधसो नि बाधस्व महाँ असि ।
४ ६ १ ०३ ०२c न हि त्वा कश्च न प्रति ॥ १३५५
४ ६ १ ०३ ०३a त्वमीशिषे सुतानामिन्द्र त्वमसुतानाम् ।
४ ६ १ ०३ ०३c त्वँ राजा जनानाम् ॥ १३५६

४ ६ १ ०४ ०१a आ जागृविर्विप्र ऋतां मतीनाँ सोमः पुनानो असदच्चमूषु ।
४ ६ १ ०४ ०१c सपन्ति यं मिथुनासो निकामा अध्वर्यवो रथिरासः सुहस्ताः ॥ १३५७
४ ६ १ ०४ ०२a स पुनान उप सूरे दधान ओबे अप्रा रोदसी वि ष आवः ।
४ ६ १ ०४ ०२c प्रिया चिद्यस्य प्रियसास ऊती सतो धनं कारिणे न प्र यँसत् ॥ १३५८
४ ६ १ ०४ ०३a स वर्धिता वर्धनः पूयमानः सोमो मीढ्वाँ अभि नो ज्योतिषावीत् ।
४ ६ १ ०४ ०३c यत्र नः पूर्वे पितरः पदज्ञाः स्वर्विदो अभि गा अद्रिमिष्णन् ॥ १३५९

४ ६ १ ०५ ०१a मा चिदन्यद्वि शँसत सखायो मा रिषण्यत ।
४ ६ १ ०५ ०१c इन्द्रमित्स्तोता वृषणँ सचा सुते मुहुरुक्था च शँसत ॥ १३६०
४ ६ १ ०५ ०२a अवक्रक्षिणं वृषभं यथा जुवं गां न चर्षणीसहम् ।
४ ६ १ ०५ ०२c विद्वेषणँ संवननमुभयङ्करं मँहिष्ठमुभयाविनम् ॥ १३६१

४ ६ १ ०६ ०१a उदु त्ये मधुमत्तमा गिर स्तोमास ईरते ।
४ ६ १ ०६ ०१c सत्राजितो धनसा अक्षितोतयो वाजन्तो रथा इव ॥ १३६२
४ ६ १ ०६ ०२a कण्वा इव भृगवः सूर्या इव विश्वमिद्धीतमाशत ।
४ ६ १ ०६ ०२c इन्द्रँ स्तोमेभिर्महयन्त आयवः प्रियमेधासो अस्वरन् ॥ १३६३

४ ६ १ ०७ ०१a पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः ।
४ ६ १ ०७ ०१c द्विषस्तरध्या ऋणया न ईरसे ॥ १३६४
४ ६ १ ०७ ०२a अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः ।
४ ६ १ ०७ ०२c गोजीरया रँहमानः पुरन्ध्या ॥ १३६५
४ ६ १ ०७ ०३a अनु हि त्वा सुतँ सोम मदामसि महे समर्यराज्ये ।
४ ६ १ ०७ ०३c वाजाँ अभि पवमान प्र गाहसे ॥ १३६६

४ ६ १ ०८ ०१a परि प्र धन्वेन्द्राय सोम स्वादुर्मित्राय पूष्णे भगाय ॥ १३६७
४ ६ १ ०८ ०२a एवामृताय महे क्षयाय स शुक्रो अर्ष दिव्यः पीयूषः ॥ १३६८
४ ६ १ ०८ ०३a इन्द्रस्ते सोम सुतस्य पेयात्क्रत्वे दक्षाय विश्वे च देवाः ॥ १३६९

४ ६ १ ०९ ०१a सूर्यस्येव रश्मयो द्रावयित्नवो मत्सरासः प्रसुतः साकमीरते ।
४ ६ १ ०९ ०१c तन्तुं ततं परि सर्गास आशवो नेन्द्राद्दते पवते धाम किं चन ॥ १३७०
४ ६ १ ०९ ०२a उपो मतिः पृच्यते सिच्यते मधु मन्द्राजनी चोदते अन्तरासनि ।
४ ६ १ ०९ ०२c पवमानः सन्तनिः सुन्वतामिव मधुमान्द्रप्सः परि वारमर्षति ॥ १३७१
४ ६ १ ०९ ०३a उक्षा मिमेति प्रति यन्ति धेनवो देवस्य देवीरुप यन्ति निष्कृतम् ।
४ ६ १ ०९ ०३c अत्यक्रमीदर्जुनं वारमव्ययमत्कं न निक्तं परि सोमो अव्यत ॥ १३७२

४ ६ १ १० ०१a अग्निं नरो दीधितिभिररण्योर्हस्तच्युतं जनयत प्रशस्तम् ।
४ ६ १ १० ०१c दूरेदृशं गृहपतिमथव्युम् ॥ १३७३
४ ६ १ १० ०२a तमग्निमस्ते वसवो न्यृण्वन्त्सुप्रतिचक्षमवसे कुतश्चित् ।
४ ६ १ १० ०२c दक्षाय्यो यो दम आस नित्यः ॥ १३७४
४ ६ १ १० ०३a प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ ।
४ ६ १ १० ०३c त्वाँ शश्वन्त उप यन्ति वाजाः ॥ १३७५

४ ६ १ ११ ०१a आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः ।
४ ६ १ ११ ०१c पितरं च प्रयन्त्स्वः ॥ १३७६
४ ६ १ ११ ०२a अन्तश्चरति रोचनास्य प्राणादपानती ।
४ ६ १ ११ ०२c व्यख्यन्महिषो दिवम् ॥ १३७७
४ ६ १ ११ ०३a त्रिँशद्धाम वि राजति वाक्पतङ्गाय धीयते ।
४ ६ १ ११ ०३c प्रति वस्तोरह द्युभिः ॥ १३७८

षष्ठ प्रपाठकः । द्वितीयोऽर्धः
४ ६ २ ०१ ०१a उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये ।
४ ६ २ ०१ ०१c आरे अस्मे च शृण्वते ॥ १३७९
४ ६ २ ०१ ०२a यः स्नीहितीषु पूर्व्यः सञ्जग्मानासु कृष्टिषु ।
४ ६ २ ०१ ०२c अरक्षद्दाशुषे गयम् ॥ १३८०
४ ६ २ ०१ ०३a स नो वेदो अमात्यमग्नी रक्षतु शन्तमः ।

४ ६ २ ०१ ०३c उतास्मान्पात्वँहसः ॥ १३८१
४ ६ २ ०१ ०४a उत ब्रुवन्तु जन्तव उदग्निर्वृत्रहाजनि ।
४ ६ २ ०१ ०४c धनञ्जयो रणेरणे ॥ १३८२

४ ६ २ ०२ ०१a अग्ने युङ्क्ष्वा हि ये तवाश्वासो देव साधवः ।
४ ६ २ ०२ ०१c अरं वहन्त्याशवः ॥ १३८३
४ ६ २ ०२ ०२a अच्छा नो याह्या वहाभि प्रयाँसि वीतये ।
४ ६ २ ०२ ०२c आ देवान्त्सोमपीतये ॥ १३८४
४ ६ २ ०२ ०३a उदग्ने भारत द्युमदजस्रेण दविद्युतत् ।
४ ६ २ ०२ ०३c शोचा वि भाह्यजर ॥ १३८५

४ ६ २ ०३०१a प्र सुन्वानायान्धसो मर्त्तो न वष्ट तद्वचः ।
४ ६ २ ०३०१c अप श्वानमराधसँ हता मखं न भृगवः ॥ १३८६
४ ६ २ ०३०२a आ जामिरत्के अव्यत भुजे न पुत्र ओण्योः ।
४ ६ २ ०३०२c सरज्जारो न योषणां वरो न योनिमासदम् ॥ १३८७
४ ६ २ ०३०३a स वीरो दक्षसाधनो वि यस्तस्तम्भ रोदसी ।
४ ६ २ ०३०३c हरिः पवित्रे अव्यत वेधा न योनिमासदम् ॥ १३८८

४ ६ २ ०४०१a अभ्रातृव्यो अना त्वमनापिरिन्द्र जनुषा सनादसि ।
४ ६ २ ०४०१c युधेदापित्वमिच्छसे ॥ १३८९
४ ६ २ ०४०२a न की रेवन्तँ सख्याय विन्दसे पीयन्ति ते सुराश्वः ।
४ ६ २ ०४०२c यदा कृणोषि नदनुँ समूहस्यादित्पितेव हूयसे ॥ १३९०

४ ६ २ ०५०१a आ त्वा सहस्रमा शतं युक्ता रथे हिरण्यये ।
४ ६ २ ०५०१c ब्रह्मयुजो हरय इन्द्र केशिनो वहन्तु सोमपीतये ॥ १३९१
४ ६ २ ०५०२a आ त्वा रथे हिरण्यये हरी मयूरशेप्या ।
४ ६ २ ०५०२c शितिपृष्ठा वहतां मध्वो अन्धसो विवक्षणस्य पीतये ॥ १३९२
४ ६ २ ०५०३a पिबा त्वा३स्य गिर्वणः सुतस्य पूर्वपा इव ।
४ ६ २ ०५०३c परिष्कृतस्य रसिन इयमासुतिश्चारुर्मदाय पत्यते ॥ १३९३

४ ६ २ ०६०१a आ सोता परि षिञ्चताश्वं न स्तोममप्तुरँ रजस्तुरम् ।
४ ६ २ ०६०१c वनप्रक्षमुदप्रुतम् ॥ १३९४
४ ६ २ ०६०२a सहस्रधारं वृषभं पयोदुहं प्रियं देवाय जन्मने ।
४ ६ २ ०६०२c ऋतेन य ऋतजातो विवावृधे राजा देव ऋतं बृहत् ॥ १३९५

४ ६ २ ०७०१a अग्निर्वृत्राणि जङ्घनद्द्रविणस्युर्विपन्यया ।

४ ६ २ ०७०१c समिद्धः शुक्र आहुतः ॥ १३९६
४ ६ २ ०७०२a गर्भे मातुः पितुष्पिता विदिद्युतानो अक्षरे ।
४ ६ २ ०७०२c सीदन्नृतस्य योनिमा ॥ १३९७
४ ६ २ ०७०३a ब्रह्म प्रजावदा भर जातवेदो विचर्षणे ।
४ ६ २ ०७०३c अग्ने यद्दीदयद्दिवि ॥ १३९८

४ ६ २ ०८०१a अस्य प्रेषा हेमना पूयमानो देवो देवेभिः समपृक्त रसम् ।
४ ६ २ ०८०१c सुतः पवित्रं पर्येति रेभन्मितेव सद्म पशुमन्ति होता ॥ १३९९
४ ६ २ ०८०२a भद्रा वस्त्रा समन्याऽऽ३ वसानो महान्कविर्निवचनानि शँसन् ।
४ ६ २ ०८०२c आ वच्यस्व चम्वोः पूयमानो विचक्षणो जागृविर्देववीतौ ॥ १४००
४ ६ २ ०८०३a समु प्रियो मृज्यते सानो अव्ये यशस्तरो यशसां क्षैतो अस्मे ।
४ ६ २ ०८०३c अभि स्वर धन्वा पूयमानो यूयं पात स्वस्तिभिः सदा नः ॥ १४०१

४ ६ २ ०९०१a एतो न्विन्द्रँ स्तवाम शुद्धँ शुद्धेन साम्ना ।
४ ६ २ ०९०१c शुद्धैरुक्थैर्वावृध्वाँसँ शुद्धैराशीर्वान्ममत्तु ॥ १४०२
४ ६ २ ०९०२a इन्द्र शुद्धो न आ गहि शुद्धः शुद्धाभिरूतिभिः ।
४ ६ २ ०९०२c शुद्धो रयिं नि धारय शुद्धो ममद्धि सोम्य ॥ १४०३
४ ६ २ ०९०३a इन्द्र शुद्धो हि नो रयिँ शुद्धो रत्नानि दाशुषे ।
४ ६ २ ०९०३c शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजँ सिषाससि ॥ १४०४

४ ६ २ १००१a अग्ने स्तोमं मनामहे सिध्रमद्य दिविस्पृशः ।
४ ६ २ १००१c देवस्य द्रविणस्यवः ॥ १४०५
४ ६ २ १००२a अग्निर्जुषत नो गिरो होता यो मानुषेष्वा ।
४ ६ २ १००२c स यक्षद्दैव्यं जनम् ॥ १४०६
४ ६ २ १००३a त्वमग्ने सप्रथा असि जुष्टो होता वरेण्यः ।
४ ६ २ १००३c त्वया यज्ञं वि तन्वते ॥ १४०७

४ ६ २ ११०१a अभि त्रिपृष्ठं वृषणं वयोधामाङ्गोषिणमवावशन्त वाणीः ।
४ ६ २ ११०१c वना वसानो वरुणो न सिन्धूर्वि रत्नधा दयते वार्याणि ॥ १४०८
४ ६ २ ११०२a शूरग्रामः सर्ववीरः सहावाञ्जेता पवस्व सनिता धनानि ।
४ ६ २ ११०२c तिग्मायुधः क्षिप्रधन्वा समत्स्वषाढः साह्वान्पृतनासु शत्रून् ॥ १४०९
४ ६ २ ११०३a उरुगव्यूतिरभयानि कृण्वन्त्समीचीने आ पवस्वा पुरन्धी ।
४ ६ २ ११०३c अपः सिषासन्नुषसः स्वा३र्गाः सं चिक्रदो महो अस्मभ्यं वाजान् ॥ १४१०

४ ६ २ १२०१a त्वमिन्द्र यशा अस्यृजीषी शवसस्पतिः ।
४ ६ २ १२०१c त्वं वृत्राणि हँस्यप्रतीन्येक इत्पुर्वनुत्तश्चर्षणीधृतिः ॥ १४११
४ ६ २ १२०२a तमु त्वा नूनमसुर प्रचेतसँ राधो भागमिवेमहे ।
४ ६ २ १२०२c महीव कृत्तिः शरणा त इन्द्र प्र ते सुम्ना नो अश्नवन् ॥ १४१२

४ ६ २ १३०१a यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारममर्त्यम् ।
४ ६ २ १३०१c अस्य यज्ञस्य सुक्रतुम् ॥ १४१३
४ ६ २ १३०२a अपां नपातँ सुभगँ सुदीदितिमग्निमु श्रेष्ठशोचिषम् ।
४ ६ २ १३०२c स नो मित्रस्य वरुणस्य सो अपामा सुम्नं यक्षते दिवि ॥ १४१४

४ ६ २ १४०१a यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः ।
४ ६ २ १४०१c स यन्ता शश्वतीरिषः ॥ १४१५
४ ६ २ १४०२a न किरस्य सहन्त्य पर्येता कयस्य चित् ।
४ ६ २ १४०२c वाजो अस्ति श्रवाय्यः ॥ १४१६
४ ६ २ १४०३a स वाजं विश्वचर्षणिरर्वद्भिरस्तु तरुता ।
४ ६ २ १४०३c विप्रेभिरस्तु सनिता ॥ १४१७

४ ६ २ १५०१a साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः ।
४ ६ २ १५०१c हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी ॥ १४१८
४ ६ २ १५०२a सं मातृभिर्न शिशुर्वावशानो वृषा दधन्वे पुरुवारो अद्भिः ।
४ ६ २ १५०२c मर्यो न योषामभि निष्कृतं यन्त्सं गच्छते कलश उस्रियाभिः ॥ १४१९
४ ६ २ १५०३a उत प्र पिप्य ऊधरघ्न्याया इन्दुर्धाराभिः सचते सुमेधाः ।
४ ६ २ १५०३c मूर्धानं गावः पयसा चमूष्वभि श्रीणन्ति वसुभिर्न नित्तैः ॥ १४२०

४ ६ २ १६००a पिबा सुतस्य रसिनो मत्स्वा न इन्द्र गोमतः ।
४ ६ २ १६००c आपिर्नो बोधि सधमाद्ये वृधे३ऽस्माँ अवन्तु ते धियः ॥ १४२१
४ ६ २ १६००a भूयाम ते सुमतौ वाजिनो वयं मा न स्तरभिमातये ।
४ ६ २ १६००c अस्मां चित्राभिरवतादभिष्टिभिरा नः सुम्नेषु यामय ॥ १४२२

४ ६ २ १७०१a त्रिरस्मै सप्त धेनवो दुदुह्रिरे सत्यामाशिरं परमे व्योमनि ।
४ ६ २ १७०१c चत्वार्यन्या भुवनानि निर्णिजे चारूणि चक्रे यदृतैरवर्धत ॥ १४२३
४ ६ २ १७०२a स भक्षमाणो अमृतस्य चारुण उभे द्यावा काव्येना वि शश्रथे ।
४ ६ २ १७०२c तेजिष्ठा अपो मँहना परि व्यत यदी देवस्य श्रवसा सदो विदुः ॥ १४२४

४ ६ २ १७०३a ते अस्य सन्तु केतवोऽमृत्यवोऽदाभ्यासो जनुषी उभे अनु ।
४ ६ २ १७०३c येभिर्नृम्णा च देव्या च पुनत आदिद्राजानं मनना अगृभ्णत ॥ १४२५

४ ६ २ १८०१a अभि वायुं वीत्यर्षा गृणानोऽ३भि मित्रावरुणा पूयमानः ।
४ ६ २ १८०१c अभी नरं धीजवनँ रथेष्ठामभीन्द्रं वृषणं वज्रबाहुम् ॥ १४२६
४ ६ २ १८०२a अभि वस्त्रा सुवसनान्यर्षाभि धेनूः सुदुघाः पूयमानः ।
४ ६ २ १८०२c अभि चन्द्रा भर्त्तवे नो हिरण्याभ्यश्वान्रथिनो देव सोम ॥ १४२७
४ ६ २ १८०३a अभी नो अर्ष दिव्या वसून्यभि विश्वा पार्थिवा पूयमानः ।
४ ६ २ १८०३c अभि येन द्रविणमश्नवामाभ्यार्षेयं जमदग्निवन्नः ॥ १४२८

४ ६ २ १९०१a यज्ञायथा अपूर्व्य मघवन्वृत्रहत्याय ।
४ ६ २ १९०१c तत्पृथिवीमप्रथयस्तदस्तभ्ना उतो दिवम् ॥ १४२९
४ ६ २ १९०२a तत्ते यज्ञो अजायत तदर्क उत हस्कृतिः ।
४ ६ २ १९०२c तद्विश्वमभिभूरसि यज्ञातं यच्च जन्त्वम् ॥ १४३०
४ ६ २ १९०३a आमासु पक्वमैरय आ सूर्यँ रोहयो दिवि ।
४ ६ २ १९०३c घर्मं न सामं तपता सुवृक्तिभिर्जुष्टं गिर्वणसे बृहत् ॥ १४३१

४ ६ २ २००१a मत्स्यपायि ते महः पात्रस्येव हरिवो मत्सरो मदः ।
४ ६ २ २००१c वृषा ते वृष्ण इन्दुर्वाजी सहस्रसातमः ॥ १४३२
४ ६ २ २००२a आ नस्ते गन्तु मत्सरो वृषा मदो वरेण्यः ।
४ ६ २ २००२c सहावाँ इन्द्र सानसिः पृतनषाडमर्त्यः ॥ १४३३
४ ६ २ २००३a त्वँ हि शूरः सनिता चोदयो मनुषो रथम् ।
४ ६ २ २००३c सहावान्दस्युमव्रतमोषः पात्रं न शोचिषा ॥ १४३४

षष्ठ प्रपाठकः । तृतीयोऽर्धः
४ ६ ३ ०१०१a पवस्व वृष्टिमा सु नोऽपामूर्मिं दिवस्परि ।
४ ६ ३ ०१०१c अयक्ष्मा बृहतीरिषः ॥ १४३५
४ ६ ३ ०१०२a तया पवस्व धारया यया गाव इहागमन् ।
४ ६ ३ ०१०२c जन्यास उप नो गृहम् ॥ १४३६
४ ६ ३ ०१०३a घृतं पवस्व धारया यज्ञेषु देववीतमः ।
४ ६ ३ ०१०३c अस्मभ्यं वृष्टिमा पव ॥ १४३७
४ ६ ३ ०१०४a स न ऊर्जे व्या३व्ययं पवित्रं धाव धारया ।
४ ६ ३ ०१०४c देवासः शृणवन्हि कम् ॥ १४३८

४ ६ ३ ०१०५a पवमानो असिष्यदद्रक्षाँस्यपजङ्घनत् ।
४ ६ ३ ०१०५c प्रब्रवद्रोचयन्नुचः ॥ १४३९

४ ६ ३ ०२०१a प्रत्यस्मै पिपीषते विश्वानि विदुषे भर ।
४ ६ ३ ०२०१c अरङ्गमाय जग्मयेऽपश्चादध्वने नरः ॥ १४४०
४ ६ ३ ०२०२a एमेनं प्रत्येतन सोमेभिः सोमपातमम् ।
४ ६ ३ ०२०२c अमत्रेभिर्ऋजीषिणमिन्द्रँ सुतेभिरिन्दुभिः ॥ १४४१
४ ६ ३ ०२०३a यदी सुतेभिरिन्दुभिः सोमेभिः प्रतिभूषथ ।
४ ६ ३ ०२०३c वेदा विश्वस्य मेधिरो धृषत्तन्तमिदेषते ॥ १४४२
४ ६ ३ ०२०४a अस्मास्मा इदन्धसोऽध्वर्यो प्र भरा सुतम् ।
४ ६ ३ ०२०४c कुवित्समस्य जेन्यस्य शर्धतोऽभिशस्तेरवस्वरत् ॥ १४४३

४ ६ ३ ०३०१a बभ्रवे नु स्वतवसेऽरुणाय दिविस्पृशे ।
४ ६ ३ ०३०१c सोमाय गाथमर्चत ॥ १४४४
४ ६ ३ ०३०२a हस्तच्युतेभिरद्रिभिः सुतँ सोमं पुनीतन ।
४ ६ ३ ०३०२c मधावा धावता मधु ॥ १४४५
४ ६ ३ ०३०३a नमसेदुप सीदत दध्नेदभि श्रीणीतन ।
४ ६ ३ ०३०३c इन्दुमिन्द्रे दधातन ॥ १४४६
४ ६ ३ ०३०४a अमित्रहा विचर्षणिः पवस्व सोम शं गवे ।
४ ६ ३ ०३०४c देवेभ्यो अनुकामकृत् ॥ १४४७
४ ६ ३ ०३०५a इन्द्राय सोम पातवे मदाय परि षिच्यसे ।
४ ६ ३ ०३०५c मनश्चिन्मनसस्पतिः ॥ १४४८
४ ६ ३ ०३०६a पवमान सुवीर्यँ रयिँ सोम रिरीहि नः ।
४ ६ ३ ०३०६c इन्दविन्द्रेण नो युजा ॥ १४४९

४ ६ ३ ०४०१a उद्धेदभि श्रुतामघं वृषमं नर्यापसम् ।
४ ६ ३ ०४०१c अस्तारमेषि सूर्य ॥ १४५०
४ ६ ३ ०४०२a नव यो नवतिं पुरो बिभेद बाह्वोजसा ।
४ ६ ३ ०४०२c अहिं च वृत्रहावधीत् ॥ १४५१
४ ६ ३ ०४०३a स न इन्द्रः शिवः सखाश्वावद्गोमद्यवमत् ।
४ ६ ३ ०४०३c उरुधारेव दोहते ॥ १४५२

४ ६ ३ ०५०१a विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम् ।

४ ६ ३ ०५०१c वातजूतो यो अभिरक्षति त्मना प्रजाः पिपर्ति बहुधा वि राजति ॥ १४५३

४ ६ ३ ०५०२a विभ्राड् बृहत्सुभृतं वाजसातमं धर्मं दिवो धरुणे सत्यमर्पितम् ।

४ ६ ३ ०५०२c अमित्रहा वृत्रहा दस्युहन्तमं ज्योतिर्जज्ञे असुरहा सपत्नहा ॥ १४५४

४ ६ ३ ०५०३a इदँ श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं विश्वजिद्धनजिदुच्यते बृहत् ।

४ ६ ३ ०५०३c विश्वभ्राड् भ्राजो महि सूर्यो दृश उरु पप्रथे सह ओजो अच्युतम् ॥ १४५५

४ ६ ३ ०६०१a इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।

४ ६ ३ ०६०१c शिक्षा णो अस्मिन्पुरुहूत यामनि जीव ज्योतिरशीमहि ॥ १४५६

४ ६ ३ ०६०२a मा नो अज्ञाता वृजना दुराध्यो३ माशिवासोऽव क्रमुः ।

४ ६ ३ ०६०२c त्वया वयं प्रवतः शश्वतीरपोऽति शूर तरामसि ॥ १४५७

४ ६ ३ ०७०१a अद्याद्या श्वःश्व इन्द्र त्रास्व परे च नः ।

४ ६ ३ ०७०१c विश्वा च नो जरितॄन्त्सत्पते अहा दिवा नक्तं च रक्षिषः ॥ १४५८

४ ६ ३ ०७०२a प्रभङ्गी शूरो मघवा तुवीमघः सम्मिश्लो विर्याय कम् ।

४ ६ ३ ०७०२c उभा ते बाहू वृषणा शतक्रतो नि या वज्रं मिमिक्षतुः ॥ १४५९

४ ६ ३ ०८०१a जनीयन्तो न्वग्रवः पुत्रीयन्तः सुदानवः ।

४ ६ ३ ०८०१c सरस्वन्तँ हवामहे ॥ १४६०

४ ६ ३ ०९०१a उत नः प्रिया प्रियासु सप्तस्वसा सुजुष्टा ।

४ ६ ३ ०९०१c सरस्वती स्तोम्या भूत् ॥ १४६१

४ ६ ३ १००१a तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।

४ ६ ३ १००१c धियो यो नः प्रचोदयात् ॥ १४६२

४ ६ ३ १००२a सोमानाँ स्वरणं कृणुहि ब्रह्मणस्पते ।

४ ६ ३ १००२a कक्षीवन्तँ य औशिजः ॥ १४६३

४ ६ ३ १००३a अग्न आयूँषि पवसे आ सुवोर्जं इषं च नः ।

४ ६ ३ १००३a आरे बाधस्व दुच्छुनाम् ॥ १४६४

४ ६ ३ ११०१a ता नः शक्तं पार्थिवस्य महो रायो दिव्यस्य ।

४ ६ ३ ११०१c महि वा क्षत्रं देवेषु ॥ १४६५

४ ६ ३ ११०२a ऋतमृतेन सपन्तेषिरं दक्षमाशाते ।

४ ६ ३ ११०२c अद्रुहा देवौ वर्धेते ॥ १४६६

४ ६ ३ ११०३a वृष्टिद्यावा रीत्यापेषस्पती दानुमत्याः ।

४ ६ ३ ११०३c बृहन्तं गर्त्तमाशाते ॥ १४६७

४ ६ ३ १२०१a युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः ।
४ ६ ३ १२०१c रोचन्ते रोचना दिवि ॥ १४६८
४ ६ ३ १२०२a युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे ।
४ ६ ३ १२०२c शोणा धृष्णू नृवाहसा ॥ १४६९
४ ६ ३ १२०३a केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे ।
४ ६ ३ १२०३c समुषद्भिरजायथाः ॥ १४७०

४ ६ ३ १३०१a अयँ सोम इन्द्र तुभ्यँ सुन्वे तुभ्यं पवते त्वमस्य पाहि ।
४ ६ ३ १३०१c त्वँ ह यं चकृषे त्वं ववृष इन्दुं मदाय युज्याय सोमम् ॥ १४७१
४ ६ ३ १३०२a स ईँ रथो न भुरिषाडयोजि महः पुरूणि सातये वसूनि ।
४ ६ ३ १३०२c आदीं विश्वा नहुष्याणि जाता स्वर्षाता वन ऊर्ध्वा नवन्त ॥ १४७२
४ ६ ३ १३०३a शुष्मी शर्धो न मारुतं पवस्वानभिशस्ता दिव्या यथा विट् ।
४ ६ ३ १३०३c आपो न मक्षू सुमतिर्भवा नः सहस्राप्साः पृतनाषाग्न यज्ञः ॥ १४७३

४ ६ ३ १४०१a त्वमग्ने यज्ञानाँ होता विश्वेषाँ हितः ।
४ ६ ३ १४०१c देवेभिर्मानुषे जने ॥ १४७४
४ ६ ३ १४०२a स नो मन्द्राभिरध्वरे जिह्वाभिर्यजा महः ।
४ ६ ३ १४०२c आ देवान्वक्षि यक्षि च ॥ १४७५
४ ६ ३ १४०३a वेत्था हि वेधो अध्वनः पथश्च देवाञ्जसा ।
४ ६ ३ १४०३c अग्ने यज्ञेषु सुक्रतो ॥ १४७६

४ ६ ३ १५०१a होता देवो अमर्त्यः पुरस्तादेति मायया ।
४ ६ ३ १५०१c विदथानि प्रचोदयन् ॥ १४७७
४ ६ ३ १५०२a वाजी वाजेषु धीयतेऽध्वरेषु प्र णीयते ।
४ ६ ३ १५०२c विप्रो यज्ञस्य साधनः ॥ १४७८
४ ६ ३ १५०३a धिया चक्रे वरेण्यो भूतानां गर्भमा दधे ।
४ ६ ३ १५०३c दक्षस्य पितरं तना ॥ १४७९

४ ६ ३ १६०१a आ सुते सिञ्चत श्रियँ रोदस्योरभिश्रियम् ।
४ ६ ३ १६०१c रसा दधीत वृषभम् ॥ १४८०
४ ६ ३ १६०२a ते जानत स्वमोक्याइँ सं वत्सासो न मातृभिः ।
४ ६ ३ १६०२c मिथो नसन्त जामिभिः ॥ १४८१
४ ६ ३ १६०३a उप स्रक्वेषु बप्सतः कृण्वते धरुणं दिवि ।

४ ६ ३ १६०३c इन्द्रे अग्ना नमः स्वः ॥ १४८२

४ ६ ३ १७०१a तदिदास भुवनेषु ज्येष्ठं यतो जज्ञा उग्रस्त्वेषनृम्णः ।
४ ६ ३ १७०१c सद्यो जज्ञानो नि रिणाति शत्रूननु यं विश्वे मदन्त्यूमाः ॥ १४८३
४ ६ ३ १७०२a वावृधानः शवसा भूर्योजाः शत्रुर्दासाय भियसं दधाति ।
४ ६ ३ १७०२c अव्यनच्च व्यनच्च सस्नि सं ते नवन्त प्रभृता मदेषु ॥ १४८४
४ ६ ३ १७०३a त्वे क्रतुमपि वृञ्जन्ति विश्वे द्विर्यदेते त्रिर्भवन्त्यूमाः ।
४ ६ ३ १७०३c स्वादोः स्वादीयः स्वादुना सृजा समदः सु मधु मधुनाभि योधीः ॥ १४८५

४ ६ ३ १८०१a त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृम्पत्सोममपिबद्विष्णुना सुतं यथावशम् ।
४ ६ ३ १८०१c स ईं ममाद महि कर्म कर्तवे महामुरुं सैनँ सश्चद्देवो देवँ सत्य इन्दुः सत्यमिन्द्रम् ॥ १४८६
४ ६ ३ १८०२a साकं जातः क्रतुना साकमोजसा ववक्षिथ साकं वृद्धो वीर्यैः सासहिर्मृधो विचर्षणिः ।
४ ६ ३ १८०२c दाता राध स्तुवते काम्यं वसु प्रचेतन सैनँ सश्चद्देवो देवँ सत्य इन्दुः सत्यमिन्द्रम् ॥ १४८७
४ ६ ३ १८०३a अध त्विषीमाँ अभ्योजसा कृविं युधाभवदा रोदसी अपृणदस्य मज्मना प्र वावृधे ।
४ ६ ३ १८०३c अधत्तान्यं जठरे प्रेमरिच्यत प्र चेतय सैनँ सश्चद्देवो देवँ सत्य इन्दुः सत्यमिन्द्रम् ॥ १४८८

सप्तम प्रपाठकः । प्रथमोऽर्धः
४ ७ १ ०१०१a अभि प्र गोपतिं गिरेन्द्रमर्च यथा विदे ।
४ ७ १ ०१०१c मूनुँ सत्यस्य सत्पतिम् ॥ १४८९
४ ७ १ ०१०२a आ हरयः ससृज्रिरेऽरुषीरधि बर्हिषि ।
४ ७ १ ०१०२c यत्राभि संनवामहे ॥ १४९०
४ ७ १ ०१०३a इन्द्राय गाव आशिरं दुदुह्रे वज्रिणे मधु ।
४ ७ १ ०१०३c यत्सीमुपह्वरे विदत् ॥ १४९१

४ ७ १ ०२०१a आ नो विश्वासु हव्यमिन्द्रँ समत्सु भूषत ।
४ ७ १ ०२०१c उप ब्रह्माणि सवनानि वृत्रहन्परमज्या ऋचीषम ॥ १४९२
४ ७ १ ०२०२a त्वं दाता प्रथमो राधसामस्यसि सत्य ईशानकृत् ।

४ ७ १ ०२०२c तुविद्युम्नस्य युज्या वृणीमहे पुत्रस्य शवसो महः ॥ १४९३

४ ७ १ ०३०१a प्रत्नं पीयूषं पूर्व्यं यदुक्थ्यं महो गाहद्दिव आ निरधुक्षत ।
४ ७ १ ०३०१c इन्द्रमभि जायमानँ समस्वरन् ॥ १४९४
४ ७ १ ०३०२a आदीं के चित्पश्यमानास आप्यं वसुरुचो दिव्या अभ्यनूषत ।
४ ७ १ ०३०२c दिवो न वारँ सविता व्यूर्णुते ॥ १४९५
४ ७ १ ०३०३a अध यदिमे पवमान रोदसी इमा च विश्वा भुवनाभि मज्मना ।
४ ७ १ ०३०३c यूथे न निष्ठा वृषभो वि राजसि ॥ १४९६

४ ७ १ ०४०१a इममू षु त्वमस्माकँ सनिं गायत्रं नव्याँसम् ।
४ ७ १ ०४०१c अग्ने देवेषु प्र वोचः ॥ १४९७
४ ७ १ ०४०२a विभक्तासि चित्रभानो सिन्धोरूर्मा उपाक आ ।
४ ७ १ ०४०२c सद्यो दाशुषे क्षरसि ॥ १४९८
४ ७ १ ०४०३a आ नो भज परमेष्वा वाजेषु मध्यमेषु ।
४ ७ १ ०४०३c शिक्षा वस्वो अन्तमस्य ॥ १४९९

४ ७ १ ०५०१a अहमिद्धि पितुष्परि मेधामृतस्य जग्रह ।
४ ७ १ ०५०१c अहँ सूर्य इवाजनि ॥ १५००
४ ७ १ ०५०२a अहं प्रत्नेन जन्मना गिरः शुम्भामि कण्ववत् ।
४ ७ १ ०५०२c येनेन्द्रः शुष्ममिद्दधे ॥ १५०१
४ ७ १ ०५०३a ये त्वामिन्द्र न तुष्टुवुर्ऋषयो ये च तुष्टुवुः ।
४ ७ १ ०५०३c ममेद्वर्धस्व सुष्टुतः ॥ १५०२

४ ७ १ ०६०१a अग्ने विश्वेभिरग्निभिर्जोषि ब्रह्म सहस्कृत ।
४ ७ १ ०६०१c ये देवत्रा य आयुषु तेभिर्नो महया गिरः ॥ १५०३
४ ७ १ ०६०२a प्र स विश्वेभिरग्निभिरग्निः स यस्य वाजिनः ।
४ ७ १ ०६०२c तनये तोके अस्मदा सम्यङ्वाजैः परीवृतः ॥ १५०४
४ ७ १ ०६०३a त्वं नो अग्ने अग्निभिर्ब्रह्म यज्ञं च वर्धय ।
४ ७ १ ०६०३c त्वं नो देवतातये रायो दानाय चोदय ॥ १५०५

४ ७ १ ०७०१a त्वे सोम प्रथमा वृक्तबर्हिषो महे वाजाय श्रवसे धियन् दधुः ।
४ ७ १ ०७०१c स त्वं नो वीर वीर्याय चोदय ॥ १५०६
४ ७ १ ०७०२a अभ्यभि हि श्रवसा ततर्दिथोत्सं न कं चिज्जनपानमक्षितम् ।
४ ७ १ ०७०२c शर्याभिर्न भरमाणो गभस्त्योः ॥ १५०७
४ ७ १ ०७०३a अजीजनो अमृत मर्त्याय अमृतस्य धर्मन्नमृतस्य चारुणः ।

४ ७ १ ०७०३c सदासरो वाजमच्छा सनिष्यदत् ॥ १५०८

४ ७ १ ०८०१a एन्दुमिन्द्राय सिञ्चत पिबाति सोम्यं मधु ।
४ ७ १ ०८०१c प्र राधाँसि चोदयते महित्वना ॥ १५०९
४ ७ १ ०८०२a उपो हरीणां पतिँ राधः पृञ्चन्तमब्रवम् ।
४ ७ १ ०८०२c नूनँ श्रुधि स्तुवतो अश्व्यस्य ॥ १५१०
४ ७ १ ०८०३a न ह्याङ्३ग पुरा च न जज्ञे वीरतरस्त्वत् ।
४ ७ १ ०८०३c न की राया नैवथा न भन्दना ॥ १५११

४ ७ १ ०९०१a नदं व ओदतीनां नदं योयुवतीनाम् ।
४ ७ १ ०९०१c पतिं वो अघ्न्यानां धेनूनामिषुध्यसि ॥ १५१२

४ ७ १ १००१a देवो वो द्रविणोदाः पूर्णां विवष्ट्वासिचम् ।
४ ७ १ १००१c उद्वा सिञ्चध्वमुप वा पृणध्वमादिद्वो देव ओहते ॥ १५१३
४ ७ १ १००२a तँ होतारमध्वरस्य प्रचेतसं वह्निं देवा अकृण्वत ।
४ ७ १ १००२c दधाति रत्नं विधते सुवीर्यमग्निर्जनाय दाशुषे ॥ १५१४

४ ७ १ ११०१a अदर्शि गातुवित्तमो यस्मिन्व्रतान्यादधुः ।
४ ७ १ ११०१c उपोषु जातमार्यस्य वर्धनमग्निं नक्षन्तु नो गिरः ॥ १५१५
४ ७ १ ११०२a यस्माद्रेजन्त कृष्टयश्चर्कृत्यानि कृण्वतः ।
४ ७ १ ११०२c सहस्रसां मेधसाताविव त्मनाग्निं धीभिर्नमस्यत ॥ १५१६
४ ७ १ ११०३a प्र दैवोदासो अग्निर्देव इन्द्रो न मज्मना ।
४ ७ १ ११०३c अनु मातरं पृथिवीं वि वावृते तस्थौ नाकस्य शर्मणि ॥ १५१७

४ ७ १ १२०१a अग्न आयूँषि पवसे आसुवोर्जमिषं च नः ।
४ ७ १ १२०१c आरे बाधस्व दुच्छुनाम् ॥ १५१८
४ ७ १ १२०२a अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः ।
४ ७ १ १२०२c तमीमहे महागयम् ॥ १५१९
४ ७ १ १२०३a अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् ।
४ ७ १ १२०३c दधद्रयिं मयि योषम् ॥ १५२०

४ ७ १ १३०१a अग्ने पावक रोचिषा मन्द्रया देव जिह्वया ।
४ ७ १ १३०१c आ देवान्वक्षि यक्षि च ॥ १५२१
४ ७ १ १३०२a तं त्वा घृतस्नवीमहे चित्रभानो स्वर्दृशम् ।
४ ७ १ १३०२c देवाँ आ वीतये वह ॥ १५२२
४ ७ १ १३०३a वीतिहोत्रं त्वा कवे द्युमन्तँ समिधीमहि ।

४ ७ १ १३०३c अग्ने बृहन्तमध्वरे ॥ १५२३

४ ७ १ १४०१a अवा नो अग्न ऊतिभिर्गायत्रस्य प्रभर्मणि ।
४ ७ १ १४०१c विश्वासु धीषु वन्द्य ॥ १५२४
४ ७ १ १४०२a आ नो अग्ने रयिं भर सत्रासाहं वरेण्यम् ।
४ ७ १ १४०२c विश्वासु पृत्सु दुष्टरम् ॥ १५२५
४ ७ १ १४०३a आ नो अग्ने सुचेतुना रयिं विश्वायुपोषसम् ।
४ ७ १ १४०३c मार्डीकं धेहि जीवसे ॥ १५२६

४ ७ १ १५०१a अग्निँ हिन्वन्तु नो धियः सप्तिमाशुमिवाजिषु ।
४ ७ १ १५०१c तेन जेष्म धनन्धनम् ॥ १५२७
४ ७ १ १५०२a यया गा आकरामहै सेनयाग्ने तवोत्या ।
४ ७ १ १५०२c तां नो हिन्व मघत्तये ॥ १५२८
४ ७ १ १५०३a आग्ने स्थूरँ रयिं भर पृथुं गोमन्तमश्विनम् ।
४ ७ १ १५०३c अङ्धि खं वर्त्तया पविम् ॥ १५२९
४ ७ १ १५०४a अग्ने नक्षत्रमजरमा सूर्यँ रोहयो दिवि ।
४ ७ १ १५०४c दधज्ज्योतिर्जनेभ्यः ॥ १५३०
४ ७ १ १५०५a अग्ने केतुर्विशामसि प्रेष्ठः श्रेष्ठ उपस्थसत् ।
४ ७ १ १५०५c बोधा स्तोत्रे वयो दधत् ॥ १५३१

४ ७ १ १६०१a अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् ।
४ ७ १ १६०१c अपाँ रेताँसि जिन्वति ॥ १५३२
४ ७ १ १६०२a ईशिषे वार्यस्य हि दात्रस्याग्ने स्वःपतिः ।
४ ७ १ १६०२c स्तोता स्यां तव शर्मणि ॥ १५३३
४ ७ १ १६०३a उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते ।
४ ७ १ १६०३c तव ज्योतींष्यर्चयः ॥ १५३४

सप्तम प्रपाठकः । द्वितीयोऽर्धः
४ ७ २ ०१०१a कस्ते जामिर्जनानामग्ने को दाश्वध्वरः ।
४ ७ २ ०१०१c को ह कस्मिन्नसि श्रितः ॥ १५३५
४ ७ २ ०१०२a त्वं जामिर्जनानामग्ने मित्रो असि प्रियः ।
४ ७ २ ०१०२c सखा सखिभ्य ईड्यः ॥ १५३६
४ ७ २ ०१०३a यजा नो मित्रावरुणा यजा देवाँ ऋतं बृहत् ।
४ ७ २ ०१०३c अग्ने यक्षि स्वं दमम् ॥ १५३७

४ ७ २ ०२०१a ईडेन्यो नमस्यस्तिरस्तमाँसि दर्शतः ।
४ ७ २ ०२०१c समग्निरिध्यते वृषा ॥ १५३८
४ ७ २ ०२०२a वृषो अग्निः समिध्यतेऽश्वो न देववाहनः ।
४ ७ २ ०२०२c तँ हविष्मन्त ईडते ॥ १५३९
४ ७ २ ०२०३a वृषणं त्वा वयं वृषन्वृषणः समिधीमहि ।
४ ७ २ ०२०३c अग्ने दीद्यतं बृहत् ॥ १५४०

४ ७ २ ०३०१a उत्ते बृहन्तो अर्चयः समिधानस्य दीदिवः ।
४ ७ २ ०३०१c अग्ने शुक्रास ईरते ॥ १५४१
४ ७ २ ०३०२a उप त्वा जुह्वो३ मम घृताचीर्यन्तु हर्यत ।
४ ७ २ ०३०२c अग्ने हव्या जुषस्व नः ॥ १५४२
४ ७ २ ०३०३a मन्द्रँ होतारमृत्विजं चित्रभानुं विभावसुम् ।
४ ७ २ ०३०३c अग्निमीडे स उ श्रवत् ॥ १५४३

४ ७ २ ०४०१a पाहि नो अग्न एकया पाह्यू३त द्वितीयया ।
४ ७ २ ०४०१c पाहि गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो ॥ १५४४
४ ७ २ ०४०२a पाहि विश्वस्माद्रक्षसो अराव्णः प्र स्म वाजेषु नोऽव ।
४ ७ २ ०४०२c त्वामिद्धि नेदिष्ठं देवतातय आपिं नक्षामहे वृधे ॥ १५४५

४ ७ २ ०५०१a इनो राजन्नरतिः समिद्धो रौद्रो दक्षाय सुषुमाँ अदर्शि ।
४ ७ २ ०५०१c चिकिद्वि भाति भासा बृहतासिक्नीमेति रुशतीमपाजन् ॥ १५४६
४ ७ २ ०५०२a कृष्णां यदेनीमभि वर्पसाभूज्जनयन्योषां बृहतः पितुर्जाम् ।
४ ७ २ ०५०२c ऊर्ध्वं भानुँ सूर्यस्य स्तभायन्दिवो वसुभिररतिर्वि भाति ॥ १५४७
४ ७ २ ०५०३a भद्रो भद्रया सचमान आगात्स्वसारं जारो अभ्येति पश्चात् ।
४ ७ २ ०५०३c सुप्रकेतैर्द्युभिरग्निर्वितिष्ठन्रुशद्भिर्वर्णैरभि राममस्थात् ॥ १५४८

४ ७ २ ०६०१a कया ते अग्ने अङ्गिर ऊर्जो नपादुपस्तुतिम् ।
४ ७ २ ०६०१c वराय देव मन्यवे ॥ १५४९
४ ७ २ ०६०२a दाशेम कस्य मनसा यज्ञस्य सहसो यहो ।
४ ७ २ ०६०२c कदु वोच इदं नमः ॥ १५५०
४ ७ २ ०६०३a अधा त्वँ हि नस्करो विश्वा अस्मभ्यँ सुक्षितीः ।
४ ७ २ ०६०३c वाजद्रविणसो गिरः ॥ १५५१

४ ७ २ ०७०१a अग्न आ याह्यग्निभिर्होतारं त्वा वृणीमहे ।
४ ७ २ ०७०१c आ त्वामनक्तु प्रयता हविष्मती यजिष्ठं बर्हिरासदे ॥ १५५२

४ ७ २ ०७०२a अच्छा हि त्वा सहसः सूनो अङ्गिरः स्रुचश्चरन्त्यध्वरे ।
४ ७ २ ०७०२c ऊर्जो नपातं घृतकेशमीमहेऽग्निं यज्ञेषु पूर्व्यम् ॥ १५५३

४ ७ २ ०८०१a अच्छा नः शीरशोचिषं गिरो यन्तु दर्शतम् ।
४ ७ २ ०८०१c अच्छा यज्ञासो नमसा पुरूवसुं पुरुप्रशस्तमूतये ॥ १५५४
४ ७ २ ०८०२a अग्निँ सूनुँ सहसो जातवेदसं दानाय वार्याणाम् ।
४ ७ २ ०८०२c द्विता यो भूदमृतो मर्त्येष्वा होता मन्द्रतमो विशि ॥ १५५५

४ ७ २ ०९०१a अदाभ्यः पुरएता विशामग्निर्मानुषीणाम् ।
४ ७ २ ०९०१c तूर्णी रथः सदा नवः ॥ १५५६
४ ७ २ ०९०२a अभि प्रयाँसि वाहसा दाश्वाँ अश्नोति मर्त्यः ।
४ ७ २ ०९०२c क्षयं पावकशोचिषः ॥ १५५७
४ ७ २ ०९०३a साह्वान्विश्वा अभियुजः क्रतुर्देवानाममृक्तः ।
४ ७ २ ०९०३c अग्निस्तुविश्रवस्तमः ॥ १५५८

४ ७ २ १००१a भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः ।
४ ७ २ १००१c भद्रा उत प्रशस्तयः ॥ १५५९
४ ७ २ १००२a भद्रं मनः कृणुष्व वृत्रतूर्ये येना समत्सु सासहिः ।
४ ७ २ १००२c अव स्थिरा तनुहि भूरि शर्धतां वनेमा ते अभिष्टये ॥ १५६०

४ ७ २ ११०१a अग्ने वाजस्य गोमत ईशानः सहसो यहो ।
४ ७ २ ११०१c अस्मे देहि जातवेदो महि श्रवः ॥ १५६१
४ ७ २ ११०२a स इधानो वसुष्कविरग्निरीडेन्यो गिरा ।
४ ७ २ ११०२c रेवदस्मभ्यं पुर्वणीक दीदिहि ॥ १५६२
४ ७ २ ११०३a क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः ।
४ ७ २ ११०३c स तिग्मजम्भ रक्षसो दह प्रति ॥ १५६३

४ ७ २ १२०१a विशोविशो वो अतिथिं वाजयन्तः पुरुप्रियम् ।
४ ७ २ १२०१c अग्निं वो दुर्यं वच स्तुषे शूषस्य मन्मभिः ॥ १५६४
४ ७ २ १२०२a यं जनासो हविष्मन्तो मित्रं न सर्पिरासुतिम् ।
४ ७ २ १२०२c प्रशँसन्ति प्रशस्तिभिः ॥ १५६५
४ ७ २ १२०३a पन्याँसं जातवेदसं यो देवतात्युद्यता ।
४ ७ २ १२०३c हव्यान्यैरयद्दिवि ॥ १५६६

४ ७ २ १३०१a समिद्धमग्निँ समिधा गिरा गृणे शुचिं पावकं पुरो अध्वरे ध्रुवम् ।
४ ७ २ १३०१c विप्रँ होतारं पुरुवारमद्रुहं कविँ सुम्नैरीमहे जातवेदसम् ॥ १५६७

४ ७ २ १३०२a त्वां दूतमग्ने अमृतं युगेयुगे हव्यवाहं दधिरे पायुमीड्यम्।
४ ७ २ १३०२c देवासश्च मर्त्तासश्च जागृविं विभुं विश्पतिं नमसा नि षेदिरे ॥ १५६८

४ ७ २ १३०३a विभूषन्नग्न उभयाँ अनु व्रता दूतो देवानाँ रजसी समीयसे ।
४ ७ २ १३०३c यत्ते धीतिँ सुमतिमावृणीमहेऽध स्मा नस्त्रिवरूथः शिवो भव ॥ १५६९

४ ७ २ १४०१a उप त्वा जामयो गिरो देदिशतीर्हविष्कृतः ।
४ ७ २ १४०१c वायोरनीके अस्थिरन् ॥ १५७०
४ ७ २ १४०२a यस्य त्रिधात्ववृतं बर्हिस्तस्थावसन्दिनम् ।
४ ७ २ १४०२c आपश्चिन्नि दधा पदम् ॥ १५७१
४ ७ २ १४०३a पदं देवस्य मीढुषोऽनाधृष्टाभिरूतिभिः ।
४ ७ २ १४०३c भद्रा सूर्य इवोपदृक् ॥ १५७२

सप्तम प्रपाठकः । तृतीयोऽर्धः
४ ७ ३ ०१०१a अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः ।
४ ७ ३ ०१०१c समीचीनास ऋभवः समस्वरन्रुद्रा गृणन्त पूर्व्यम् ॥ १५७३
४ ७ ३ ०१०२a अस्येदिन्द्रो वावृधे वृष्ण्यँ शवो मदे सुतस्य विष्णवि ।
४ ७ ३ ०१०२c अद्या तमस्य महिमानमायवोऽनु ष्टुवन्ति पूर्वथा ॥ १५७४

४ ७ ३ ०२०१a प्र वामर्चन्त्युक्थिनो नीथाविदो जरितारः ।
४ ७ ३ ०२०१c इन्द्राग्नी इष आ वृणे ॥ १५७५
४ ७ ३ ०२०२a इन्द्राग्नी नवतिं पुरो दासपत्नीरधूनुतम् ।
४ ७ ३ ०२०२c साकमेकेन कर्मणा ॥ १५७६
४ ७ ३ ०२०३a इन्द्राग्नी अपसस्पर्युप प्र यन्ति धीतयः ।
४ ७ ३ ०२०३c ऋतस्य पथ्याऽऽ३ अनु ॥ १५७७
४ ७ ३ ०२०४a इन्द्राग्नी तविषाणी वाँ सधस्थानि प्रयाँसि च ।
४ ७ ३ ०२०४c युवोरसूर्यं हितम् ॥ १५७८

४ ७ ३ ०३०१a शग्ध्यू३ षु शचीपत इन्द्र विश्वाभिरूतिभिः ।
४ ७ ३ ०३०१c भगं न हि त्वा यशसं वसुविदमनु शूर चरामसि ॥ १५७९
४ ७ ३ ०३०२a पौरो अश्वस्य पुरुकृद्गवामस्युत्सो देव हिरण्ययः ।
४ ७ ३ ०३०२c न किर्हि दानं परि मर्धिषत्वे यद्यद्यामि तदा भर ॥ १५८०

४ ७ ३ ०४०१a त्वँ ह्येहि चेरवे विदा भगं वसुत्तये ।

४ ७ ३ ०४०१c उद्वावृषस्व मधवन्गविष्टय उदिन्द्राश्वमिष्टये ॥ १५८१
४ ७ ३ ०४०२a त्वं पुरू सहस्राणि शतानि च यूथा दानाय मँहसे ।
४ ७ ३ ०४०२c आ पुरन्दरं चकृम विप्रवचस इन्द्रं गायन्तोऽवसे ॥ १५८२

४ ७ ३ ०५०१a यो विश्वा दयते वसु होता मन्द्रो जनानाम् ।
४ ७ ३ ०५०१c मधोर्न पात्रा प्रथमान्यस्मै प्र स्तोमा यन्त्वग्नये ॥ १५८३
४ ७ ३ ०५०२a अश्व न गीर्भी रथ्यँ सुदानवो मर्मृज्यन्ते देवयवः ।
४ ७ ३ ०५०२c उभे तोके तनये दस्म विस्पते पर्षि राधो मघोनाम् ॥ १५८४

४ ७ ३ ०६०१a इमं मे वरुण श्रुधी हवमद्या च मृडय ।
४ ७ ३ ०६०१c त्वामवस्युरा चके ॥ १५८५

४ ७ ३ ०७०१a कया त्वं न ऊत्याभि प्र मन्दसे वृषन् ।
४ ७ ३ ०७०१c कया स्तोतृभ्य आ भर ॥ १५८६

४ ७ ३ ०८०१a इन्द्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे ।
४ ७ ३ ०८०१c इन्द्रँ समीके वनिनो हवामह इन्द्रं धनस्य सातये ॥ १५८७
४ ७ ३ ०८०२a इन्द्रो मह्ना रोदसी पप्रथच्छव इन्द्रः सूर्यमरोचयत् ।
४ ७ ३ ०८०२c इन्द्रे ह विश्वा भुवनानि येमिर इन्द्रे सुवानास इन्दवः ॥ १५८८

४ ७ ३ ०९०१a विश्वकर्मन्हविषा वावृधानः स्वयं यजस्व तन्वाँ स्वा हि ते ।
४ ७ ३ ०९०१c मुह्यन्त्वन्ये अभितो जनास इहास्माकं मघवा सूरिरस्तु ॥ १५८९

४ ७ ३ १००१a अया रुचा हरिण्या पुनानो विश्वा द्वेषाँसि तरति सयुग्वभिः सूरो न सयुग्वभिः ।
४ ७ ३ १००१c धारा पृष्ठस्य रोचते पुनानो अरुषो हरिः ।
४ ७ ३ १००१e विश्वा यद्रूपा परियास्यृक्वभिः सप्तास्येभिर्ऋक्वभिः ॥ १५९०
४ ७ ३ १००२a प्राचीमनु प्रदिशं पाति चेकितत्सँ रश्मिभिर्यतते दर्शतो रथो दैव्यो दर्शतो रथः ।
४ ७ ३ १००२c अग्मन्नुक्थानि पौँस्येन्द्रं जैत्राय हर्षयत ।
४ ७ ३ १००२e वज्रश्च यद्भवथो अनपच्युता समत्स्वनपच्युता ॥ १५९१
४ ७ ३ १००३a त्वं ह त्यत्पणीनां विदो वसु सं मातृभिर्मर्जयसि स्व आ दम ऋतस्य धीतिभिर्दमे ।
४ ७ ३ १००३c परावतो न साम तद्यत्रा रणन्ति धीतयः ।
४ ७ ३ १००३e त्रिधातुभिररुषीभिर्वयो दधे रोचमानो वयो दधे ॥ १५९२

४ ७ ३ ११०१a उत नो गोषणिं धियमश्वसां वाजसामुत ।
४ ७ ३ ११०१c नृवत्कृणुह्यूतये ॥ १५९३

४ ७ ३ १२०१a शशमानस्य वा नरः स्वेदस्य सत्यशवसः ।
४ ७ ३ १२०१c विदा कामस्य वेनतः ॥ १५९४

४ ७ ३ १३०१a उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये ।
४ ७ ३ १३०१c सुमृडीका भवन्तु नः ॥ १५९५

४ ७ ३ १४०१a प्र वां महि द्यवी अभ्युपस्तुतिं भरामहे ।
४ ७ ३ १४०१c शुची उप प्रशस्तये ॥ १५९६
४ ७ ३ १४०२a पुनाने तन्वा मिथः स्वेन दक्षेण राजथः ।
४ ७ ३ १४०२c ऊह्याथे सनादृतम् ॥ १५९७
४ ७ ३ १४०३a मही मित्रस्य साधथस्तरन्ती पिप्रती ऋतम् ।
४ ७ ३ १४०३c परि यज्ञं नि षेदथुः ॥ १५९८

४ ७ ३ १५०१a अयमु ते समतसि कपोत इव गर्भधिम् ।
४ ७ ३ १५०१c वचस्तच्चिन्न ओहसे ॥ १५९९
४ ७ ३ १५०२a स्तोत्रँ राधानां पते गिर्वाहो वीर यस्य ते ।
४ ७ ३ १५०२c विभूतिरस्तु सूनृता ॥ १६००
४ ७ ३ १५०३a ऊर्ध्वस्तिष्ठा न ऊतयेऽस्मिन्वाजे शतक्रतो ।
४ ७ ३ १५०३c समन्येषु ब्रवावहै ॥ १६०१

४ ७ ३ १६०१a गाव उप वदावटे महि यज्ञस्य रप्सुदा ।
४ ७ ३ १६०१c उभा कर्णा हिरण्यया ॥ १६०२
४ ७ ३ १६०२a अभ्यारमिदद्रयो निषिक्तं पुष्करे मधु ।
४ ७ ३ १६०२c अवटस्य विसर्जने ॥ १६०३
४ ७ ३ १६०३a सिञ्चन्ति नमसावटमुच्चाचक्रं परिज्मानम् ।
४ ७ ३ १६०३c नीचीनबारमक्षितम् ॥ १६०४

४ ७ ३ १७०१a मा भेम मा श्रमिष्मोग्रस्य सख्ये तव ।
४ ७ ३ १७०१c महत्ते वृष्णो अभिचक्ष्यं कृतं पश्येम तुर्वशं यदुम् ॥ १६०५
४ ७ ३ १७०२a सव्यामनु स्फिग्यं वावसे वृष्ना न दानो अस्य रोषति ।
४ ७ ३ १७०२c मध्वा सम्पृक्ताः सारघेण धेनवस्तूयमेहि द्रवा पिब ॥ १६०६

४ ७ ३ १८०१a इमा उ त्वा पुरूवसो गिरो वर्धन्तु या मम ।

४ ७ ३ १८०१c पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत ॥ १६०७
४ ७ ३ १८०२a अयँ सहस्रमृषिभिः सहस्कृतः समुद्र इव पप्रथे ।
४ ७ ३ १८०२c सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये ॥ १६०८

४ ७ ३ १९०१a यस्यायं विश्व आर्यो दासः शेवधिपा अरिः ।
४ ७ ३ १९०१c तिरश्चिदर्ये रुशमे पवीरवि तुभ्येत्सो अज्यते रयिः ॥ १६०९
४ ७ ३ १९०२a तुरण्यवो मधुमन्तं घृतश्चतं विप्रासो अर्कमानृचुः ।
४ ७ ३ १९०२c अस्मे रयिः पप्रथे वृष्ण्यं शवोऽस्मे स्वानास इन्दवः ॥ १६१०

४ ७ ३ २००१a गोमन्न इन्दो अश्ववत्सुतः सुदक्ष धनिव ।
४ ७ ३ २००१c शुचिं च वर्णमधि गोषु धार्य ॥ १६११
४ ७ ३ २००२a स नो हरीणां पत इन्दो देवप्सरस्तमः ।
४ ७ ३ २००२c सखेव सख्ये नर्यो रुचे भव ॥ १६१२
४ ७ ३ २००३a सनेमि त्वमस्मदा अदेवं कं चिदत्रिणम् ।
४ ७ ३ २००३c साह्वाँ इन्दो परि बाधो अप द्वयुम् ॥ १६१३

४ ७ ३ २१०१a अञ्जते व्यञ्जते समञ्जते क्रतुँ रिहन्ति मध्वाभ्यञ्जते ।
४ ७ ३ २१०१c सिन्धोरुऽच्छ्वासे पतयन्तमुक्षणँ हिरण्यपावाः पशुमप्सु गृभ्णते ॥ १६१४
४ ७ ३ २१०२a विपश्चिते पवमानाय गायत मही न धारात्यन्धो अर्षति ।
४ ७ ३ २१०२c अहिर्न जूर्णामति सर्पति त्वचमत्यो न क्रीडन्नसरद्वृषा हरिः ॥ १६१५
४ ७ ३ २१०३a अग्रेगो राजाप्यस्तविष्यते विमानो अह्नां भुवनेष्वर्पितः ।
४ ७ ३ २१०३c हरिर्घृतस्नुः सुदृशीको अर्णवो ज्योतीरथः पवते राय ओक्यः ॥ १६१६

आष्टम प्रपाठकः । प्रथमोऽर्धः
४ ८ १ ०१०१a विश्वेभिरग्ने अग्निभिरिमं यज्ञमिदं वचः ।
४ ८ १ ०१०१c चनो घाः सहसा यहो ॥ १६१७
४ ८ १ ०१०२a यच्चिद्धि शश्वा तना देवन्देवं यजामहे ।
४ ८ १ ०१०२c त्वे इद्धूयते हविः ॥ १६१८
४ ८ १ ०१०३a प्रियो नो अस्तु विश्पतिर्होता मन्द्रो वरेण्यः ।
४ ८ १ ०१०३c प्रियाः स्वग्नयो वयम् ॥ १६१९

४ ८ १ ०२०१a इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः ।

४ ८ १ ०२०१c अस्माकमस्तु केवलः ॥ १६२०
४ ८ १ ०२०२a स नो वृषन्नमुं चरुँ सत्रादावन्नपा वृधि ।
४ ८ १ ०२०२c अस्मभ्यमप्रतिष्कुतः ॥ १६२१
४ ८ १ ०२०३a बृषा यूथेव वँसगः कृष्टीरियर्त्योजसा ।
४ ८ १ ०२०३c ईशानो अप्रतिष्कुतः ॥ १६२२

४ ८ १ ०३०१a त्वं नश्चित्र ऊत्या वसो राधाँसि चोदय ।
४ ८ १ ०३०१c अस्य रायस्त्वमग्ने रथीरसि विदा गाधं तुचे तु नः ॥ १६२३
४ ८ १ ०३०२a पर्षि तोकं तनयं पर्तृभिष्ट्वमदब्धैरप्रयुत्वभिः ।
४ ८ १ ०३०२c अग्ने हेडाँसि दैव्या युयोधि नोऽदेवानि हराँसि च ॥ १६२४

४ ८ १ ०४०१a किमित्ते विष्णो परिचक्षि नाम प्र यद्ववक्षे शिपिविष्टो अस्मि ।
४ ८ १ ०४०१c मा वर्पो अस्मदप गूह एतद्यदन्यरूपः समिथे बभूथ ॥ १६२५
४ ८ १ ०४०२a प्र तत्ते अद्य शिपिविष्ट हव्यमर्यः शँसामि वयुनानि विद्वान् ।
४ ८ १ ०४०२c तं त्वा गृणामि तवसमतव्यान्क्षयन्तमस्य रजसः पराके ॥ १६२६
४ ८ १ ०४०३a वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् ।
४ ८ १ ०४०३c वर्धन्तु त्वा सुष्टुतयो गिरि मे यूयं पात स्वस्तभिः सदा नः ॥ १६२७

४ ८ १ ०५०१a वायो शुक्रो अयामि ते मध्वो अग्रं दिविष्टिषु ।
४ ८ १ ०५०१c आ याहि सोमपीतये स्पार्हो देव नियुत्वता ॥ १६२८
४ ८ १ ०५०२a इन्द्रश्च वायवेषाँ सोमानां पीतिमर्हथः ।
४ ८ १ ०५०२c युवाँ हि यन्तीन्दवो निम्नमापो न सध्र्यक् ॥ १६२९
४ ८ १ ०५०३a वायविन्द्रश्च शुष्मिणा सरथँ शवसस्पती ।
४ ८ १ ०५०३c नियुत्वन्ता न ऊतय आ यातँ सोमपीतये ॥ १६३०

४ ८ १ ०६०१a अध क्षपा परिष्कृतो वाजाँ अभि प्र गाहते ।
४ ८ १ ०६०१c यदी विवस्वतो धियो हरिँ हिन्वन्ति यातवे ॥ १६३१
४ ८ १ ०६०२a तमस्य मर्जयामसि मदो य इन्द्रपातमः ।
४ ८ १ ०६०२c यं गाव आसभिर्दधुः पुरा नूनं च सूरयः ॥ १६३२
४ ८ १ ०६०३a तं गाथया पुराण्या पुनानमभ्यनूषत ।
४ ८ १ ०६०३c उतो कृपन्त धीतयो देवानां नाम बिभ्रतीः ॥ १६३३

४ ८ १ ०७०१a अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः ।
४ ८ १ ०७०१c सम्राजन्तमध्वराणाम् ॥ १६३४

४ ८ १ ०७०२a स घा नः सूनुः शवसा पृथुप्रगामा सुशेवः ।
४ ८ १ ०७०२c मीढ्वाँ अस्माकं बभूयात् ॥ १६३५
४ ८ १ ०७०३a स नो दूराच्चासाच्च नि मर्त्यादघायोः ।
४ ८ १ ०७०३c पाहि सदमिद्विश्वायुः ॥ १६३६

४ ८ १ ०८०१a त्वमिन्द्र प्रतूर्तिष्वभि विश्वा असि स्पृधः ।
४ ८ १ ०८०१c अशस्तिहा जनिता वृत्रतूरसि त्वं तूर्य तरुष्यतः ॥ १६३७
४ ८ १ ०८०२a अनु ते शुष्मं तुरयन्तमीयतुः क्षोणी शिशुं न मातरा ।
४ ८ १ ०८०२c विश्वास्ते स्पृधः श्नथयन्त मन्यवे वृत्रं यदिन्द्र तूर्वसि ॥ १६३८

४ ८ १ ०९०१a यज्ञ इन्द्रमवर्धयद्यद्भूमिं व्यवर्तयत् ।
४ ८ १ ०९०१c चक्राण ओपशं दिवि ॥ १६३९
४ ८ १ ०९०२a व्या३न्तरिक्षमतिरन्मदे सोमस्य रोचना ।
४ ८ १ ०९०२c इन्द्रो यदभिनद्वलम् ॥ १६४०
४ ८ १ ०९०३a उदगा आजदङ्गिरोभ्य आविष्कृण्वन्गुहा सतीः ।
४ ८ १ ०९०३c अर्वाञ्चं नुनुदे वलम् ॥ १६४१

४ ८ १ १००१a त्यमु वः सत्रासाहं विश्वासु गीर्ष्वायतम् ।
४ ८ १ १००१c आ च्यावयस्यूतये ॥ १६४२
४ ८ १ १००२a युध्मँ सन्तमनर्वाणँ सोमपामनपच्युतम् ।
४ ८ १ १००२c नरमवार्यक्रतुम् ॥ १६४३
४ ८ १ १००३a शिक्षा ण इन्द्र राय आ पुरु विद्वाँ ऋचीषम ।
४ ८ १ १००३c अवा नः पार्ये धने ॥ १६४४

४ ८ १ ११०१a तव त्यदिन्द्रियं बृहत्तव दक्षममुत क्रतुम् ।
४ ८ १ ११०१c वज्रँ शिशाति धिषणा वरेण्यम् ॥ १६४५
४ ८ १ ११०२a तव द्यौरिन्द्र पौँस्यं पृथिवी वर्धति श्रवः ।
४ ८ १ ११०२c त्वामापः पर्वतासश्च हिन्विरे ॥ १६४६
४ ८ १ ११०३a त्वां विष्णुर्बृहन्क्षयो मित्रो गृणाति वरुणः ।
४ ८ १ ११०३c त्वाँ शर्धो मदत्यनु मारुतम् ॥ १६४७

४ ८ १ १२०१a नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः ।
४ ८ १ १२०१c अमैरमित्रमर्दय ॥ १६४८
४ ८ १ १२०२a कुवित्सु नो गविष्टयेऽग्ने संवेषिषो रयिम् ।
४ ८ १ १२०२c उरुकृदुरु णस्कृधि ॥ १६४९

४ ८ १ १२०३a मा नो अग्ने महाधने परा वर्ग्भारभृद्यथा ।
४ ८ १ १२०३c संवर्गं सँ रयिं जय ॥ १६५०

४ ८ १ १३०१a समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः ।
४ ८ १ १३०१c समुद्रायेव सिन्धवः ॥ १६५१
४ ८ १ १३०२a वि चिद्वृत्रस्य दोधतः शिरो बिभेद वृष्णिना ।
४ ८ १ १३०२c वज्रेण शतपर्वणा ॥ १६५२
४ ८ १ १३०३a ओजस्तदस्य तित्विष उभे यत्समवर्त्तयत् ।
४ ८ १ १३०३c इन्द्रश्चर्मेव रोदसी ॥ १६५३

४ ८ १ १४०१a सुमन्मा वस्वी रन्ती सूनरी ॥ १६५४
४ ८ १ १४०२a सरूप वृषन्ना गहीमौ भद्रौ धुर्यावभि ।
४ ८ १ १४०२c ताविमा उप सर्पतः ॥ १६५५
४ ८ १ १४०३a नीव शीर्षाणि मृढ्वं मध्य आपस्य तिष्ठति ।
४ ८ १ १४०३c शृङ्गेभिर्दशभिर्दिशन् ॥ १६५६

आष्टम प्रपाठकः । द्वितीयोऽर्धः
४ ८ २ ०१०१a पन्यंपन्यमित्सोतार आ धावत मद्याय ।
४ ८ २ ०१०१c सोमं वीराय शूराय ॥ १६५७
४ ८ २ ०१०२a एह हरी ब्रह्मयुजा शग्मा वक्षतः सखायम् ।
४ ८ २ ०१०२c इन्द्रं गीर्भिर्गिर्वणसम् ॥ १६५८
४ ८ २ ०१०३a पाता वृत्रहा सुतमा घा गमन्नारे अस्मत् ।
४ ८ २ ०१०३c नि यमते शतमूतिः ॥ १६५९

४ ८ २ ०२०१a आ त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः ।
४ ८ २ ०२०१c न त्वामिन्द्राति रिच्यते ॥ १६६०
४ ८ २ ०२०२a विव्यक्थ महिना वृषन्भक्षँ सोमस्य जागृवे ।
४ ८ २ ०२०२c य इन्द्र जठरेषु ते ॥ १६६१
४ ८ २ ०२०३a अरं त इन्द्र कुक्षये सोमो भवतु वृत्रहन् ।
४ ८ २ ०२०३c अरं धामभ्य इन्दवः ॥ १६६२

४ ८ २ ०३०१a जराबोध तद्विविड्ढि विशेविशे यज्ञियाय ।
४ ८ २ ०३०१c स्तोमँ रुद्राय दृशीकम् ॥ १६६३
४ ८ २ ०३०२a स नो महाँ अनिमानो धूमकेतुः पुरुश्चन्द्रः ।
४ ८ २ ०३०२c धिये वाजाय हिन्वतु ॥ १६६४

४ ८ २ ०३०३a स रेवाँ इव विश्पतिर्दैव्यः केतुः शृणोतु नः ।
४ ८ २ ०३०३c उक्थैरग्निर्बृहद्भानुः ॥ १६६५

४ ८ २ ०४०१a तद्वो गाय सुते सचा पुरुहूताय सत्वने ।
४ ८ २ ०४०१c शं यद्गवे न शाकिने ॥ १६६६
४ ८ २ ०४०२a न घा वसुर्नि यमते दानं वाजस्य गोमतः ।
४ ८ २ ०४०२c यत्सीमुपश्रवद्गिरः ॥ १६६७
४ ८ २ ०४०३a कुवित्सस्य प्र हि व्रजं गोमन्तं दस्युहा गमत् ।
४ ८ २ ०४०३c शचीभिरप नो वरत् ॥ १६६८

४ ८ २ ०५०१a इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम् ।
४ ८ २ ०५०१c समूढमस्य पाँसुले ॥ १६६९
४ ८ २ ०५०२a त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः ।
४ ८ २ ०५०२c अतो धर्माणि धारयन् ॥ १६७०
४ ८ २ ०५०३a विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे ।
४ ८ २ ०५०३c इन्द्रस्य युज्यः सखा ॥ १६७१
४ ८ २ ०५०४a तद्विष्णोः परमं पदँ सदा पश्यन्ति सूरयः ।
४ ८ २ ०५०४c दिवीव चक्षुराततम् ॥ १६७२
४ ८ २ ०५०५a तद्विप्रासो विपन्युवो जागृवाँसः समिन्धते ।
४ ८ २ ०५०५c विष्णोर्यत्परमं पदम् ॥ १६७३
४ ८ २ ०५०६a अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे ।
४ ८ २ ०५०६c पृथिव्या अधि सानवि ॥ १६७४

४ ८ २ ०६०१a मो षु त्वा वाघतश्च नारे अस्मन्नि रीरमन् ।
४ ८ २ ०६०१c आरात्ताद्व सधमादं न आ गहीह वा सन्नुप श्रुधि ॥ १६७५
४ ८ २ ०६०२a इमे हि ते ब्रह्मकृतः सुते सचा मधौ न मक्ष आसते ।
४ ८ २ ०६०२c इन्द्रे कामं जरितारो वसूयवो रथे न पादमा दधुः ॥ १६७६

४ ८ २ ०७०१a अस्तावि मन्म पूर्व्यं ब्रह्मेन्द्राय वोचत ।
४ ८ २ ०७०१c पूर्वीर्ऋतस्य बृहतीरनूषत स्तोतुर्मेधा असृक्षत ॥ १६७७
४ ८ २ ०७०२a समिन्द्रो रायो बृहतीरधूनुत सं क्षोणी समु सूर्यम् ।
४ ८ २ ०७०२c सँ शुक्रासः शुचयः सं गवाशिरः सोमा इन्द्रममन्दिषुः ॥ १६७८

४ ८ २ ०८०१a इन्द्राय सोम पातवे वृत्रघ्ने परि षिच्यसे ।
४ ८ २ ०८०२c नरे च दक्षिणावते देवाय सदनासदे ॥ १६७९

४ ८ २ ०८०२a तँ सखायः पुरूरुचं यूयं वयं च सूरयः ।
४ ८ २ ०८०२c अश्याम वाजगन्ध्यँ सनेम वाजपस्त्यम् ॥ १६८०
४ ८ २ ०८०३a परि त्यँ हर्यतँ हरिं बभ्रुं पुनन्ति वारेण ।
४ ८ २ ०८०३c यो देवान्विश्वाँ इत्परि मदेन सह गच्छति ॥ १६८१

४ ८ २ ०९०१a कस्तमिन्द्र त्वावसो मर्त्यो दधर्षति ।
४ ८ २ ०९०१c श्रद्धा इत्तेमघवन् पार्ये दिवि वाजी वाजं सिषासति ॥ १६८२
४ ८ २ ०९०२a मघोनः स्म वृत्रहत्येषु चोदय ये ददति प्रिया वसु ।
४ ८ २ ०९०२c तव प्रणीती हर्यश्व सूरिभिर्विश्वा तरेम दुरिता ॥ १६८३

४ ८ २ १००१a एदु मधोर्मदिन्तरँ सिञ्चाध्वर्यो अन्धसः ।
४ ८ २ १००१c एवा हि वीर स्तवते सदावृधः ॥ १६८४
४ ८ २ १००२a इन्द्र स्थातर्हरीणां न किष्टे पूर्व्यस्तुतिम् ।
४ ८ २ १००२c उदानँश शवसा न भन्दना ॥ १६८५
४ ८ २ १००३a तं वो वाजानां पतिमहूमहि श्रवस्यवः ।
४ ८ २ १००३c अप्रायुभिर्ज्ञेभिर्वावृधेन्यम् ॥ १६८६

४ ८ २ ११०१a तं गूर्धया स्वर्णरं देवासो देवमरतिं दधन्विरे ।
४ ८ २ ११०१c देवत्रा हव्यमूहिषे ॥ १६८७
४ ८ २ ११०२a विभूतरातिं विप्र चित्रशोचिषमग्निमीडिष्व यन्तुरम् ।
४ ८ २ ११०२c अस्य मेधस्य सोम्यस्य सोभरे प्रेमध्वराय पूर्व्यम् ॥ १६८८

४ ८ २ १२०१a आ सोम सवानो अद्रिभिस्तिरो वाराण्यव्यया ।
४ ८ २ १२०१c जनो न पुरि चम्वोर्विशद्धरिः सदो वनेषु दध्रिषे ॥ १६८९
४ ८ २ १२०२a स मामृजे तिरो अण्वानि मेष्यो मीड्वान्त्सप्तिर्न वाजयुः ।
४ ८ २ १२०२c अनुमाद्यः पवमानो मनीषिभिः सोमो विप्रेभिर्ऋक्वभिः ॥ १६९०

४ ८ २ १३०१a वयमेनमिदा ह्योऽपीपेमेह वज्रिणम् ।
४ ८ २ १३०१c तस्मा उ अद्य सवने सुतं भरा नूनं भूषत श्रुते ॥ १६९१
४ ८ २ १३०२a वृकश्चिदस्य वारण उरामथिरा वयुनेषु भूषति ।
४ ८ २ १३०२c सेमं न स्तोमं जुजुषाण आ गहीन्द्र प्र चित्रया धिया ॥ १६९२

४ ८ २ १४०१a इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः ।
४ ८ २ १४०१c तद्वां चेति प्र वीर्यम् ॥ १६९३
४ ८ २ १४०२a इन्द्राग्नी अपसस्परि उप प्र यन्ति धीतयः ।
४ ८ २ १४०२c ऋतस्य पथ्या अनु ॥ १६९४

४ ८ २ १४०३a इन्द्राग्नी तविषाणि वाम् सधस्थानि प्रयाँसि च ।
४ ८ २ १४०३c युवोरसूर्यं हितम् ॥ १६९५

४ ८ २ १५०१a क ईं वेद सुते सचा पिबन्तं कद्वयो दधे ।
४ ८ २ १५०१c अयं यः पुरो विभिनत्त्योजसा मन्दानः शिप्रयन्धसः ॥ १६९६
४ ८ २ १५०२a दाना मृगो न वारणः पुरुत्रा चरथं दधे ।
४ ८ २ १५०२c न किष्ट्वा नि यमदा सुते गमो महाँश्चरस्योजसा ॥ १६९७
४ ८ २ १५०३a य उग्रः सन्ननिष्टृतः स्थिरो रणाय सँस्कृतः ।
४ ८ २ १५०३c यदि स्तोतुर्मघवा शृणवद्धवं नेन्द्रो योषत्या गमत् ॥ १६९८

४ ८ २ १६०१a पवमाना असृक्षत सोमाः शुक्रास इन्दवः ।
४ ८ २ १६०१c अभि विश्वानि काव्या ॥ १६९९
४ ८ २ १६०२a पवमाना दिवस्पर्यन्तरिक्षादसृक्षत ।
४ ८ २ १६०२c पृथिव्या अधि सानवि ॥ १७००
४ ८ २ १६०३a पवमानास आशवः शुभ्रा असृग्रमिन्दवः ।
४ ८ २ १६०३c घ्नन्तो विश्वा अप द्विषः ॥ १७०१

४ ८ २ १७०१a तोशा वृत्रहणा हुवे सजित्वानापराजिता ।
४ ८ २ १७०१c इन्द्राग्नी वाजसातमा ॥ १७०२
४ ८ २ १७०२a प्र वामर्चन्त्युक्थिनो नीथाविदो जरितारः ।
४ ८ २ १७०२c इन्द्राग्नी इष आ वृणे ॥ १७०३
४ ८ २ १७०३a इन्द्राग्नी नवतिं पुरो दासपत्नीरधूनुतम् ।
४ ८ २ १७०३c साकमेकेन कर्मणा ॥ १७०४

४ ८ २ १८०१a उप त्वा रण्वसन्दृशं प्रयस्वन्तः सहस्कृत ।
४ ८ २ १८०१c अग्ने ससृज्महे गिरः ॥ १७०५
४ ८ २ १८०२a उप च्छायामिव घृणेरगन्म शर्म ते वयम् ।
४ ८ २ १८०२c अग्ने हिरण्यसन्दृशः ॥ १७०६
४ ८ २ १८०३a य उग्र इव शर्यहा तिग्मशृङ्गो न वँसगः ।
४ ८ २ १८०३c अग्ने पुरो रुरोजिथ ॥ १७०७

४ ८ २ १९०१a ऋतावानं वैश्वानरमृतस्य ज्योतिषस्पतिम् ।
४ ८ २ १९०१c अजस्रं घर्ममीमहे ॥ १७०८
४ ८ २ १९०२a य इदं प्रतिपप्रथे यज्ञस्य स्वरुत्तिरन् ।
४ ८ २ १९०२c ऋतूनुत्सृजते वशी ॥ १७०९

४ ८ २ १९०३a अग्निः प्रियेषु धामसु कामो भूतस्य भव्यस्य ।
४ ८ २ १९०३c सम्राडेको वि राजति ॥ १७१०

आष्टम प्रपाठकः । तृतीयोऽर्धः

४ ८ ३ ०१०१a अग्निः प्रत्नेन जन्मना शुम्भानस्तन्वाꣳ स्वाम् ।
४ ८ ३ ०१०१c कविर्विप्रेण ववृधे ॥ १७११
४ ८ ३ ०१०२a ऊर्ज्जो नपातमा हुवेऽग्निं पावकशोचिषम् ।
४ ८ ३ ०१०२c अस्मिन्यज्ञे स्वध्वरे ॥ १७१२
४ ८ ३ ०१०३a स नो मित्रमहस्त्वमग्ने शुक्रेण शोचिषा ।
४ ८ ३ ०१०३c देवैरा सत्सि बर्हिषि ॥ १७१३

४ ८ ३ ०२०१a उत्ते शुष्मासो अस्थू रक्षो भिन्दन्तो अद्रिवः ।
४ ८ ३ ०२०१c नुदस्व याः परिस्पृधः ॥ १७१४
४ ८ ३ ०२०२a अया निजघ्निरोजसा रथसङ्गे धने हिते ।
४ ८ ३ ०२०२c स्तवा अबिभ्युषा हृदा ॥ १७१५
४ ८ ३ ०२०३a अस्य व्रतानि नाधृषे पवमानस्य दूढ्या ।
४ ८ ३ ०२०३c रुज यस्त्वा पृतन्यति ॥ १७१६
४ ८ ३ ०२०४a तँ हिन्वन्ति मदच्युतँ हरिं नदीषु वाजिनम् ।
४ ८ ३ ०२०४c इन्दुमिन्द्राय मत्सरम् ॥ १७१७

४ ८ ३ ०३०१a आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः ।
४ ८ ३ ०३०१c मा त्वा के चिन्नि येमुरिन्न पाशिनोऽति धन्वेव ताँ इहि ॥ १७१८
४ ८ ३ ०३०२a वृत्रखादो वलँ रुजः पुरां दर्मो अपामजः ।
४ ८ ३ ०३०२c स्थाता रथस्य हर्योरभिस्वर इन्द्रो दृढा चिदारुजः ॥ १७१९
४ ८ ३ ०३०३a गम्भीराँ उदधींरिव क्रतुं पुष्यसि गा इव ।
४ ८ ३ ०३०३c प्र सुगोपा यवसं धेनवो यथा ह्रदं कुल्या इवाशत ॥ १७२०

४ ८ ३ ०४०१a यथा गौरो अपा कृतं तृष्यन्नेत्यवेरिणम् ।
४ ८ ३ ०४०१c आपित्वे नः प्रपित्वे तूयमा गहि कण्वेषु सु सचा पिब ॥ १७२१
४ ८ ३ ०४०२a मन्दन्तु त्वा मघवन्निन्द्रेन्दवो राधोदेयाय सुन्वते ।
४ ८ ३ ०४०२c आमुष्या सोममपिबश्चमू सुतं ज्येष्ठं तद्दधिषे सहः ॥ १७२२

४ ८ ३ ०५०१a त्वमङ्ग प्र शुँसिषो देवः शविष्ठ मर्त्यम् ।
४ ८ ३ ०५०१c न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः ॥ १७२३
४ ८ ३ ०५०२a मा ते राधाँसि मा त ऊतयो वसोऽस्मान्कदा चना दभन् ।

४ ८ ३ ०५०२c विश्वा च न उपमिमीहि मानुष वसूनि चर्षणिभ्य आ ॥ १७२४

४ ८ ३ ०६०१a प्रति ष्या सूनरी जनी व्युच्छन्ती परि स्वसुः ।
४ ८ ३ ०६०१c दिवो अदर्शि दुहिता ॥ १७२५
४ ८ ३ ०६०२a अश्वेव चित्रारुषी माता गवामृतावरी ।
४ ८ ३ ०६०२c सखा भूदश्विनोरुषाः ॥ १७२६
४ ८ ३ ०६०३a उत सखास्यश्विनोरुत माता गवामसि ।
४ ८ ३ ०६०३c उतोषो वस्व ईशिषे ॥ १७२७

४ ८ ३ ०७०१a एषो उषा अपूर्व्य व्युच्छति प्रिया दिवः ।
४ ८ ३ ०७०१c स्तुषे वामश्विना बृहत् ॥ १७२८
४ ८ ३ ०७०२a या दस्रा सिन्धुमातरा मनोतरा रयीणाम् ।
४ ८ ३ ०७०२c धिया देवा वसुविदा ॥ १७२९
४ ८ ३ ०७०३a वच्यन्ते वां ककुहासो जूर्णायामधि विष्टपि ।
४ ८ ३ ०७०३c यद्वाँ रथो विभिष्पतात् ॥ १७३०

४ ८ ३ ०८०१a उषस्तच्चित्रमा भरास्मभ्यं वाजिनीवति ।
४ ८ ३ ०८०१c येन तोकं च तनयं च धामहे ॥ १७३१
४ ८ ३ ०८०२a उषो अद्येह गोमत्यश्वावति विभावरि ।
४ ८ ३ ०८०२c रेवदस्मे व्युच्छ सूनृतावति ॥ १७३२
४ ८ ३ ०८०३a युङ्क्ष्वा हि वाजिनीवत्यश्वाँ अद्यारुणाँ उषः ।
४ ८ ३ ०८०३c अथा नो विश्वा सौभगान्या वह ॥ १७३३

४ ८ ३ ०९०१a अश्विना वर्तिरस्मदा गोमद्दस्रा हिरण्यवत् ।
४ ८ ३ ०९०१c अर्वाग्रथँ समनसा नि यच्छतम् ॥ १७३४
४ ८ ३ ०९०२a एह देवा मयोभुवा दस्रा हिरण्यवर्त्तनी ।
४ ८ ३ ०९०२c उषर्बुधो वहन्तु सोमपीतये ॥ १७३५
४ ८ ३ ०९०३a यावित्था श्लोकमा दिवो ज्योतिर्जनाय चक्रथुः ।
४ ८ ३ ०९०३c आ न ऊर्जं वहतमश्विना युवम् ॥ १७३६

४ ८ ३ १००१a अग्निं तं मन्ये यो वसुरस्तं यं यन्ति धेनवः ।
४ ८ ३ १००१c अस्तमर्वन्त आशवोस्तं नित्यासो वाजिन इषँ स्तोतृभ्य आ भर ॥ १७३७
४ ८ ३ १००२a अग्निर्हि वाजिनं विशे ददाति विश्वचर्षणिः ।

४ ८ ३ १००२c अग्नी राये स्वाभुवँ स प्रीतो याति वार्यमिषँ स्तोतृभ्य आ भर ॥ १७३८

४ ८ ३ १००३a सो अग्निर्यो वसुर्गृणे सं यमायन्ति धेनवः ।

४ ८ ३ १००३c समर्वन्तो रघुद्रुवः सँ सुजातासः सूरय इषँ स्तोतृभ्य आ भर ॥ १७३९

४ ८ ३ ११०१a महे नो अद्य बोधयोषो राये दिवित्मती ।

४ ८ ३ ११०१c यथा चिन्नो अबोधयः सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥ १७४०

४ ८ ३ ११०२a या सुनीथे शौचद्रथे व्यौच्छो दुहितर्दिवः ।

४ ८ ३ ११०२c सा व्युच्छ सहीयसि सत्यश्रवसि वाय्ये सुजाते अश्वसूनृते ॥ १७४१

४ ८ ३ ११०३a सा नो अद्याभरद्वसुर्व्युच्छा दुहितर्दिवः ।

४ ८ ३ ११०३c यो व्यौच्छः सहीयसि सत्यश्रवसि याय्ये सुजाते अश्वसूनृते ॥ १७४२

४ ८ ३ १२०१a प्रति प्रियतमँ रथं वृशणं वसुवाहनम् ।

४ ८ ३ १२०१c स्तोता वामश्विनावृषि स्तोमेभिर्भूषति प्रति माध्वी मम श्रुतँ हवम् ॥ १७४३

४ ८ ३ १२०२a अत्यायातमश्विना तिरो विश्वा अहँ सना ।

४ ८ ३ १२०२c दस्रा हिरण्यवर्त्तनी सुषुम्णा सिन्धुवाहसा माध्वी मम श्रुतँ हवम् ॥ १७४४

४ ८ ३ १२०३a आ नो रत्नानि बिभ्रतावश्विना गच्छतं युवम् ।

४ ८ ३ १२०३c रुद्रा हिरण्यवर्त्तनी जुषाणा वाजिनीवसू माध्वी मम श्रुतँ हवम् ॥ १७४५

४ ८ ३ १३०१a अबोध्यग्निः समिधा जनानां प्रति धेनुमिवायतीमुषासम् ।

४ ८ ३ १३०१c यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सस्रते नाकमच्छ ॥ १७४६

४ ८ ३ १३०२a अबोधि होता यजथाय देवानूर्ध्वो अग्निः सुमनाः प्रातरस्थात् ।

४ ८ ३ १३०२c समिद्धस्य रुशददर्शि पाजो महान्देवस्तमसो निरमोचि ॥ १७४७

४ ८ ३ १३०३a यदीं गणस्य रशनामजीगः शुचिरङ्क्ते शुचिभिर्गोभिरग्निः ।

४ ८ ३ १३०३c आद्दक्षिणा युज्यते वाजयन्त्युत्तानामूर्ध्वो अधयज्जुहूभिः ॥ १७४८

४ ८ ३ १४०१a इदँ श्रेष्ठं ज्योतिषां ज्योतिरागाच्चित्रः प्रकेतो अजनिष्ट विभ्वा ।

४ ८ ३ १४०१c यथा प्रसूता सवितुः सवायैवा रात्र्युषसे योनिमारैक् ॥ १७४९

४ ८ ३ १४०२a रुशाद्वत्सा रुशती श्वेत्यागादारैगु कृष्णा सदनान्यस्याः ।
४ ८ ३ १४०२c समानबन्धू अमृते अनूची द्यावा वर्णं चरत आमिनाने ॥ १७५०
४ ८ ३ १४०३a समानो अध्वा स्वस्रोरनन्तस्तमन्यान्या चरतो देवशिष्टे ।
४ ८ ३ १४०३c न मेथेते न तस्थतुः सुमेके नक्तोषासा समनसा विरूपे ॥ १७५१

४ ८ ३ १५०१a आ भात्यग्निरुषसामनीकमुद्विप्राणां देवया वाचो अस्थुः ।
४ ८ ३ १५०१c अर्वाञ्चा नूनँ रथ्येह यातं पीपिवाँसमश्विना घर्ममच्छ ॥ १७५२
४ ८ ३ १५०२a न सँस्कृतं प्र मिमीतो गमिष्ठान्ति नूनमश्विनोपस्तुतेह ।
४ ८ ३ १५०२c दिवाभिपित्वेवसागमिष्ठा प्रत्यवर्त्तिं दाशुषे शम्भविष्ठा ॥ १७५३
४ ८ ३ १५०३a उता यातँ सङ्गवे प्रातरह्नो मध्यन्दिन उदिता सूर्यस्य ।
४ ८ ३ १५०३c दिवा नक्तमवसा शन्तमेन नेदानीं पीतिरश्विना ततान ॥ १७५४

४ ८ ३ १६०१a एता उ त्या उषसः केतुमक्रत पूर्वे अर्धे रजसो भानुमञ्जते ।
४ ८ ३ १६०१c निष्कृण्वाना आयुधानीव धृष्णवः प्रति गावोऽरुषीर्यन्ति मातरः ॥ १७५५
४ ८ ३ १६०२a उदपप्तन्नरुणा भानवो वृथा स्वायुजो अरुषीर्गा अयुक्षत ।
४ ८ ३ १६०२c अक्रन्नुषासो वयुनानि पूर्वथा रुशन्तं भानुमरुषीरशिश्रयुः ॥ १७५६
४ ८ ३ १६०३a अर्चन्ति नारीरपसो न विष्टिभिः समानेन योजनेना परावतः ।
४ ८ ३ १६०३c इषं वहन्तीः सुकृते सुदानवे विश्वेदह यजमानाय सुन्वते ॥ १७५७

४ ८ ३ १७०१a अबोध्यग्निर्ज्म उदेति सूर्यो व्यू३षाश्चन्द्रा मह्यावो अर्चिषा ।
४ ८ ३ १७०१c आयुक्षातामश्विना यातवे रथं प्रासावीद्देवः सविता जगत्पृथक् ॥ १७५८
४ ८ ३ १७०२a यद्युञ्जाथे वृषणमश्विना रथं घृतेन नो मधुना क्षत्रमुक्षतम् ।
४ ८ ३ १७०२c अस्माकं ब्रह्म पृतनासु जिन्वतं वयं धना शूरसाता भजेमहि ॥ १७५९
४ ८ ३ १७०३a अर्वाङ्त्रिचक्रो मधुवाहनो रथो जीराश्वो अश्विनोर्यातु सुष्टुतः ।
४ ८ ३ १७०३c त्रिवन्धुरो मघवा विश्वसौभगः शं न आ वक्षद्द्विपदे चतुष्पदे ॥ १७६०

४ ८ ३ १८०१a प्र ते धारा असश्चतो दिवो न यन्ति वृष्टयः ।
४ ८ ३ १८०१c अच्छा वाजँ सहस्रिणम् ॥ १७६१
४ ८ ३ १८०२a अभि प्रियाणि काव्या विश्वा चक्षाणो अर्षति ।
४ ८ ३ १८०२c हरिस्तुञ्जान आयुधा ॥ १७६२

४ ८ ३ १८०३a स मर्मृजान आयुभिरिभो राजेव सुव्रतः ।
४ ८ ३ १८०३c श्येनो न वँसु षीदति ॥ १७६३
४ ८ ३ १८०४a स नो विश्वा दिवो वसूतो पृथिव्या अधि ।
४ ८ ३ १८०४c पुनान इन्दवा भर ॥ १७६४

नवम प्रपाठकः । प्रथमोऽर्धः

४ ९ १ ०१०१a प्रास्य धारा अक्षरन्वृष्णः सुतस्यौजसा ।
४ ९ १ ०१०१c देवाँ अनु प्रभूषतः ॥ १७६५
४ ९ १ ०१०२a सप्तिं मृजन्ति वेधसो गृणन्तः कारवो गिरा ।
४ ९ १ ०१०२c ज्योतिर्जज्ञानमुक्थ्यम् ॥ १७६६
४ ९ १ ०१०३a सुषहा सोम तानि ते पुनानाय प्रभूवसो ।
४ ९ १ ०१०३c वर्धा समुद्रमुक्थ्यम् ॥ १७६७

४ ९ १ ०२०१a एष ब्रह्मा य ऋत्विय इन्द्रो नाम श्रुतो गृणे ॥ १७६८
४ ९ १ ०२०२a त्वामिच्छवसस्पते यन्ति गिरो न संयतः ॥ १७६९
४ ९ १ ०२०३a वि स्रुतयो यथा पथा इन्द्र त्वद्यन्तु रातयः ॥ १७७०

४ ९ १ ०३०१a आ त्वा रथं यथोतये सुम्नाय वर्त्तयामसि ।
४ ९ १ ०३०१c तुविकूर्मिमृतीषहमिन्द्रं शविष्ठ सत्पतिम् ॥ १७७१
४ ९ १ ०३०२a तुविशुष्म तुविक्रतो शचीवो विश्वया मते ।
४ ९ १ ०३०२c आ पप्राथ महित्वना ॥ १७७२
४ ९ १ ०३०३a यस्य ते महिना महः परि ज्मायन्तमीयतुः ।
४ ९ १ ०३०३c हस्ता वज्रँ हिरण्ययम् ॥ १७७३

४ ९ १ ०४०१a आ यः पुरं नार्मिणीमदीदेदत्यः कविर्नभन्योऽ३ नार्व ।
४ ९ १ ०४०१c सूरो न रुरुक्काञ्छतात्मा ॥ १७७४
४ ९ १ ०४०२a अभि द्विजन्मा त्री रोचनानि विश्वा रजाँसि शुशुचनो अस्थात् ।
४ ९ १ ०४०२c होता यजिष्ठो अपाँ सधस्थे ॥ १७७५
४ ९ १ ०४०३a अयँ स होता यो द्विजन्मा विश्वा दधे वार्याणि श्रवस्या ।
४ ९ १ ०४०३c मर्तो यो अस्मै सुतुको ददाश ॥ १७७६

४ ९ १ ०५०१a अग्ने तमद्याष्वं न स्तोमैः क्रतुं न भद्रँ हृदिस्पृषम् ।
४ ९ १ ०५०१c ऋध्यामा त ओहैः ॥ १७७७
४ ९ १ ०५०२a अधा ह्यग्ने क्रतोर्भद्रस्य दक्षस्य साधोः ।
४ ९ १ ०५०२c रथीर्ऋतस्य बृहतो बभूथ ॥ १७७८

४ ९ १ ०५०३a एभिर्नो अर्कैर्भवा नो अर्वाङ्ङ्गा३र्ण ज्योतिः ।
४ ९ १ ०५०३c अग्ने विश्वेभिः सुमना अनीकैः ॥ १७७९

४ ९ १ ०६०१a अग्ने विवस्वदुषसश्चित्रँ राधो अमर्त्य ।
४ ९ १ ०६०१c आ दाशुषे जातवेदो वहा त्वमद्या देवाँ उषर्बुधः ॥ १७८०
४ ९ १ ०६०२a जुष्टो हि दूतो असि हव्यवाहनोऽग्ने रथीरध्वराणाम् ।
४ ९ १ ०६०२c सजूरश्विभ्यामुषसा सुवीर्यमस्मे धेहि श्रवो बृहत् ॥ १७८१

४ ९ १ ०७०१a विधुं दद्राणँ समने बहूनां युवानँ सन्तं पलितो जगार ।
४ ९ १ ०७०१c देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान ॥ १७८२
४ ९ १ ०७०२a शाक्मना शाको अरुणः सुपर्ण आ यो महः शूरः सनादनीडः ।
४ ९ १ ०७०२c यच्चिकेत सत्यमित्तन्न मोघं वसु स्पार्हमुत जेतोत दाता ॥ १७८३
४ ९ १ ०७०३a ऐभिर्ददे वृष्ण्या पौँस्यानि येभिरौक्षद्वृत्रहत्याय वज्री ।
४ ९ १ ०७०३c ये कर्मणः क्रियमाणस्य मह्न ऋतेकर्ममुदजायन्त देवाः ॥ १७८४

४ ९ १ ०८०१a अस्ति सोमो अयँ सुतः पिबन्त्यस्य मरुतः ।
४ ९ १ ०८०१c उत स्वराजो अश्विना ॥ १७८५
४ ९ १ ०८०२a पिबन्ति मित्रो अर्यमा तना पूतस्य वरुणः ।
४ ९ १ ०८०२c त्रिषधस्थस्य जावतः ॥ १७८६
४ ९ १ ०८०३a उतो न्वस्य जोषमा इन्द्रः सुतस्य गोमतः ।
४ ९ १ ०८०३c प्रातर्होतेव मत्सति ॥ १७८७

४ ९ १ ०९०१a बण्महाँ असि सूर्य बडादित्य महाँ असि ।
४ ९ १ ०९०१c महस्ते सतो महिमा पनिष्टम मह्ना देव महाँ असि ॥ १७८८
४ ९ १ ०९०२a बट् सूर्य श्रवसा महाँ असि सत्रा देव महाँ असि ।
४ ९ १ ०९०२c मह्ना देवानामसुर्यः पुरोहितो विभु ज्योतिरदाभ्यम् ॥ १७८९

४ ९ १ १००१a उप नो हरिभिः सुतं याहि मदानां पते ।
४ ९ १ १००१c उप नो हरिभिः सुतम् ॥ १७९०
४ ९ १ १००२a द्विता यो वृत्रहन्तमो विद इन्द्रः शतक्रतुः ।
४ ९ १ १००२c उप नो हरिभिः सुतम् ॥ १७९१
४ ९ १ १००३a त्वँ हि वृत्रहन्नेषां पाता सोमानामसि ।
४ ९ १ १००३c उप नो हरिभिः सुतम् ॥ १७९२

४ ९ १ ११०१a प्र वो महे महेवृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वम् ।
४ ९ १ ११०१c विशः पूर्वीः प्र चर चर्षणिप्राः ॥ १७९३

४ ९ १ ११०२a उरुव्यचसे महिने सुवृक्तिमिन्द्राय ब्रह्म जनयन्त विप्राः ।
४ ९ १ ११०२c तस्य व्रतानि न मिनन्ति धीराः ॥ १७९४
४ ९ १ ११०३a इन्द्रं वाणीरनुत्तमन्युमेव सत्रा राजानं दधिरे सहध्यै ।
४ ९ १ ११०३c हर्यश्वाय बर्हया समापीन् ॥ १७९५

४ ९ १ १२०१a यदिन्द्र यावतस्त्वमेतावदहमीशीय ।
४ ९ १ १२०१c स्तोतारमिद्दधिषे रदावसो न पापत्वाय रँसिषम् ॥ १७९६
४ ९ १ १२०२a शिक्षेयमिन्महयते दिवेदिवे राय आ कुहचिद्विदे ।
४ ९ १ १२०२c न हि त्वदन्यन्मघवन्न आप्यं वस्यो अस्ति पिता च न ॥ १७९७

४ ९ १ १३०१a श्रुधी हवं विपिपानस्याद्रेर्बोधा विप्रस्यार्चतो मनीषाम् ।
४ ९ १ १३०१c कृष्वा दुवाँस्यन्तमा सचेमा ॥ १७९८
४ ९ १ १३०२a न ते गिरो अपि मृष्ये तुरस्य न सुष्टुतिमसुर्यस्य विद्वान् ।
४ ९ १ १३०२c सदा ते नाम स्वयशो विवक्मि ॥ १७९९
४ ९ १ १३०३a भूरि हि ते सवना मानुषेषु भूरि मनीषी हवते त्वामित् ।
४ ९ १ १३०३c मारे अस्मन्मघवञ्योक्कः ॥ १८००

४ ९ १ १४०१a प्रो ष्वस्मै पुरोरथमिन्द्राय शूषमर्चत ।
४ ९ १ १४०१c अभीके चिदु लोककृत्सङ्गे समत्सु वृत्रह ।
४ ९ १ १४०१e अस्माकं बोधि चोदिता नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥ १८०१
४ ९ १ १४०२a त्वँ सिन्धूँरवासृजोऽधराचो अहन्नहिम् ।
४ ९ १ १४०२c अशत्रुरिन्द्र जज्ञिषे विश्वं पुष्यसि वार्यम् ।
४ ९ १ १४०२e तं त्वा परि ष्वजामहे नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥ १८०२
४ ९ १ १४०३a वि षु विश्वा अरातयोऽर्यो नशन्त नो धियः ।
४ ९ १ १४०३c अस्तासि शत्रवे वधं यो न इन्द्र जिघाँसति ।
४ ९ १ १४०३e या ते रातिर्ददिवसु नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥ १८०३

४ ९ १ १५०१a रेवाँ इद्रेवत स्तोता स्यात्त्वावतो मघोनः ।
४ ९ १ १५०१c प्रेदु हरिवः सुतस्य ॥ १८०४
४ ९ १ १५०२a उक्थं च न शस्यमानं नागो रयिरा चिकेत ।
४ ९ १ १५०२c न गायत्रं गीयमानम् ॥ १८०५
४ ९ १ १५०३a मा न इन्द्र पीयत्नवे मा शर्धते परा दाः ।

४ ९ १ १५०३c शिक्षा शचीवः शचीभिः ॥ १८०६

४ ९ १ १६०१a एन्द्र याहि हरिभिरुप कण्वस्य सुष्टुतिम् ।
४ ९ १ १६०१c दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ १८०७
४ ९ १ १६०२a अत्रा वि नेमिरेषामुरां न धूनुते वृकः ।
४ ९ १ १६०२c दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ १८०८
४ ९ १ १६०३a आ त्वा ग्रावा वदनीह सोमी घोषेण वक्षतु ।
४ ९ १ १६०३c दिवो अमुष्य शासतो दिवं यय दिवावसो ॥ १८०९

४ ९ १ १७०१a पवस्व सोम मन्दयन्निन्द्राय मधुमत्तमः ॥ १८१०
४ ९ १ १७०२a ते सुतासो विपश्चितः शुक्रा वायुमसृक्षत ॥ १८११
४ ९ १ १७०३a असृग्रं देववीतये वाजयन्तो रथा इव ॥ १८१२

४ ९ १ १८०१a अग्निँ होतारं मन्ये दास्वन्तं वसोः सूनुँ सहसो जातवेदसं विप्रं न जातवेदसम् ।
४ ९ १ १८०१c य ऊर्ध्वरो स्वध्वरो देवो देवाच्या कृपा ।
४ ९ १ १८०१e घृतस्य विभ्राष्टिमनु शुक्रशोचिष आजुह्वानस्य सर्पिषः ॥ १८१३
४ ९ १ १८०२a यजिष्ठं त्वा यजमाना हुवेम ज्येष्ठमङ्गिरसां विप्र मन्मभिर्विप्रेभिः शुक्र मन्मभिः ।
४ ९ १ १८०२c परिज्मानमिव द्यौँ होतारं चर्षणीनाम् ।
४ ९ १ १८०२e शोचिष्केशं वृषणं यमिमा विशः प्रावन्तु जूतये विशः ॥ १८१४
४ ९ १ १८०३a स हि पुरू चिदोजसा विरुक्मता दीद्यानो भवति द्रुहन्तरः परशुर्न द्रुहन्तरः ।
४ ९ १ १८०३c वीडु चिद्यस्य समृतौ श्रुवद्वनेव यत्स्थिरम् ।
४ ९ १ १८०३e निष्षहमाणो यमते नायते धन्वासहा नायते ॥ १८१५

नवम प्रपाठकः । द्वितीयोऽर्धः
४ ९ २ ०१०१a अग्ने तव श्रवो वयो महि भ्राजन्ते अर्चयो विभावसो ।
४ ९ २ ०१०१c बृहद्भानो शवसा वाजमुक्थ्यꣳ दधासि दाशुषे कवे ॥ १८१६
४ ९ २ ०१०२a पावकवर्चाः शुक्रवर्चा अनूनवर्चा उदियर्षि भानुना ।
४ ९ २ ०१०२c पुत्रो मातरा विचरन्नुपावसि पृणक्षि रोदसी उभे ॥ १८१७
४ ९ २ ०१०३a ऊर्जो नपाज्जातवेदः सुशस्तिभिर्मन्दस्व धीतिभिर्हितः ।
४ ९ २ ०१०३c त्वे इषः सं दधुर्भूरिवर्पसश्चित्रोतयो वामजाताः ॥ १८१८
४ ९ २ ०१०४a इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो अमर्त्य ।

४ ९ २ ०१०४c स दर्शतस्य वपुषो वि राजसि पृणक्षि दर्शतं क्रतुम् ॥ १८१९
४ ९ २ ०१०५a इष्कर्त्तारमध्वरस्य प्रचेतसं क्षयन्तँ राधसो महः ।
४ ९ २ ०१०५c रातिं वामस्य सुभगां महीमिषं दधासि सानसिँ रयिम् ॥ १८२०
४ ९ २ ०१०६a ऋतावानं महिषं विश्वदर्शतमग्निँ सुम्नाय दधिरे पुरो जनाः ।
४ ९ २ ०१०६c श्रुत्कर्णँ सप्रथस्तमं त्वा गिरा दैव्यं मानुषा युगा ॥ १८२१

४ ९ २ ०२०१a प्र सो अग्ने तवोतिभिः सुविराभिस्तरति वाजकर्मभिः ।
४ ९ २ ०२०१c यस्य त्वँ सख्यमाविथ ॥ १८२२
४ ९ २ ०२०२a तव द्रप्सो नीलवान्वाश ऋत्विय इन्धानः सिष्णवा ददे ।
४ ९ २ ०२०२c त्वं महीनामुषसामसि प्रियः क्षपो वस्तुषु राजसि ॥ १८२३

४ ९ २ ०३०१a तमोषधीर्दधिरे गर्भमृत्वियं तमापो अग्निं जनयन्त मातरः ।
४ ९ २ ०३०१c तमित्समानं वनिनश्च वीरुधोऽन्तर्वतीश्च सुवते च विश्वहा ॥ १८२४

४ ९ २ ०४०१a अग्निरिन्द्राय पवते दिवि शुक्रो वि राजति ।
४ ९ २ ०४०१c महिषीव वि जायते ॥ १८२५

४ ९ २ ०५०१a यो जागार तमृचः कामयन्ते यो जागार तमु सामानि यन्ति ।
४ ९ २ ०५०१c यो जागार तमयँ सोम आह तवाहमस्मि सख्ये न्योकाः ॥ १८२६

४ ९ २ ०६०१a अग्निर्जागार तमृचः कामयन्तेग्निर्जागार तमु सामानि यन्ति ।
४ ९ २ ०६०१c अग्निर्जागार तमयँ सोम आह तवाहमस्मि सख्ये न्योकाः ॥ १८२७

४ ९ २ ०७०१a नमः सखिभ्यः पूर्वसद्भ्यो नमः साकन्निषेभ्यः ।
४ ९ २ ०७०१c युञ्जे वाचँ शतपदीम् ॥ १८२८
४ ९ २ ०७०२a युञ्जे वाचँ शतपदीं गाये सहस्रवर्त्तनि ।
४ ९ २ ०७०२c गायत्रं त्रैष्टुभं जगत् ॥ १८२९
४ ९ २ ०७०३a गायत्रं त्रैष्टुभं जगद्विश्वा रूपाणि सम्भृता ।
४ ९ २ ०७०३c देवा ओकाँसि चक्रिरे ॥ १८३०

४ ९ २ ०८०१a अग्निर्ज्योतिर्ज्योतिरग्निरिन्द्रो ज्योतिर्ज्योतिरिन्द्रः ।
४ ९ २ ०८०१c सूर्यो ज्योतिर्ज्योतिः सूर्यः ॥ १८३१
४ ९ २ ०८०२a पुनरूर्जा नि वर्त्तस्व पुनरग्न इषायुषा ।
४ ९ २ ०८०२c पुनर्नः पाह्यँहसः ॥ १८३२
४ ९ २ ०८०३a सह रय्या नि वर्तस्वाग्ने पिन्वस्व धारया ।
४ ९ २ ०८०३c विश्वप्स्न्या विश्वतस्परि ॥ १८३३

४ ९ २ ०९०१a यदिन्द्राहं यथा त्वमीशीय वस्व एक इत् ।
४ ९ २ ०९०१c स्तोता मे गोसखा स्यात् ॥ १८३४
४ ९ २ ०९०२a शिक्षेयमस्मै दित्सेयँ शचीपते मनीषिणे ।
४ ९ २ ०९०२c यदहं गोपतिः स्याम् ॥ १८३५
४ ९ २ ०९०३a धेनुष्ट इन्द्र सूनृता यजमानाय सुन्वते ।
४ ९ २ ०९०३c गामश्वं पिप्युषी दुहे ॥ १८३६

४ ९ २ १००१a आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन ।
४ ९ २ १००१c महे रणाय चक्षसे ॥ १८३७
४ ९ २ १००२a यो वः शिवतमो रसस्तस्य भाजयतेह नः ।
४ ९ २ १००२c उशतीरिव मातरः ॥ १८३८
४ ९ २ १००३a तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ ।
४ ९ २ १००३c आपो जनयथा च नः ॥ १८३९

४ ९ २ ११०१a वात आ वातु बेषजँ शम्भु मयोभु नो हृदे ।
४ ९ २ ११०१c प्र न अयूँषि तारिषत् ॥ १८४०
४ ९ २ ११०२a उत वात पितासि न उत भ्रातोत नः सखा ।
४ ९ २ ११०२c स नो जीवातवे कृधि ॥ १८४१
४ ९ २ ११०३a यददो वात ते गृहे३ऽमृतं निहितं गुहा ।
४ ९ २ ११०३c तस्यो नो देहि जीवसे ॥ १८४२

४ ९ २ १२०१a अभि वाजी विश्वरूपो जनित्रँ हिरण्ययं बिभ्रदत्कँ सुपर्णः ।
४ ९ २ १२०१c सूर्यस्य भानुमृतुथा वसानः परि स्वयं मेधमृभ्रो जजान ॥ १८४३
४ ९ २ १२०२a अप्सु रेतः शिश्रिये विश्वरूपं तेजः पृथिव्यामधि यत्सम्बभूव ।
४ ९ २ १२०२c अन्तरिक्षे स्वं महिमानं मिमानः कनिक्रन्ति वृष्णो अश्वस्य रेतः ॥ १८४४
४ ९ २ १२०३a अयँ सहस्रा परि युक्ता वसानः सूर्यस्य भानुं यज्ञो दाधार ।
४ ९ २ १२०३c सहस्रदाः शतदा भूरिदावा धर्त्ता दिवो भुवनस्य विश्पतिः ॥ १८४५

४ ९ २ १३०१a नाके सुपर्णमुप यत्पतन्तँ हृदा वेनन्तो अभ्यचक्षत त्वा ।
४ ९ २ १३०१c हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम् ॥ १८४६
४ ९ २ १३०२a ऊर्ध्वो गन्धर्वो अधि नाके अस्थात्प्रत्यङ्चित्रा बिभ्रदस्यायुधानि ।
४ ९ २ १३०२c वसानो अत्कँ सुरभिं दृशे कँ स्व३र्ण नाम जनत प्रियाणि ॥ १८४७
४ ९ २ १३०३a द्रप्सः समुद्रमभि यज्जिगाति पश्यन्गृध्रस्य चक्षसा विधर्मन् ।

४ ९ २ १३०३c भानुः शुक्रेण शोचिषा चकानस्तृतीये चक्रे रजसि प्रियाणि ॥ १८४८

नवम प्रपाठकः । तृतीयोऽर्धः

४ ९ ३ ०१०१a आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ।
४ ९ ३ ०१०१c सङ्क्रन्दनोऽनिमिष एकवीरः शतँ सेना अजयत्साकमिन्द्रः ॥ १८४९
४ ९ ३ ०१०२a सङ्क्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।
४ ९ ३ ०१०२c तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा ॥ १८५०
४ ९ ३ ०१०३a स इषुहस्तैः स निषङ्गिभिर्वशी सँस्रष्टा स युध इन्द्रो गणेन ।
४ ९ ३ ०१०३c सँ सृष्टजित्सोमपा बाहुशर्ध्यू३ग्रधन्वा प्रतिहिताभिरस्ता ॥ १८५१

४ ९ ३ ०२०१a बृहस्पते परि दीया रथेन रक्षोहामित्राँ अपबाधमानः ।
४ ९ ३ ०२०१c प्रभञ्जन्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ॥ १८५२
४ ९ ३ ०२०२a बलविज्ञायः स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः ।
४ ९ ३ ०२०२c अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित् ॥ १८५३
४ ९ ३ ०२०३a गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा ।
४ ९ ३ ०२०३c इमँ सजाता अनु वीरयध्वमिन्द्रँ सखायो अनु सँ रभध्वम् ॥ १८५४

४ ९ ३ ०३०१a अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिन्द्रः ।
४ ९ ३ ०३०१c दुश्च्यवनः पृतनाषाडयुध्यो३ऽस्माकँ सेना अवतु प्र युत्सु ॥ १८५५
४ ९ ३ ०३०२a इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः ।
४ ९ ३ ०३०२c देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ॥ १८५६
४ ९ ३ ०३०३a इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुताँ शर्ध उग्रम् ।
४ ९ ३ ०३०३c महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ॥ १८५७

४ ९ ३ ०४०१a उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मनाँसि ।
४ ९ ३ ०४०१c उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानां जयतां यन्तु घोषाः ॥ १८५८
४ ९ ३ ०४०२a अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु ।
४ ९ ३ ०४०२c अस्माकं वीरा उत्तरे भवन्त्वस्माँ उ देवा अवता हवेषु ॥ १८५९
४ ९ ३ ०४०३a असौ या सेना मरुतः परेषामभ्येति न ओजसा स्पर्धमाना ।
४ ९ ३ ०४०३c तां गूहत तमसापव्रतेन यथैतेषामन्यो अन्यं न जानात् ॥ १८६०

४ ९ ३ ०५०१a अमीषां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि ।
४ ९ ३ ०५०१c अभि प्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम् ॥ १८६१
४ ९ ३ ०५०२a प्रेता जयता नर इन्द्रो वः शर्म यच्छतु ।

४ ९ ३ ०५०२c उग्रा वः सन्तु बाहवोऽनाधृष्या यथासथ ॥ १८६२
४ ९ ३ ०५०३a अवसृष्टा परा पत शरव्ये ब्रह्मसँशिते ।
४ ९ ३ ०५०३c गच्छामित्रान्प्र पद्यस्व मामीषां कं च नोच्छिषः ॥ १८६३

४ ९ ३ ०६०१a कङ्काः सुपर्णा अनु यन्त्वेनान्गृध्राणामन्नमसावस्तु सेना ।
४ ९ ३ ०६०१c मैषां मोच्यघहारश्च नेन्द्र वयाँस्येनाननुसंयन्तु सर्वान् ॥ १८६४
४ ९ ३ ०६०२a अमित्रसेनां मघवन्नस्माञ्छत्रुयतीमभि ।
४ ९ ३ ०६०२c उभौ तामिन्द्र वृत्रहन्नग्निश्च दहतं प्रति ॥ १८६५
४ ९ ३ ०६०३a यत्र बाणाः सम्पतन्ति कुमारा विशिखा इव ।
४ ९ ३ ०६०३c तत्रा नो ब्रह्मणस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु ॥ १८६६

४ ९ ३ ०७०१a वि रक्षो वि मृधो जहि वि वृत्रस्य हनू रुज ।
४ ९ ३ ०७०१c वि मन्युमिन्द्र वृत्रहन्नमित्रस्याभिदासतः ॥ १८६७
४ ९ ३ ०७०२a वि न इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः ।
४ ९ ३ ०७०२c यो अस्माँ अभिदासत्यधरं गमया तमः ॥ १८६८
४ ९ ३ ०७०३a इन्द्रस्य बाहू स्थविरौ युवानावनाधृष्यौ सुप्रतीकावसह्यौ ।
४ ९ ३ ०७०३c तौ युञ्जीत प्रथमौ योग आगते याभ्यां जितमसुराणाँ सहो महत् ॥ १८६९

४ ९ ३ ०८०१a मर्माणि ते वर्मणा च्छादयामि सोमस्त्वा राजामृतेनानु वस्ताम् ।
४ ९ ३ ०८०१c उरोर्वरीयो वरुणस्ते कृणोतु जयन्तं त्वानु देवा मदन्तु ॥ १८७०
४ ९ ३ ०८०२a अन्धा अमित्रा भवताशीर्षाणोऽहय इव ।
४ ९ ३ ०८०२c तेषां वो अग्निनुन्नानामिन्द्रो हन्तु वरंवरम् ॥ १८७१
४ ९ ३ ०८०३a यो नः स्वोऽरणो यश्च निष्ठो जिघाँसति ।
४ ९ ३ ०८०३c देवास्तँ सर्वे धूर्वन्तु ब्रह्म वर्म ममान्तरँ शर्म वर्म ममान्तरम् ॥ १८७२

४ ९ ३ ०९०१a मृगो न भीमः कुचरो गिरिष्ठाः परावत आ जगन्था परस्याः ।
४ ९ ३ ०९०१c सृकँ सँशाय पविमिन्द्र तिग्मं वि शत्रूं ताढि वि मृधो नुदस्व ॥ १८७३
४ ९ ३ ०९०२a भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
४ ९ ३ ०९०२c स्थिरैरङ्गैस्तुष्टुवाँ सस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥ १८७४
४ ९ ३ ०९०३a स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।

४ ९ ३ ०९०३c स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥

४ ९ ३ ०९०३e ॐ स्वस्ति नो बृहस्पतिर्दधातु ॥ १८७५

॥ इत्युत्तरार्चिकः ॥

॥ इति सामवेदसंहिता समाप्ता ॥

Encoded and proofread by Anshuman Pandey pandey at umich.edu

Samaveda Samhita Kauthuma ShAkha

pdf was typeset on September 29, 2018

Please send corrections to *sanskrit@cheerful.com*